नं० ४८८३

नाम- ब्रह्माण्डपुराणे अध्यात्म रामायणटीका
रामगीतोत्सवः

कर्ता- रामसहायः टेकचन्द्र पुत्रः

पत्र सं०- ७३ पत्राणि सं० ×

विषयः- पुराणमाहात्म्यादि

रामगीता रामगीतोत्सवाख्यटीकासहिता

४८८३

4883

#70/71 Common

F =72

रामगीता श्लोक १५०० पत्रे ७४

४८८२

रा॰गी॰
टी॰
१

ॐ श्रीगणेशायनमः ॐ हरिहरविधयस्तत्कर्मविध्वंतथैनत्स्फुरितमनवबोधेयत्रबोधेनभा
ति गुणइवभुजगादिःसच्चिदानन्दमूर्तिःसकलमलविरामःसोऽहमेवास्मिरामः १ स्वल्पा-
युर्बुद्धिभाजामभिलषितकृतेनारदेनप्रयुक्तः स्पष्टंसर्वार्थसारंरघुपतिचरितंप्राहतस्मैप्रस
न्नः तत्राप्यल्पेनसम्यक्छ्रुतिगणगदितंस्वात्मबोधंविवक्षुः श्रीरामेणैवगीतांस्फुटहवि
वृपदांरामगीतांववन्ध २ निःशेषशास्त्रार्थरहस्यभूतांश्रीरामगीतामनधीतशास्त्रैः कृ
पांगृह्णाम्यवलम्ब्यरामसहायनामाविवृणोतिकिंचित् ३ इहखलुपरमकारुणिके
ननारदमुनिनाचतुर्विधपुरुषार्थसाधनभूतानांवेदप्रणीतानांकर्मज्ञानोपासनानामने
कविधानांविलम्बितफलानांसदाचारविद्यादिश्रवणादिचिन्ताध्यानशालिनासाध्या
नांतद्दरिद्रैःस्वल्पतरायुर्बुद्धिप्रभावैरत्यन्तपापात्मभिःकलियुगपुरुषैःकर्तुमशक्य।
त्वाहंभ्यादिनाकृतानामपितेषांतत्पापापनोदाक्षमत्वाच्चकथंतेषांस्वर्गापवर्गौस्यातामि
तिचिन्तापरेणब्रह्मलोकंगत्वा ॥ इदानीमेकमेवास्तिश्रोतव्यंस्मरसत्तम तद्रहस्यमपि।

ब्रूहि यदि तेऽनुग्रहो मयि १ प्राप्ते कलियुगे घोरे नराः पुण्यविवर्जिताः दुराचाररताः सर्वे सत्यवा
र्तापराङ्मुखाः २ परापवादनिरताः परद्रव्याभिलाषिणः परस्त्रीसक्तमनसः परहिंसापरा
यणाः ३ देहात्मदृष्टयो मूढा नास्तिकाः पशुबुद्धयः मातापितृकृतद्वेषाः स्त्रीदेवाः कामकिङ्क
राः ४ विप्रा लोभग्रहग्रस्ता वेदविक्रय[illegible]जीविनः धनार्जनार्थमभ्यस्तविद्यामदविमोहि
ताः ५ त्यक्तस्वजातिकर्माणः प्रायशः परवञ्चकाः क्षत्रियाश्च तथा वैश्याः स्वधर्मत्यागशीलिनः
६ तद्वच्छूद्राश्च ये केचिद्ब्राह्मणाचारतत्पराः स्त्रियश्च प्रायशो भ्रष्टा भर्त्रवज्ञाननिर्भयाः ७ श्व
शुरद्रोहकारिण्यो भविष्यन्ति न संशयः एतेषां नष्टबुद्धीनां परलोकः कथं भवेत् ८ इति चिन्ता
कुलं चित्तं जायते मम सन्ततम् लघूपायेन येनैषां परलोकगतिर्भवेत् ९ तमुपायमुपाख्याहि
सर्ववेत्ता यतो भवान् इत्येवं पृष्टः सन् सर्वलोकपितामहः परमेश्वरस्याप्तकामस्य श्रीरामचन्द्र
स्य यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते उत्सीदेयुरि
मे लोका न कुर्यां कर्म चेदहमिति मनसि कृत्वा यथा मया क्रियते तथान्योऽपि धर्मयशोविवृद्ध्यर्थं
कर्म कुर्यादिति लोकशिक्षार्थं कर्म कुर्वतः अज्ञातिशयपूर्वकवर्णाश्रमानुकूलमनोरमकर्मा॰

= श्रीरामस्येत्यादि वध्रीद्वयस्य कर्मानुष्ठानेनेत्यनेनान्वयः ४

= पितामह इत्यस्य रामायणं नारदं प्रत्याविष्कारेत्यनेनान्वयः ४

= अर्थमित्यादिद्वितीयान्तानामभिदधानमित्यनेनान्वयः १

नष्ठानप्रतिपादनेनकर्मकाण्डार्थं पार्वतीपृष्टश्रीरामतत्वनिरूपणार्थमेवभगवच्छङ्करप्रश्नेनःप्रति
तत्वंस्फुटतरमाह्लादप्रदश्रीरामतत्वनिरूपणाज्ज्ञानकाण्डार्थं तद्वत्सोपाधिकब्रह्मध्यानरूपोपा
सनाकाण्डार्थंचतत्रतत्रभक्तिप्रसङ्गेनकिष्किंधाकाण्डचतुर्थाध्यायादौतद्वहिरङ्गसाधनस्य
क्रियायोगस्यनिरूपणेनचकलिमलोन्मूलनदक्षंस्फुटमभिदधानमतएवसमस्तश्रुतिसारार्थ
सन्दर्भस्थ्रं साधुपृष्टं त्वयासाध्वीवक्ष्येतच्छृणुसादरम् पुरात्रिपुरहन्तारंपार्वतीभक्तवत्सलं १
श्रीरामतत्वंजिज्ञासुःपप्रच्छविनयान्विता प्रियायैगिरिशस्तस्यैगूढमाख्यानवान्स्वयम् २
पुराणोत्तममध्यात्मरामायणमितिस्मृतम् तस्याध्ययनमात्रेणजनोयास्यतिसद्गतिम् ३ ता
वद्विजृम्भतेपापंब्रह्महत्यापुरस्सरम् यावज्जगतिनाध्यात्मरामायणमुदेष्यति ४ तावत्कालो
महोत्साहोनिःशङ्कंसंप्रवर्तते यावज्जगतिनाध्यात्मरामायणमुदेष्यति ५ तावत्स्वरूपंरा
मस्यदुर्बोधंमहतामपि यावज्जगतिनाध्यात्मरामायणमुदेष्यति ६ अध्यात्मरामायणतःश्लो
कंश्लोकार्द्धमेववा यःपठेद्भक्तिसंयुक्तःसपापान्मुच्यतेक्षणात् ७ योगायतितथाध्यात्मरामा
यणमहर्निशम् आज्ञांतस्यप्रतीक्षन्तेदेवाइन्द्रपुरस्सराः ८ योगायतितथाध्यात्मरामायण

अभिदधानमित्या
दिद्वितीयान्तानां
रामायणमित्यने
नान्वयः

२

मनुव्रतः यद्यत्करोतिसत्कर्मतत्तत्कोटिफलंभवेत् ९ एकादशीदिनेध्यात्मरामायणमुपोषि
तः योरामभक्तसदसिव्याकरोतिनरोत्तमः १० प्रत्यक्षरंसगायत्रीपुरश्चर्याफलंलभेत् वहु
नाकिमिहोक्तेनशृणुनारदतत्त्वतः ११ श्रुतिस्मृतिपुराणेतिहासागमशतानिच अर्हन्तिना
ल्पामध्यात्मरामायणकलामपि १२ योभक्त्यार्चयतेऽध्यात्मरामायणमतन्द्रितः दिनेदिने
ऽश्वमेधस्यफलंतस्यभवेन्मुने १३ नमस्कारोतियोध्यात्मरामायणमहर्न्नतः सर्वदेवार्चनफ
लंसप्राप्नोतिनसंशयः १४ इत्याद्यनेकशोब्रह्मणैवस्वयमभिहितप्रभावातिरेकंयथाकथंचि
त्स्वल्पश्रवणपठनमात्रेणापिनिःशेषकलुषतन्द्रासनोन्मूलनपूर्वकसमस्तपुरुषार्थप्रदं ॥
चरितंरघुनाथस्यशतकोटिप्रविस्तरम् एकैकमक्षरंपुंसांमहापातकनाशनमितिविश्वामि
त्रेणपाठप्रमाणतःपरिगणितसमस्तरामायणशिरोमणिमध्यात्मरामायणंशिवेनपार्वती
प्रतिप्रोक्तंकलिमलापहत्वेनसांस्वर्गापवर्गसिद्धेर्लघूपायत्वेनप्रतिज्ञायब्रह्मणातथापुत्रं
नारदंप्रत्याविष्कारंतस्यचरामायणस्यप्रतिदिनंतात्पर्यपर्यालोचनोपेतपारायणस्यकर्तुम
शक्यत्वेनतत्रचरामहृदयादीनत्रतत्रसंक्षेपतःकृतस्योपनिषत्प्रतिपादितश्रीरामतत्त्वनिरूपणः

= रामगीतांनिवेशयामास १

रा.गी.
टी
३

समग्रत्वंतस्यापिचस्वगुणोपासनचरित्रनिरूपणसंभिन्नत्वेनचास्फुटत्वंचमत्वानस्तत्ररामायणोदि
नमात्रेणैवशक्यानेकपरायणंस्फुटतरमशेषतोनिरूपितनिःशेषोपनिषत्प्रतिपाद्यश्रीरामतत्त्वा
म् श्रीरामगीतायत्पापंननाशयतिनारद तन्नपश्याम्यहंलोकेमार्गमाणोपिसर्वदा १ रामेणो
पनिषत्सिन्धुमुन्मथ्योत्पादितांमुदा लक्ष्मणायार्पितांगीतासुधांपीत्वामरोभवेत् २ जमदग्नि
सुतःपूर्वंकार्तवीर्यवधेच्छया यत्नाद्विद्यामभ्यसितुंमहेशस्यान्तिकेवसन् ३ अधीयमानांपार्व
त्यारामगीतांप्रयत्नतः श्रुत्वागृहीत्वासुपठन्नारायणकलामगात् ४ ब्रह्महत्यादिपापानांनि
ष्कृतिंयदिवाञ्छति रामगीतांमासमात्रंपठित्वामुच्यतेनरः ५ दुष्प्रतिग्रहदुर्भोज्यदुरालापादि
संभवम् पापंसंकीर्तनेनेयंरामगीताविनाशयेत् ६ सालिग्रामशिलाग्रेचतुलस्यश्वत्थसन्नि
धौ यतीनांपुरतस्तद्वद्रामगीतांपठेत्तुयः ७ सतत्फलमवाप्नोतियद्वाचामपिनगोचरम् रा
मगीतांपठन्यस्तुश्राद्धेसंभोजयेद्द्विजान् ८ तस्यतेपितरःसर्वेयान्तिविष्णोःपरंपदम् एकादश्यां
निराहारोनियतोद्वादशीदिने ९ स्थित्वागस्त्यतरोर्मूलेरामगीतांपठेत्तुयः सएवराघवःसा ३
क्षात्सर्वदेवैश्चपूज्यते १० विनाध्यानंविनादानंविनातीर्थावगाहनम् रामगीतांनरोधीत्यतदन·

त्तफलंलभेत् ॥ श्रीरामगीतामाहात्म्यंकृत्स्नंजानातिशंकरः तदर्द्धंगिरिजावेत्तिनदर्द्धंवेद्म्यहं
मुने ॥२॥ यज्ज्ञात्वानन्त्वेणलोकःशुद्धबुद्धिमवाप्नुयात् इत्येवंस्वयमुदीरितानुभावविशेषांश्री·
रामचंद्रेणस्वयंलक्ष्मणायोपदिष्टांसद्यएवजीवन्मुक्तिपदारोहणसोपानपंक्तिभूतांश्रीरामगी
तांनिवेशयामास तत्रतावत्सर्वाध्यायान्तेरामोपिसीतारहितःपरात्माविज्ञानदृक्केवलआ·
दिदेवः संत्यज्यभोगानखिलान्विरक्तोमुनिव्रतोभून्मुनिसेवितांघ्रिरित्युक्तत्वात् राज्यव्याप
वंत्यक्त्वामुनिरेवाभूदुत्तभोगत्यागादिनामुनिसादृश्यमालंब्यराज्यमेवकृतवानित्याशङ्क्याया
माह ॥ ॐ ततोजगन्मङ्गलमङ्गलात्मनाविधायरामायणकीर्तिमुत्तमां चचारपूर्वाचरितं
रघूत्तमैराजर्षिवर्यैरपिसेवितंयथा ॥१॥ ततःसीतापरित्यागानन्तरंरघूत्तमोजगन्मंगलमङ्ग·
लात्मनापूर्वाचरितंधर्मंचचारकृतवानित्यन्वयः वेदाविप्रास्तथागावोहृद्धिधर्मादिकंचयत्
ग४ मंगलानिजगत्याहुर्यैतामोदःप्रजायतइतिजन्मङ्गलानामपिसर्वेषांहृद्धिहेतुत्वान्मङ्गलभूते
नात्मनापूर्वैःककुत्स्थादिभिराचरितंराज्ययज्ञदानादिपूर्वेषामितिशेषषष्ठीसमासः उभय
थापिपूर्वाचरितंचचारेत्यतःयथापूर्वैराचरितंतथाचचारेत्युक्तिमात्रस्यलाभात्पूर्वेषांतत्फ

रा॰गी
टी
४

लानर्हत्वेनसम्यग्धर्मानुष्ठानंश्रीरामचन्द्रस्यतुतदभावात्किञ्चिच्छिथिलंस्यादित्यतआह ॥
यद्येति विधिवदित्यर्थः यद्यत्पूर्वाचरितंतत्तथैवेत्यवधारणंवा ननुसभयादभयंप्राप्तस्तदर्थंयततेव
यः सपुनःसभयंगंतुंतंनुच्छेन्नहीच्छतीतिजिज्ञासोःस्वानन्दरसिकस्यविदुषश्चक्लेशक्लेश
प्रदकर्मतत्फलवैतृष्ण्यस्यप्रसिद्धत्वाच्छ्रीरामचन्द्रेणापिवचसेवलोकोपदेशोविधेयः किं
लोकसंग्रहार्थंतदनुष्ठानक्लेशेनेत्याशंक्यपूर्वविद्वत्सग्रह नु दर्शनेनानुष्ठानंविनालोकसंग्र।
हस्यदुःसंपादत्वंध्वनयति राजर्षीति राजानऋषयइवविषयानपेक्ष्यनिष्कामधर्मेब्रह्मलाभ्या
सपरत्वात् उपमितंव्याघ्रादिभिरितिसमासः तेपूर्वर्याजीवन्मुक्ताइत्यर्थः अपिशब्देनतेषांवि
धिकिंकरत्वाभावस्फुरणात् तैरपिसेवितं अन्यथालोकसंग्रहस्याशक्यत्वात् तथाचभगवान्
नबुद्धिभेदंजनयेदज्ञानांकर्मसंगिनां जोषयेत्सर्वकर्माणिविद्वान्युक्तःसमाचरन्निति राजर्षि
वर्यैरपियथालोकसंग्रहार्थंसेवितंतथाचवारेत्यन्वयोवातत्रज्ञानिनासंग्राह्योलोकोद्विविधः ४
सन्मार्गवर्तीसन्मार्गवर्तीच तत्राद्यः शिष्यस्तेडुपदेशसदाचारानुसारितयासूच्यते भक्तस्त्वन्तस्
जादिनाऽभीष्टंप्राप्नोति तथाचश्रुतिः यंयंलोकंमनसासंविभातिविशुद्धसत्त्वःकामयतेयांश्च

कामान् तंतं लोकं जयति तांश्च कामान् तस्मादात्मज्ञं ह्यर्चयेद्भूतिकाम इति स्मृतिरपि यद्येको
ब्रह्मविद्भिक्षुर्जगतः स्पर्शयते ऽखिलं तस्माद्ब्रह्मविदे देयं यद्यस्ति वस्तु किंचनेत्यादिः तदस्य श्रेष्ठतदा
५ सश्रेष्ठैः सूरीणां स्वज्ञानिनः सदाचारमनुसरति अपसन्मार्गवर्तीन तद्दृष्टिपातेन पापैः प्रमुच्यते तथा
च स्मृतिः यस्यानुभवपर्यन्ता बुद्धिस्तत्त्वे प्रवर्त्तते तद्दृष्टिगोचराः सर्वे मुच्यन्ते सर्वकिल्बिषैरि
ति एतस्य सदाचाराभावे तेनैव सदाचारमेव रोचयेयुः तथा च तेषां स्वदृचेतसां स्वार्थभ्रंशः स्या
त् तद्वैष्णवस्य कृतं दुष्कृतान्यन्नाभाववर्तितास्मिंस्तत्त्वविदि स्वयं संभावितं दुष्कृतं गृह्णाति त-
था च श्रुतिः तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामिति ननु श्रीरामचं
द्रस्य देवकार्यार्थं स्वीकृतमायामानुषवेषस्य कथं पूर्वाचरितानाचरणावकाशः अस्यत आह वि
धायेति देवकार्यं भूतेन रावणादिवधेनोत्तमां रामायणरूपां कीर्तिं विधाय संपाद्येत्यर्थः तदनेनं रे ८४
चन यथाचरणेन त्रैलोक्यस्याखिलवद्धर्ममर्यादीकरणमप्यावश्यकमेव किंचात्र रागिणा रागादि
दोषशैथिल्यापादनेन स्वात्मजिज्ञासोदयानुकूलतयोपादेयं जिज्ञासुना चश्रवणादौ रागादि
कृतचित्तविक्षेपनिवर्त्तकत्वेनोपादेयं तत्त्वविदा वततत एव जीवन्मुक्त्यनुकूलतया दरणीयं जीव

न्मुक्तस्य तु रागद्वेषभयादीनामनुरूपं चरन्नपि योऽन्तर्व्योमवदच्छः स जीवन्मुक्त उच्यते इत्युक्तत्वात् स्वभा
वसिद्धवक्ष्यमाणत्यागकर्मयोगाद्यभिधानं यथाप्राप्तव्यवहारपरत्वं त्यक्तरागादिदोषस्य यद्दैवोचि
चित्येन कर्तुमायातीत्येतदर्थं तदानीं तत्तद्रागाद्याभासैः सदाचरणलक्षणं चित्तविश्रान्त्यनुकूलतया
सेवनीयमिति लोकोपदेशार्थमेव चचार पूर्वाचरितमित्यादि पूर्वशिष्टानुसारितानिरूपणेन प्र
१५ दर्शितं ग्रन्थस्य श्रीरामचन्द्रेणैवं वर्तितं तन्निरूपणं मन्दप्रयोजनं स्यात् नहि पूर्वाचरितत्वादयं धर्म
इति निर्णीयाचरितवानिति निर्णयद्योतनार्थं न तत्संभवति सर्वज्ञत्वात् नापि स्तुत्यर्थं स्वत एव स
र्वोत्कृष्टत्वात् नहि पूर्वाचरितत्वादयं धर्म इति निर्णीयाचरितवानिति निर्णयद्योतनार्थं तत्संभ।
वति नाप्यविहिताचरणनिषेधार्थम् तत्त्वज्ञस्याग्रहभावात् चकारधर्मेण परेण राज्यमित्या
दौ वक्तव्ये स्वतोऽपकृष्टदृष्टान्तानौचित्याच्च न च तथापि लोकसंग्रहार्थत्वेन यथाप्राप्तत्वबाधः स्वस
दृशासेवितत्वेन तस्यापि यथाप्राप्तत्वात् न च रागादिव्यापारदर्शनेन तद्बाधः मिथ्यादौ रागादिज्ञा
पनस्यापि यथाप्राप्तत्वात् किं तु दोषदृष्ट्यादिना रागादीञ्जितवतो रागाद्याभासैर्व्यापारप्रसा ५
धयतः सर्वेष्टसिद्धिरिति सिद्धम् इदानीं विस्तरभयात्स्वयमनुक्ताग्रपिकथावैराग्यार्थं स्मारयति

महादेवः॥ सौमित्रिणापृष्टउदारबुद्धिनारामःकथाःप्राहपुरातनीःशुभाः राज्ञःप्रमत्तस्यनृगस्यशा
पतोद्विजस्यतिर्यक्त्वमथाहराघवः २॥ सौमित्रिणालक्ष्मणेनपृष्टःसन्रामःकथाःप्राहप्रोक्तवान्
उदारबुद्धिनेति तात्पर्यावगाहसहितवाक्यार्थग्रहणधारणात्मबुद्धिनबुद्धित्वरूपस्ययोगश्श्रो
त्रत्वस्यव्यञ्जनार्थंपुरातनीःचिरकालिकास्तेनादरणीयतालभ्यतेशुभाःशुभावहाः बुद्धिगुणप
श्रोत्रसुखप्रदत्वात् तास्तुरामायणान्तरप्रसिद्धायथा इक्ष्वाकुतनयोराजानिमिर्नाममहायशाः
ऋषिवर्यान्समाहूयसत्रारम्भंचकारसः १ वसिष्ठेनतदाप्रोक्तंशक्रेणाहंहुतःपुरा तदन्तंप्र·
तीक्षस्वसोथगौतममार्चयत् २ इंद्रयज्ञेसमाप्तेतुवसिष्ठःपुनरागतः सत्रंसमाप्तिमिःसुप्तोमुनि
स्तत्रोपविष्टवान् ३ ततोवसिष्ठःकोपेनसुप्तंतमशपत्तदा भविष्यसिविदेहस्त्वंदर्शनेनददासि
यत् ४ प्रबुद्धस्तुनिमिःशापंश्रुत्वासक्रोधमूर्छितः उवाचाज्ञानतःसुप्तेमयिक्रोधेनमुक्तवान्
यस्माद्घोरतरंशापंतस्मात्त्वमपिनिर्वपुः भवेतिशप्तवान्सोपिवसिष्ठंमुनिपुंगवम् ५ वायुभू
तोवसिष्ठस्तुशरीरार्थंतदाययौ सत्यलोकेस्वपितरंप्रणतोवाक्यमब्रवीत् ७ विदेहोनिमि।
शापेनकृतोहंदेहसंभवे प्रसादंकुर्वितिप्रोक्तोब्रह्मातंमुनिमब्रवीत् ८ मित्रावरुणयोस्तेजः प्र

रा.गी
टी
९

विशेतिततोमुनिः ब्रह्माणमभिवाद्याशुप्रययौवरुणालयम् ९ तदैवमित्रावरुणौक्रीडेदमुपसंग
तौ यदृच्छयोर्वशीचापितत्रागमद्यथाप्सराः १० ततोमित्रोब्रवीदेनांक्रीडंतींवरुणालये शुभेमांर॰
मयस्वेतिसापित्वब्रवीत्तथाकरोत् ११ मयासहरमस्वेतिवरुणोप्यब्रवीदिमाम् सोवाचाहंवृतापूर्वं
मित्रेणत्वंकथंभजे १२ वरुणोऽथाब्रवीत्कामपीडितोस्मिन्नघटेशुभे इदंतेजःसमुत्स्रक्ष्येभावेम
यिसमुत्सृज १३ साप्युत्तवत्कृतेभावोदेहोमित्रस्यचप्रभो इतिस्वीकृत्यमित्रस्यगतासोपुनरन्ति
6
कम् १४ ततोमित्रस्तुसंक्रुद्धःप्राहत्वंमहताकथम् अन्यंवृतवतीदुष्टेततोभुविविवसं १५ बुध
स्यपुत्रोभर्तातेभविष्यतिपुरूरवाः इतिशापेनतद्रूपगेहेसोवासभामिनी १६ तस्यांजज्ञेततःश्री॰
मानायुर्नाममहाबलः नहुषोयस्यपुत्रस्तुबभूवेन्द्रसमद्युतिः १७ वज्रेणहृत्वेंद्रहतेंद्रेभ्रष्टेतुबल
हत्यया शतंवर्षसहस्राणांयेनेंद्रत्वंप्रशासितं १८ यःसकुम्भस्तुसोमित्रेमित्रावरुणतेजसा पू
र्णस्तस्मादुभौविप्रौसंभूतौसूर्यतेजसौ १९ अगस्त्यस्तत्रभगवान्संबभूवाग्रजोमुनिः नाहंपु ९
त्रस्तवेत्युक्त्वातस्मात्कुंभादपाक्रमत् २० यद्धितेजस्तुमित्रेणउर्वश्यांपूर्वमाहितम् तस्मिंस्तदऽ
भवत्कुंभेवसिष्ठोभगवान्मुनिः २१ तमिक्ष्वाकुर्महातेजाजातमात्रमनिन्दितम् वव्रेपुरोहितं॰

सौम्य वंशस्यास्य भवायनः २२ निमेस्तु वायुभूतस्य शुण्वदेहसमुद्भवम् ततस्ते याजयामासुर्यावद्दी
क्षं महर्षयः २३ तं च देहं ररक्षुस्ते गंधमाल्यैः सुपूजितम् ततो यज्ञसमाप्तौ तु देवास्तत्र समाययुः
२४ सुप्रीतास्ते तदा सर्वे निमेरात्मानमब्रुवन् वरं वृणीष्व राजर्षे किं ते जन्म विधीयतां २५ ततो व
सेयं नेत्रेषु सर्वेषामिति सोऽब्रवीत् तथेत्युक्त्वागता देवा वायुभूतस्तु सोऽक्षिषु २६ ऋषयोऽपि म
हात्मानो निमेर्देहं ममन्थिरे मन्त्रैर्हुत्वा पुत्रहेतोर्मथनाद्यदजायत २७ पुत्रो मिथिरिति ख्यातो ज-
ननाज्जनकस्तथा स विदेहोऽभवद्यस्माद्विदेह इति चोच्यते २८ तस्माद्विदेहा जनकाः प्रोच्यन्ते त
स्य वंशजाः ख्याताः पुण्यव्रताः श्रेष्ठाः सत्यार्जवपरायणाः २९ तेषां मिथिः स सर्वो भूर्येनासौ मि-
थिलाभवत् एवं ब्रुवति काकुत्स्थे लक्ष्मणः प्रत्युवाच ह ३० कस्मान्न तान्न वाज्ञाज्ञादीक्षास्योऽपि
निमिर्मुनौ उवाच रामः सर्वेषु न तमालभ्यतेऽनघ ३१ ययातदत्तत्रियेणैव दत्तान्तं शुक्रस्य तच्छ्रुण
मधुपस्य सुतो वीरो ययातिरिति विश्रुतः ३२ शर्मिष्ठा देवयानी च भार्ये तस्य महात्मनः वृष-
पर्वसुता सर्वा शुक्रपुत्री तथापरा ३३ देवयानी प्रिया नाभूत्तस्य तां दुःखितो यदुः पुत्रः प्राह-
सुतां सिन्तं शुक्रस्याक्लिष्टकर्मणः ३४ सह सेवं विधं दुःखमपमानं च दुःसहम् तावुभौ सहि

रा.गी
टी
८

तोदेविप्रविशाम्येवहुताशनम् ३५ यदिवासहनीयंतेमामनुज्ञातुमर्हसि त्वमत्वंनहामिष्येहंमरि
ष्यामिनसंशयः ३६ श्रुत्वापुत्रवचःसातुसस्मारपितरंतदा ज्ञात्वातदिङ्गितंशीघ्रमायातोभार्गवो
मुनिः ३७ तांदृष्ट्वादीनमनसंदेवयानीमनेकशः किमेतदितिपप्रच्छसाथप्राहाश्रुलोचना ३८
अहमग्निंजलंवापिविषंवामुनिपुंगव दुःखेनानेनसंयुक्ताभजिष्येत्वातुमर्हसि ३९ अनुमन्यस्व
मांतातत्वय्यवज्ञांकरोत्ययम् यन्मांराजानजानीतेनचापिबहुमन्यते ४० श्रुत्वातद्वचनंशुक्रोय
यातिंनहुषात्मजम् शशापातीवसंक्रुद्धोमोहान्मनयोयतः ४१ अवजानासितस्मात्वंजरया
शिथिलोभव इत्युक्त्वानृपमाश्वास्यसुतांचप्रययौमुनिः ४२ मुनेर्वचनिर्दंप्राप्यापिययातिःस्तोत
वान्प्रभुः ततःप्रोवाचसयदुंजरेयंगृह्यतांमम ४३ भोगान्भुक्त्वायथाकामंजरांप्राप्स्याम्यहंपु
नः इत्युक्तःसयदुःप्राहपुरुस्तेदयितःसुतः ४४ भोजनैर्येःसदाप्यासितेचगृह्णांतुतेजराम्
वहिष्कृतोहमर्थेषुसर्वेष्वितिसमीरितः ४५ राजाशशापतंक्रुद्धस्त्वद्वंशोराज्यसाम्बैरैः दुर्वि
नीतैश्चपुरुषैर्नचिरंख्यातिमेष्यति ४६ ततस्तथैवाहपुरुंजरेयंगृह्यतामिति पुरुस्तुप्राञ्ज
लिःप्राहभार्ग्यंमेशासनंतव ४७ ततःसंक्रामयामासजरांराजामुदान्वितः बहुवर्षसहस्रा

णिराज्यंयत्नोस्तथाकरोत् ४८ अथराजाब्रवीत्हृष्टःमानयैतांजरांमम यतःकृतात्वयात्वामेभजरा
ज्यंयशश्चततं ४९ श्रीरामउवाच ततोभिषिच्यतंराज्येविवेशवनमात्मवान् एवंधृतस्तेनशा
पोनिमित्तंहृद्वचत्तमे ५० इत्येवमाद्याःकथाःप्राहरामः अथशत्रुघ्नकारार्थेआनन्तर्यार्थेतन्द
गकथायाःपश्चादुक्तत्वान्नियमःप्रसज्येत सचरामायणान्तरविरुद्धः एषतेनृगशापस्यविस्त
रोभिहितोमया यद्यस्तिश्रवणेश्रद्धाशृणुष्वैकांपरांकथाम् इतितदनन्तरमेवकथान्तराऽभि·
धानात् तथाचप्रमत्तस्यजातप्रमादस्यराज्ञोनृगस्यद्विजस्यशापतोतिर्य्यक्त्वंचाहप्रोक्तवान् ॥ हैतो ४
तद्यथा ब्रह्मण्योधार्मिकोराजानृगोनामकदाचन पुष्करेषुगवांकोटीर्विधिपूर्वंसदत्तवान्
तत्रभग्नागताधेनुःसवत्साकामदोहना उञ्छवृत्तेस्तुविप्रस्यराजातांचापिदत्तवान् २ मार्ग
माणःसगांविप्रोनलेभेबहुवत्सरान् ततःकनखलेदृष्टातेनसाविप्रवेश्मनि ३ आगच्छेब
हुलेत्येवंनाम्नोवाचसगांद्विजः स्वामिनोगौःस्वरंश्रुत्वागच्छंतंसातमन्वगात् ४ नृपदत्तो
गृहाद्धेतोर्ह्रियमाणांसमीक्ष्यसः द्विजस्तेनततविप्रेणविवादंकृतवान्बहु ५ विवदन्तौगतौरा
जद्वारंगोनिष्क्रयंततः दाप्यमानेनगृह्णीतोराजदर्शनकांक्षिणौ ६ अहोरात्राण्यनेकानिव

रा०गी०
टी०
८

सन्तोक्रोधमीयतः ददतस्ततदाराज्ञेशापन्तौ द्विजपुङ्गवौ ७ अर्थिनांकार्यसिद्ध्यर्थं यस्मात्वंवैने।
विदर्शने तस्माद्दृश्यो भूतानां कुकलासो भविष्यसि ८ उत्पत्स्यते यदुकुले वासुदेवो जनार्दनः
सतेमोक्षयिता शापात्कृतान्तेनिष्कृतिर्नृप एवंतौ शापमुत्सृज्य ब्राह्मणौ स्वगृहंगतौ सराजापा
पितं शापमुपभुंक्ते सुदारुणं ९ इत्यादिना दनेन कथास्मारणेन राज्यकार्येष्वधिकृतं लक्ष्मणं प्र
ति एतेनेसर्वमाख्यातं सर्वकार्यनिदर्शनं वर्तितव्यं तथा सौम्य यथा दोषो न मे भवेत् सावधाने· इति
नभाव्यमित्युपदेशः तदेवं रागादिना स्वल्पापराधेपि बहुनर्थोदय इति निर्दोषात्मस्वरूपजि·
ज्ञासानुकूलं वैराग्यं च प्रदर्शितम् कौलीन्यपरेण राघवे इति पदेन तु एतादृश सदुपदेश सम्पूर्व।
जापेक्षयापियोग्यत्वं धन्यते तदेवं प्रासङ्गिकं प्रदर्श्येदानीं श्रीरामगीतां प्रस्तौति लक्ष्मणप्रश्नोत्ता
वदवतारयति॥ कदाचिदेकान्तमुपस्थितं प्रभुं रामं रमालालितपादपंकजं सौमित्रिरासादि
तशुद्धभावनः प्रणम्य भक्त्या विनयान्वितोऽब्रवीत् ३॥ कदाचित्सौमित्रिः प्रणम्य नमस्कृत्य राम
मब्रवीत् एवं प्रश्लोकेनार्थः रमन्ते योगिनः सोपाधिनिरुपाधिभावनाभिरस्मिन्निति रामो ब्रह्म उप। ८
स्थितं अधिष्ठानतया एकान्तमेकरसं विकारशून्यमित्यर्थः यद्वा एकमद्वितीयं अनन्तं सर्वप्रल

8

येण्य विशिष्यमाणत्वात् अवसानभूतं चेत्यर्थः ननु तत्तत्पदार्थशक्तिभिरेव सर्वेष्टसिद्धौ किमीशक
ल्पनयेत्यत आह प्रभुं सर्वशक्तिप्रवर्त्तकं अन्यथा जडानां मायिकपदार्थानां तत्कर्तॄणां चाप्रवृत्तिः
प्रसज्येत परमेश्वरचेतनाधिष्ठितत्वे तु नायं दोषः नच तस्येन्द्रजालिकवत्सशरीरत्वापत्तिः अलौ
किकमायाविनस्तस्य निर्मितौ शरीरनिरपेक्षत्वात् अथेंद्रजालिकस्य सत्त्वातिरिक्तस्य हृद्धारूपेण
द्विवारसाधनहीनस्यापि गृहनिर्माणे प्रत्यक्षप्रमाणमस्ति चेन्न हिरण्यब्रह्मणः शरीरस्यापि मायापा·
वित्वे मायिनं तु महेश्वरमिति श्रुतिः प्रमाणमस्ति एवं च मायाशक्तिभिर्जगद्वैषम्येप्येतन्मायाधिष्ठा
तस्य सर्वोपकारकस्यापि परमेश्वरस्य नैर्घृण्यादिदोषलेशोपि संभावनीयः कथमशरीरस्य·
तस्य प्रतिवक्तृत्वमित्यत आह रमेति रमया लक्ष्म्या लालिते प्रेम्णा सेविते चरणकमले यस्य सौवि तं ४
त्तुमित्यर्थः तस्य च रजस्तमोनभिभूतसत्त्वोपाधिकस्य जगत्पालनार्थमनेकरूपाणि कुर्वतः
प्रकृते रावणवधाय यद्दाशरथिप्रतिवक्तृत्वसम्भवोस्तीति अयं भावः शुद्धे ब्रह्मणि मायया स
र्गादावुत्पन्नमानानादिप्राणिसंघातात् स्ववशेन एकोहं बहु स्यां प्रजायेयं पालयेयमित्येवंरू
पः संकल्पो जायते यद्यपि शुद्धे ब्रह्मण्येवंविधसंकल्पशालित्वमसमष्ट्युपाधावीशरूपे वा प्रति

रा॰गी॰
टी॰
५

9

वक्तृत्वसंभवो नास्ति तथापि पाकाद्यनेकक्रियाशालिनि देवदत्ते पाचकपाठकादिव्यपदेशवत्पालनस
र्जनसंहारव्यापारवत्येकस्मिन्नपीश्वरे क्रमेण सत्त्वरजस्तमःप्रधानोपाध्यवच्छेदेन विष्णुविधिमहेश्व
रव्यपदेशा भवन्ति तत्र ब्रह्मणो विष्णुव्यपदेशशालित्वे पूर्वोक्तरीत्याप्रतिवक्तृत्वसम्भवोस्त्येवेति ध्वन्य
ते वस्तुतस्तु योगरूढोयं रामशब्दः तथा च योगेन ब्रह्ममात्रपरोपि रूढ्या पूर्वोक्तमायाकृतराजन्य।
वेषोपलक्षितत्वेन ब्रह्माभिधत्ते एवं चोपलक्षणभूतवेषेण भक्तियोगरूढ्येव यथा सदुपदेशादिः संगृ
ह्यते लक्ष्यभूतं कैवल्यरूपेण सर्वोपनिषत्प्रतिपाद्यत्वं चोपपद्यते एतच्चोभयमध्यात्मरामायणे
सर्वत्र स्फुटं प्रतिपाद्यते अत्र गीतायां तु श्रीरामस्य कैवल्यस्वरूपज्ञानमेव ससाधनं निरूप्यते एका
न्तादिपदानामपि कैवल्यपरत्वं निरूपितमेव यद्वा एकान्तमुपलभ्यास्थितं वद्धसि स्थितमित्यर्थः
एकान्तं केवलमुपस्थितमनन्यकार्यमित्यर्थो वा प्रभुं सर्वोपकारक्षमं रमालालितपादपंकजे सी
तारूपलक्ष्मीवियोगेपि स्वयं लक्ष्म्या साक्षात्प्रत्यक्षरूपया सेव्यमाने चरणकमले यस्य तमित्यर्थः
किंभूतो लक्ष्मणः आसादितानि उपलब्धानि शुद्धभावनानि वैराग्यादिसाधनानि येन स तथा शु
द्धं ब्रह्म भाव्यते यैरिति ब्रह्मभावनानुकूलत्वेन तेषामुपादानात् तानि च चत्वारि एकमिहामुत्रार्थ

फलभोगविरागः सचैहिकानां स्रक्चन्दनवनितादिभोगानामामुष्मिकाणां चामृताप्सरःप्रभृ
तिभोगानां वान्ताशनस्येव दोषदृष्ट्या जिहासारूपः तदुक्तम् दोषदृष्टिर्जिहासा च पुनर्भोगेषु
दीनता हेतुस्वरूपकार्याणि वैराग्यस्य विदुः क्रमादिति तद्वक्ष्यमाणविवेकशमादीनामप्यूह्
ध्यानादिहेतुर्दर्शनावास्तवतान्तसंधानवाहिर्वृत्तितानवादिः फलं च स्वयमूहनीयं वैराग्यादीनां
परमप्रयोजनं तु विक्षेपनिवर्तनेन मनसः श्रवणादिसाधनप्रवृत्तितज्जन्यात्मसाक्षात्कारत।
त्रिष्वाद्ययोरपत्वमिति ज्ञेयम् द्वितीयं तु नित्यानित्यवस्तुविवेकः स च ब्रह्मैव नित्यं वस्तु तदन्यद
खिलमनित्यमित्येवंरूपः तृतीयं तु शमादिषट्कम् तत्र च मनोबुद्धिरहंकारश्चित्तं करणमान्तरं
संशयो निश्चयो गर्वः स्मरणं विषया अमी इत्युक्तचतुर्विधस्यान्तःकरणस्यान्तःस्ववशपापादनं।
शमः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानां क्रमाच्छब्दस्पर्शरूपरसगन्धग्राहकाणां ज्ञानेन्द्रियाणां
वाक्पाणिपादपायूपस्थाख्यानां वचनादानगमनविसर्गानन्दव्यापाराणां कर्मेन्द्रियाणां च
स्ववशपापादनं दमः निगृहीतानामन्तःकरणेन्द्रियाणां स्थैर्यमुपरतिः शीतोष्णादिद्वन्द्वसहिष्णु
तातितिक्षा चित्तैकाग्र्यभावः समाधानम् गुरुवेदान्तवाक्येषु विश्वासः श्रद्धा इतिषट्कम् चतुर्थं

५

रा॰गी॰ टी॰ ९

10

तस्मैनेमशुद्धसत्त्वंमोक्षेच्छालक्षणम् यद्वाश्रमादिताशुद्धाभावनावुद्धिर्येनेतिविग्रहः शुद्धिस्तु॰
काम्यनिषिद्धपरित्यागपूर्वकजन्मजन्मान्तरीयनित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानजन्या
रागादिमलाभावरूपातत्त्वावबोधानुकूलसंस्कारविशेषरूपावा तदनेनविशेषणेनाधिकारि
त्वंप्रदर्शितम् तथाचश्रुतिः शान्तोदान्तउपरतस्तितिक्षुःसमाहितोभूत्वात्मन्येवात्मानंपश्य॰
तीति भक्त्याविनयान्वितइतिपदाभ्यांगुरुभक्तिविनयसंपन्नस्यैवतत्त्वज्ञानावबोधइतिध्वन्यते
तदुक्तम् यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनइ॰
ति तथाचान्तेश्रीरामेणाप्युक्तम् यःश्रद्धयापरिपठेद्गुरुभक्तियुक्तोमय्येवसोऽमलमनाःप्रवि
लीयतेन्तेइति किमुवाचेत्यतआह॥ त्वंशुद्धबोधोसिहिसर्वदेहिनामात्मास्यधीशोसिनिरा
कृतिःस्वयम् प्रतीयसेज्ञानदृशामहात्मनेपादाम्बुजप्राहितसङ्गसङ्गिनाम्॥ ४॥ अहंप्रपन्नो
ऽस्मिपदाम्बुजंप्रभोभवापवर्गंतवयोगिभावितम् यथाञ्जसाज्ञानमपारवारिधिंसुखंतरिष्यामि
तथानुशाधिमाम् ५ ॥ हेप्रभोस्वामिन्श्रीराममांतथाऽनुशाधिशिक्षययथाऽज्ञानंमायांत॰ ९
रिष्यामितरिष्यामीत्यर्थः किमज्ञानस्यानर्थजनकत्वमित्यतआह अपारवारिधिम् सर्वानर्थसंकु

लसंसारसमुद्रात्मनापरिणतत्वेनसदृशलक्षणयावारिधिशब्दप्रयोगः ननुमायापरिणामित्वे
नशरीरादिवत्कालतःस्वयमेवनंक्ष्यतीत्यतआह अपारेति आत्मसाक्षात्कारंविनांनवसानेत्यर्थः
मायायाअविनश्यद्रूपत्वात् कालादेस्तत्परिणामित्वेनतत्परिच्छेदकत्वाभावाच्च ननुतत्तरणोपाय
भूतानिनिष्कामकर्मोपासनानित्वंपूर्वमेवानुतिष्ठसीत्यतआह अंजसाशीघ्रंनिरायासेनेत्य
र्थः परंपरयाचिदज्ञाननिवर्तकत्वेपितेषांशुद्धांतःकरणस्यविविदिषोर्ममविलम्बायासप्रदत्वे
नैवप्रतिभानात् एवंचेद्गुरूपसदनंकुर्वित्यतआह अहमित्यादिना त्वामेवगुरुमुपसन्नोसीति
भावः नन्वज्ञाननिवृत्तयेनत्वविदोवसिष्ठादीनांपदाम्बुजंप्रपद्यस्वेत्यतआह योगीति योगिभि
र्वसिष्ठादिभिरपिभावितंसेवितंकिमर्थमित्यतआह भवेति संसारभ्रमनिवर्तकमित्यर्थः न
न्वदशरथात्मजस्यममकथमेवंसाध्यानइत्याशंकाकिमन्यद्वक्तव्यंत्वंतुब्रह्मैवासीत्याह त्वमि·
त्यादिपूर्वपद्येनबोधितोसिविज्ञानस्वरूपोसीत्यर्थः प्रज्ञानंब्रह्मेतिश्रुतेः तदेवंजडांमायांनिरस्य
चेतनाभासबुद्ध्यादिनिरसनायाह शुद्धेति वक्ष्यमाणक्लेशकर्मादिरूपमलसंस्पर्शशून्यइत्य
र्थः तर्हिसर्वविच्छिन्नसाक्षीजीवःस्यादित्यतआह सर्वेति ननुतर्ह्येकजीववादाभिमतोजीवःस्यात् ॥

रा॰गी॰ टी॰ ११

एकजीववादिनस्तु प्रपंचस्य कार्यान्यथानुपपत्त्या कल्प्यमानाविद्यालाघवादेकैव कल्प्यते तेन यावत्तदु
पाधिको जीवोऽप्येक एव न चैवं नैयायिकाभिमतयोगिकायव्यूह इव सर्वानुसन्धानप्रसंगः एकत्वमुक्तौ
संसाराभावप्रसंगश्च स्यादिति वाच्यम् अविद्यावच्छिन्नस्य तथानुसन्धानेऽपि तस्य देहावच्छेदेन तदभा
वात् अत एव देहावच्छिन्नस्य पादे स्वं शिरसि मे वेदनेत्यनुभवेऽपि पादावच्छिन्नः शिरोवच्छिन्नस्य दुः
खं नानुसंधत्ते अन्यथा विरुद्धत्वादननुभव एव प्रसज्येत एवं सर्वमुक्तिरन्यच्च सर्वं सर्वेष्टसाधकत्वमत्र दृ
ष्टान्तेन सम्यक्समाधेयमित्याह्नवित्यत आह अधीशोऽसीति अधिष्ठानत्वेन मायातत्कार्यजातनिया
मकत्वादित्युक्तं प्राक् ननु मम ब्रह्मत्वे मनुष्यशरीरत्वं न संभवेदित्यत आह निराकृतिः स्वयमिति मा
यया तथा प्रतीतावपि स्वतो निराकारत्वात् तथा चोक्तं सीतया हनुमन्तं प्रति रामं हृदये रामं विद्धि परं ब्र
ह्म सच्चिदानंदमहमद्वयं मां विद्धि मूलप्रकृतिं सर्गस्थित्यन्तकारिणीम् १ तस्य सन्निधिमात्रेण सृ
जामीदमतन्द्रिता तत्सान्निध्यान्मया सृष्टं तस्मिन्नारोप्यतेऽबुधैः २ अयोध्यानगरे जन्म रघुवंशेऽति
निर्मल इत्यादि कथमेतादृशनिर्विशेषस्योपलब्धिरित्यत आह ज्ञानदृशामिति ज्ञानमुपनिषत्पर्या ११
लोचनाजन्यं तदेकनेत्रं प्रत्यक्त्वसाधनं येषां तेषां प्रतीयसे प्रत्यक्षो भवसीत्यर्थः नह्युपायसौलभ्येन सर्वप्र

त्यक्तः स्यामित्यत आह अथापीत्यादि अथापीति किंत्वर्थे तेन त्वत्पदाम्बुजे प्राह्वितो निवेशितः संगश्चास।
क्तिर्यैस्तेन त्वद्भक्ता इत्यर्थः तत्सहिताः संगिनस्त्वसत्त्रिहितत्वाद्भक्तानामेव संगिनस्तेषां भक्तानुयायिनां
ज्ञानेन प्रत्यहो भवसिनान्येषामित्यर्थः जन्मान्तरीयभक्त्याविशुद्धसत्वस्य त्वत्साक्षात्कारेऽप्यनस्य·
भक्तिहीनस्य तदभाव इति भावः ५ श्रुत्वाथ सौमित्रिवचोऽखिलं तदा प्राह प्रपन्नार्तिहरः प्रसन्नधीः
विज्ञानमज्ञानतमोपशांतये श्रुतिप्रपन्नं क्षितिपालभूषणम् ६ ॥ सौमित्रिवचः श्रुत्वा श्रीरामो·
विज्ञानं प्राहेत्यन्वयः अतिशायितमज्ञानमज्ञानतमं सर्वाज्ञानमूलभूतत्वेनात्माज्ञानस्यातिशयः
तस्योपशांतये निवृत्तये अज्ञानं तम इव स्वरूपावरकत्वादित्युपमितसमासो वा अस्मिंस्तु पक्षे पोप अ४
सर्गपूर्वकत्वं सन्ध्येरार्षत्वं वाभ्युपगन्तव्यम् विज्ञानस्य प्रामाण्यमाह श्रुतिप्रपन्नं वेदप्रणीतं ननु
शौर्यादिकर्मणां क्षत्रियाणामस्माकं कथं विज्ञानार्थं प्रवृत्तिरित्यत आह क्षितिपालभूषणं भूपैर्भू-
षणवदादरेण ध्रियमाणत्वात् भूषणस्य शोभाधायकत्ववद्विज्ञानस्यापि महाशौर्यौदार्यादिवद्गु-
णतामाधायकत्वादपीति भावः ६ श्रीरामस्तत्र प्रेक्षावत्प्रवृत्त्यर्थं विज्ञानस्याधिकार्यादींस्तावदाह
आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः समाप्य तत्पूर्वमुपात्तसाधनः स·

माश्रयेत्सद्गुरुमात्मलब्धये ७॥ आत्मलब्धये श्रवणादिनात्मविज्ञानाय सद्गुरुं समाश्रयेत् तद्विज्ञा-
रा.गी. टी. १२ नार्थं सद्गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति श्रुतेः सच्छब्दस्तैरोत्कृष्टपरत्वेन श्रुत्युक्त
विशेषणद्वयवैशिष्ट्यं द्योतयति श्रोत्रियात्प्रश्नोद्धारेऽपि ज्ञानेन संप्राप्तं ब्रह्मनिष्ठा भवति न वेत्यादि संभा-
वनान निवर्त्तते केवलब्रह्मनिष्ठात्तु तज्ज्ञानेनासंभावनानिवृत्तावपि समस्तप्रश्नोद्धारो न जायते न चा-
१२ त्र विप्रतिपत्तव्यम् विशुद्धान्तःकरणस्य स्वल्पोपदेशेन जातसाक्षात्कारस्य आत्मानं विन्दते यस्तु स-
र्वभूतगुहाशयम् श्लोकेन यदि वाऽर्द्धेन क्षीणं तस्य प्रयोजनमिति महाभारतोक्तकृतकृत्यत्वस्यापि
त्वन्तस्यैतन्मतेऽमनीयमतदूषितान्तःकरणपुरुषकृतप्रश्नोद्धारे पाटवाभावस्य संभावितत्वात् अ-
ए५ न्यथा श्रोत्रियमिति विशेषणवैयर्थ्यापत्तेश्च तत्राधिकारिणमाह आदौ समासादितशुद्धमानसः उपा-
त्तसाधन इति विशेषणद्वयेन समासादितं सम्पादितं शुद्धं मानसं येन स तथा मनसः शुद्धिस्तु रा-
गादिमलाभावरूपा ब्रह्मसाक्षात्कारानुकूलः संस्कारविशेषो वेत्यग्रे प्राक् तस्याजनकमाह ॥
स्ववर्णेति काम्यनिषिद्धवर्जनपुरस्सरमिति शेषः तथा च काम्यनिषिद्धामिश्रितस्ववर्णाश्रमविहितक- २
र्मकृत्वातेर्भगवन्तमाराध्येत्यर्थः उपात्तानि साधनानि इहामुत्रार्थफलभोगविरागादीनि पूर्वोक्तानि
लि५

२ = रागादिमलाभावरूपशुद्धिजनकं निष्कामसत्कर्म तदेव शुद्धिपरिणामवैराग्यादिसाधनजनकम् ॥

विषयेषु १

येनसतथा तत्रशुद्धान्तःकरणस्यचित्तमालिन्यहेतुदोषदृष्ट्यादिनाजायमानानामेषांसाधना
नामप्यन्तःकरणशुद्धिपरिणामविशेषरूपत्वात्तदीयमेवजनकम् यथाहुः स्ववर्णाश्रमधर्मेण
तपसाहरितोषणात् साधनंप्रभवेत्पुंसांवैराग्यादिचतुष्टयमिति तथाचश्रुतिः तमेतमात्मानं
वेदानुवचनेनब्राह्मणाविविदिषन्तियज्ञेनदानेनतपसानाशकेनेति धर्मेणपापमपनुदतीति
ज्ञानमुत्पद्यतेपुंसांक्षयात्पापस्यकर्मणइतिस्मृतिः कषायेकर्मभिःपक्वेततोज्ञानंप्रवर्ततइतिच
किंकृत्वापूर्वंपूर्वोक्तंतत्क्रियाजातंसमाप्यसंन्यस्य ततऋणानित्रीण्यपाकृत्यमनोमोक्षेनिवेशयेदि
त्युक्तत्वादृष्यादिऋणापनयनपर्यन्तमनुष्ठायेत्यर्थः यदहरेवविरजेत्तदहरेवप्रव्रजेदितिस्वनि संन्यास=
मित्तवैराग्यसमकालमेवसंन्यासविधानात् तद्वाक्यस्यवैराग्यशून्यविषयत्वात् संसारमेवनिः
सारंदृष्ट्वासारदिदृक्षया प्रव्रजन्त्यकृतोद्वाहाःपरंवैराग्यमाश्रिताइतिविविदिषासंन्यासपरवाक्य
विरोधाच्च तच्चवैराग्यंत्रिविधम् मन्दंतीव्रंतीव्रतरंचेति तत्रपुत्रदारादिविनाशेधिक्संसारमिति
बुद्ध्यातात्कालिकीविषयजिहासामन्दवैराग्यम् नतत्रशोकात्मकेसंन्यासाधिकारः यदामनसि
वैराग्यंजायतेसर्ववस्तुषु तदैवसन्न्यसेद्विद्वानन्यथापतितोभवेदितिस्मरणात् अस्मिञ्जन्मनि।

पुत्रदारादयो मा भूवन्निति स्थिरबुद्ध्या विषयजिहासा तीव्रं वैराग्यम् तत्र पात्रादित्यागाशक्तौ कुटी।
चकसंन्यासाधिकारः तच्छक्तौ तु बहूदकसंन्यासाधिकारः पुनरावृत्तिसहितो लोको मे मास्तु
कश्चनेति स्थिरबुद्ध्या विषयजिहासा तीव्रतरं वैराग्यम् तत्र ब्रह्मलोपासनया सत्यलोकजिगमिषायां
हंससंन्यासाधिकारः ततोऽपि न पुनरावृत्तिः ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यान्ते कृता ब्रह्मणः=
त्मानः प्रविशन्ति परं पदमिति स्मरणात् मुक्तिमात्रेच्छायां तु परमहंससंन्यासाधिकारः स च परम
हंससंन्यासो द्विविधः विविदिषासंन्यासो विद्वत्संन्यासश्चेति समाप्यतत्सर्वमित्यत्र प्रकृते तदि
ह जन्मनि जन्मान्तरे वा सम्यगनुष्ठितैर्वेदानुवचनादिभिरुत्पन्नया विविदिषया क्रियमा।
णत्वादयं विविदिषासंन्यास एव स च वेदनहेतुश्रवणादौ विक्षेपनिवृत्तये क्रियमाणो द्विविधः
प्रैषोच्चारणपूर्वकदंडधारणाद्याश्रमरूपो जन्मान्तरापादककाम्यकर्मादित्यागमात्रात्मकश्च
तत्राश्रमरूपाः सर्वे संन्यासाः पाराशरादौ स्मृतौ प्रसिद्धाः त्यागस्तु तैत्तिरीयादौ श्रूयते न कर्म १३
णा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरिति अत्र च स्त्रीशूद्रयोरप्यधिकारः तथा च मैत्रे
यीवाक्यम् येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीति ब्रह्मचारिशूद

स्यवानप्रस्थानां केनचिन्निमित्तेन संन्यासाश्रमस्वीकारे प्रतिबद्धे स्वाश्रमधर्मेष्वनुष्ठीयमानेष्वपि वेद
नार्थी मानसोऽखिलकर्मादित्यागो न विरुध्यते यत्नसाधनचतुष्टयसंपन्नस्यैव वेदान्तश्रवणादौ ।
संन्यासपूर्वकोऽधिकारो न गृहस्थादेरित्याहुस्तदसत् यत्किंचित्साधनसंपन्नानां श्रुतिस्मृतीतिहास-
पुराणोक्तानां याज्ञवल्क्यजनकादीनां लोके च तादृशानां तत्त्वविदां बहूनामुपलम्भात् अत एव ब्रह्म
विज्ञानलाभाय परमहंससमाह्वयः शान्तिदान्त्यादिभिः सर्वैः साधनैः सहितो भवेदिति स्मृतौ साध
रामगीतायाम्
नानां संन्यासिसंपादनीयत्वमपि प्रोच्यते अत्रापि च समाप्यतत्सर्वमित्यनन्तरमेवोपात्तसाधन इति प
ठ्यते क्षितिपालभूषणमिति विज्ञानविशेषणं च ततश्च विशुद्धान्तःकरणस्य यत्किंचित्साधनसंप
न्नस्यापि वैराग्योदयमात्रेण नष्टविषयेच्छुद्धेर्मुमुक्षोः श्रवणाद्यधिकार इति सिद्धम् ७ इदानीम
ज्ञानस्य हेयत्वप्रदर्शनाय तत्कार्यसंसारभ्रममाह ॥ क्रियाशरीरोद्भवहेतुरादृता प्रियाप्रियौ तौ भ
वतः सुरागिणः धर्मेतरौ तत्र पुनः शरीरकं पुनः क्रियाचक्रवदीर्यते भवः ८॥ सुरागिणः पुरु
षस्य यौ प्रियाप्रियौ तौ क्रियाक्रियाप्रवर्तकौ भवत इति तच्छब्दमहिम्ना यच्छब्दाध्याहारेणान्वयः रा
गस्तु पतञ्जलिना सुखानुशयी राग इति सूत्रेण सुखमनुशेते सुखज्ञस्य सुखानुस्मृतिपूर्वकं तत्सा

रा॰गी॰ टी॰ १८

धनेषुतृष्णारूपेणहृदिवर्त्ततेयःसरागइत्यर्थकेनप्रदर्शितः सचस्वसुखसमर्थःनतुनतत्तानेनोच्छिन्न।
मूलःसोस्यास्तीतिरागीतस्यप्रियःसुखसाधनत्वेनाभिमतोपेक्षःशरीरादिः तद्विघातकश्चशत्रु-
सर्पादिरप्रियःतद्विघातेरागस्यैवद्वेषरूपेणपरिणतत्वात् द्वेषोगृह्यते अतएवकृष्णगीतायाम्
कामएषक्रोधएषरजोगुणसमुद्भवः महाशनोमहापाप्माविद्ध्येनमिहवैरिणमितिकामक्रोध
योरभेदउक्तः अत्रापुर्हेतुमितिवक्रियाशब्दस्तद्धेतौलाक्षणिकः उपेक्षास्यतुनस्यानन्त्येणक्रिया
हेतुत्वम् क्रियायाअनर्थहेतुत्वमाह शरीरोद्भवहेतुःजन्मप्रदायिनीत्यर्थः ननुतत्त्वज्ञस्यैवाज्ञस्या
पिक्रियाजन्महेतुर्नस्यादित्यतआह आहृताइति अहंकारोमीत्यभिमतात्तत्त्वज्ञस्यतुतथाभिमाना
भावाज्जन्महेतुर्नभवतीतिभावः ननुकृतप्रध्वस्तायाःक्रियायाःकथंजन्महेतुत्वमित्यतआह धर्मे
तरौतत्रेति तत्रक्रियायामाहृतायांधर्माधर्मौभवतःतौचविहिताविहितकर्मानुष्ठानजन्यावदृष्टा
दिशब्दाभिधेयौफलोदयपर्यन्तस्थायिनौसंस्कारविशेषरूपावितिनविरोधःतत्रेत्यनुवर्त्तते तत्रध
र्मधर्मसत्त्वेपुनःशरीरकम् शरीरस्यानेकानर्थजन्मभूमित्वेनकुत्सायांकन् तत्रशरीरेपुनःक्रिया-
भवतिप्रारब्धरूपायाअपिक्रियायाःस्वरागिणोभिमानवशेनादृष्टहेतुत्वात्क्रियमाणकर्मत्वम् त

१८

त्रैवंस्वरागिणोजन्मक्रियापरंपरावश्यंभावेसतिभावःसंसारःचक्रवत् ईर्यतेप्रेर्यतेघटनिर्माणप्र·
वृत्तस्यकुलालस्यचक्रंयथाभ्रमत्येवनतथासंसारोनविरमतइत्यर्थः यद्वास्वरागिणःशरीरोद्भव·
हेतुःप्रारब्धापन्नायाक्रियासाआहतासतीतौप्रसिद्धौप्रियाप्रियौभवतःशुभाशुभहेतुर्भवतीत्य
र्थः शरीरोद्भवोहेतुर्यस्याइतिविग्रहः अस्मिन्पक्षेप्रियाप्रिययोस्तद्धेतौलक्षणाकथंशुभाशुभ शुभाशुभ =
हेतुत्वमित्यतआह धर्मेतरौतत्रेति ग्रन्थस्सर्वंपूर्ववत् ८ अज्ञानमेवास्यहिमूलकारणंतद्धानमे
वात्रविधौविधीयते विद्यैवतन्नाशविधौपटीयसीनकर्मतज्जंसविरोधमीरितम् ९॥ हियस्मा
त् अस्यसर्वानर्थरूपसंसारस्यमूलकारणमज्ञानमेवमायैवनान्यत् तस्मादत्रास्मिन्प्रस्तुतेविधौ
पुरुषार्थमुद्दिश्यविधायकेवेदेतज्ज्ञानमेवाज्ञाननाशोपायएवविधीयतेनान्यत् तन्नाशस्यैवान ग५
र्थलेशासंविद्धमोक्षरूपपरमपुरुषार्थसाधनत्वादितिभावः कारणंतु अनन्यथासिद्धनियतपू
र्ववृत्तितद्विविधम् निमित्तमुपादानञ्चतत्रकार्यानुकूलव्यापारवन्निमित्तकारणंकुलालादिः
कार्यान्वितंतूपादानकारणम् तच्चविवर्तस्यपरिणामस्यचेद्विविधम् आद्यंसर्पादेरज्ज्वादिः द्वि
तीयंतुवस्तुतोऽन्यथाभावेदध्यादेर्दुग्धादिः ब्रह्मतुस्वमाययायथानतथाविवर्तमानमुपादानंसाक्षित·

ग.
गी॰टी॰
१५

15

यामायाविविक्तं तन्नत्परिणामप्रपञ्चोत्पत्तौ लोहचलने अयस्कान्तवन्निमित्तमपीति ज्ञेयम् प्रकृतेव
मायापरिणामो जगदिति मायोपादानकारणमेव शाखादिकं प्रति स्कन्धस्येव घटादिकं प्रति मृदा
देःकारणत्वेपि मूलस्य सर्वहेतुत्वं प्रतीव निखिलप्रपंचं प्रति मायायाः कारणत्वादित्याह मूलेति मू
लोच्छेदं विना कश्चित्तरोहन्ति पुनः पुनः यथा लतास्तथा विश्वमज्ञानप्रशमं विना अत एव शर्मिश
तसहस्रं तु तिष्ठन्त्यव्यक्तचिन्तकाः दशमन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः १ भौतिकास्तु श
तं पूर्णं सहस्रं त्वाभिमानिकाः बौद्धा दशसहस्राणि तिष्ठन्ति विगतज्वराः पुरुषं निर्गुणं प्राप्य का
लसंख्यानविद्यत इति पुराणे अव्यक्तादीन् पुरुषबुद्ध्योपासितवतां पुनर्जन्माभिधाय पुरुषं नि
र्गुणमित्यादिना पुरुषसाक्षात्कारेण मूलाज्ञाने निवर्तितवतः पुनर्जन्माभावः प्रतिपादितः न
नु संघातादिवादिमतेषु सत्सु कथं मायामयत्वं जगतः यथा संघातवादो लोकायतिकानां नास्ति
कानाम् अनादौ क्षणिके लोके नेश्वरादिरपेक्ष्यते प्रत्यक्षसंघातभेदशक्तिभिः सर्वसिद्धितः १ य
थो यथा नां संघाते मादो रागो रसायनम् तथैवम्भूतसंघाते चैतन्यं क्षणान्यजीवता २ यथाचारम्भवा
दस्तार्किकाणां मीमांसकानां च आत्माकाशाणुरत्नवतः कारणं स्वमिष्यते कुलालादिवदणुत १५

घटवज्जन्मनाशभाक् १ पृथिव्यम्भोग्निवायूनां कर्मसंयोजिताणवः द्व्यणुकादिक्रमेणेदमारभ-
न्त इदं महत् २ यथा च परिणामवादः सांख्यपातञ्जलपाशुपतानां गुणसाम्यं प्रधानं स्याद्गुणाः
सत्वं रजस्तमः सुखदुःखमोहरूपं दृश्यते हि स्फुटं जगत् प्रधानं स्यान्महान्सो हंकारो सौ षोडशा-
त्मना जायते पंच तन्मात्राण्यक्षाण्येकादशापि यत् तन्मात्राणि च भूतानि जायंते तेन च संख्यया पंचभूतपरिणामवन्ति =
चतुर्विंशतिरेतानि तत्रात्मा पंचविंशकः सदेव कार्यमुत्पन्नेः सर्वं कारणरूपकम् आविर्भावति-
च॰ रोभावौ जन्मनाशावुदीरितौ ४ यथा जीवोत्पत्तिवादः पञ्चरात्राणाम् ब्रह्मणो वासुदेवाख्याज्जी-
वः संकर्षणाभिधः जायते च मनस्तस्मात्प्रद्युम्नाख्यं ततः अहंकारो ऽनिरुद्धाख्यश्चत्वारो विश्वरू- पुनः
पकाः वासुदेवाद्यनाद्यैर्जायते वंधमोक्षणम् यथा च क्षणिकविज्ञानातिरिक्ताभाववादो बौ-
द्धानाम् विज्ञानं बुद्धिरिति नार्थान्तरं यदन्तर्ज्ञेयतत्वं तद्बहिर्वदवभासते स्वप्नवज्जागरे स्वप्नाभावः
स्फुटएव हि १ यथा च बाह्यास्तित्ववादो बौद्धैकदेशिनाम् समुदायो ऽणुसंभूतो बाह्यो भूम्यापगादि-
कः आन्तरः स्कन्धजश्चित्तचैत्यरूपश्च तौ जगत् १ मृदम्बुवह्निवायूनां खरस्निग्धोष्णचञ्चलाः च-
तुर्धा त्वाणवः पञ्चस्कन्धा रूपादिभेदतः २ रूपं शब्दादयस्तेषां व्यक्तिर्विज्ञानमुच्यते वेदना सुखदुः-

यथान्तरः स्वप्नो बहिर्वदवभासते तथा जागरेप्यन्तर्ज्ञेयं बहिर्वदवभासते ४ =

रा.गी
टी.
१९

स्येस्तंसंज्ञादिस्यादिनामयत् संस्कारोवासनाचैवपञ्चकंसंघद्वयात्मकम् जगत्क्षणत्वतःसिद्धंकिमन्यप।
विकल्पनैः २ यथावसप्तपदार्थवादआर्हतानां जीवाजीवात्मकंविश्वंचेतनःस्वशरीरवत् परिणामाव
यववानजीवःषड्विधःस्मृतः १ मद्दीयत्वादिरेकःस्यात्पञ्चधावास्रवादिकः आस्रवःसंवरोनिर्जरोब।
न्धोमोक्षएवच २ इन्द्रियाक्षोविवेकादिकेशोलुञ्चादिभिस्तपः जन्मान्तर्ईगतिश्चेतिपंचानामर्थउ·
च्यते स्यादस्तीत्यादिनासप्तभंगीवाक्येनवादिनः सर्वमेवक्रमशोपास्यस्वमतंसाधयेत्सुधीः ४ सत्वास·
त्वोभयावाच्यवादिनःस्युश्चतुर्विधाः द्विधाघाव्यावाच्यतोक्त्यावादिनःसप्तकीर्त्तिताः ५ इतिचेन्नैवम्
तेषांवादानांप्रमाणानपेक्षत्वाग्रहमात्रमूलत्वाद्दृष्टप्रमाणवाधितत्वाच्चतथाहि तावत्संघातवादोन
युक्तिसहः घटोपलब्धिवत्संघोपलब्धिर्भिद्यतेस्फुटम् सोजीवोममदेहोयमितिभेदानुभूतितः
योगिनश्चाथभूतादेर्देहान्तरगतिःस्फुटम् २ आत्माभावेकृतध्वंसोप्यकृताभ्यागमस्तथा क्षणिका·
त्वेकार्यजन्मसहकार्यप्रतीक्षणः सहकारिप्रतीक्षायांक्षणिकत्वंपराहतम् ईशानुमानेनतुपुष्पद·
न्तःसमर्थयामास अजन्मानोलोकाःकिमवयववन्तोपिजगतामधिष्ठातारंकिंभवविधिरनादृत्य १९
भवति अनीशोवाकुर्याद्भुवनजननेकःपरिकरोयतोमन्दास्त्वांप्रत्यमरवरसंशेरतइमेइति यतोवा

16

इमानिभूतानिजायन्तेयेनजातानिजीवन्तियत्प्रयन्त्यभिसंविशन्तितद्ब्रह्मेत्यादि श्रुतयस्तस्तत्रमे
वप्रमाणम् आरम्भवादोपिनयुक्तिसहः यथा अणुसंयोगकंकर्मनिर्निमित्तंयदाभवेत् प्रलय
स्तर्हिनभवेत्सनिमित्तंकथंवद १ शरीराभावतस्तत्रप्रयत्नादेरसंभवात् नित्यत्वादीशयत्नोपिका
दाचित्केर्हितोनहि जीवात्मसमवेतत्वाददृष्टेनाणुषुक्वचित् सामानाधिकरण्येनविनानोहे
तुतोचिता अव्याप्यवृत्तिःसंयोगोनोचितोवयवोज्झिते किंचाप्युपचयाभावात्कार्योत्पत्तिर्नयुज्य
ए४ ते एवमादिविचारेणदृष्टान्तपरिकल्पना ३ ऊर्णनाभवत्तटस्थश्चेदीश्वरस्तर्हितत्समः शरीरोपस्क
राकांक्षीविषमोनिर्घृणस्तथा ४ ईशोवेदःप्रमाणंचेत्राम्यातर्हितटस्थता यतःस्फुटंनिरावाधंमा
यित्वंनतत्रवर्ण्यते ५ अखंडसच्चिदानन्दोजगद्रूपेणभासते मायायादुर्घटंनास्तिकिंचित्तद्रूपणा
द्विसा ६ परमाण्वादिकल्पनाविरोधिन्यस्तश्रुतयः एकोहंबहुस्यांप्रजायेयेति एतस्मादात्मनः
आकाशःसम्भूतआकाशाद्वायुर्वायोरग्निरग्नेरापअद्भ्यःपृथिवीति मायांतुप्रकृतिंविद्यान्मायि
नंतुमहेश्वरमिति इंद्रोमायाभिःपुरुरूपईयते इत्येवमाद्याअसंख्याताएव एवंस्थितीतिद्वासपुरा
णवाक्यान्यपि परिणामवादोपिनयुक्तिसहः यथा विचित्रजगतोहेतुर्नप्रधानमचेतनम् चेत

शां·गी
टी
१७

17

नोपिहितिसंसंगोनसहायत्वमर्हति १ गुणकार्यसत्वादीनामान्तरत्वस्यनिश्चयात् घटादावन्वयोना
स्तिकथमव्यक्तकार्यता २ किंचाऽपरिणतेतस्मिन्कार्योत्पत्तिर्नयुज्यते परिणामेतस्यनाशःकार्य
स्यापिनिराश्रयात् नचनत्राजामेकांलोहितशुक्लकृष्णामित्यादिश्रुतिःप्रमाणम् तस्यायदग्ने·
रोहितंरूपंतेजसस्तद्रूपंयच्छुक्लंतदपांयत्कृष्णंतदन्नस्येतिच्छांदोग्योक्ततेजोबन्नात्मकप्रकृति·
परत्वेनमायापरत्वेनापिसूरिभिर्व्याख्याततत्वात् एवमन्यान्स्वयंसमाधेयम् जीवोत्पत्तिवादोपि
नयुक्तिसहः यथा जागरेबाध्यतेस्वप्नोजागरोनैवबाध्यते नचनह्याधिकाभावाद्धात्वमस्यपल
ब्धितः १ वह्निर्वदतिनेत्युक्तिर्वाच्यमर्थंप्रसाधयेत् एवंनयुज्यतेबुद्धेर्जगदाकारतानवोस्थिरचेत·
नराहित्यात्स्वयंचक्षणिकत्वतः स्मृत्यादिव्यवहारस्यलोपश्चतवदारुणः बाह्यास्तित्ववादोपिनयु
क्तिसहः यथा स्थिरचेतनराहित्यात्स्वयंवाचेतनत्वतः नस्कंधानामणूनांवासमुदायोत्रयुज्यते १
सप्तपदार्थीवादश्चनयुक्तिसहः यथा एकस्मिन्सदसत्वादिविरुद्धप्रतिपादनात् अपन्यायःसप्त
भंगीनचजीवस्यांशता १ अस्यार्थःस्यादऽस्तिस्यान्नास्ति २ स्याददस्तिचनास्तिच ३ स्यादऽवक्तव्यः ४
स्यादस्तिचावक्तव्यः ५ स्यान्नास्तिचावक्तव्यः ६ स्यादस्तिचनास्तिचावक्तव्यश्चेतिसप्तभंगीवाक्य·

त्तिश्चनयुक्तिसहः
यथा जीवोत्पत्तिर्नयु
क्तेयंजीवस्यानादिता
श्रुता विनाशेकृतना
शः स्यादकृताभ्याग
मस्तथा १ वि

नितेश्च स्याच्छब्द ईषदर्थवाची निपातः तदग्रे च सर्वपदस्थाकोक्तानां सदाद्यसदाद्युभयवाद्यनि
र्वचनीयवादिसदनिर्वचनीयवाद्यसदनिर्वचनीयवाद्युभयानिर्वचनीयवादिनां मतानि क्रमेणा
भिहितानि ते च वादिनः समागत्यार्हन्तं प्रति किं त्वन्मते मोक्षोऽस्तीत्यादि स्वस्वमतं पृच्छन्ति तत्रा
र्हन् तान् प्रति प्रत्येकं क्रमेण तान्येव वाक्यानि ईषत्तन्मताभ्युपगमार्थकानि पृथक्पृथगेवोत्तरत्वे
न ब्रूते तावता सर्वे वादिनो निर्विषण्णाः सन्तो नोत्तरं प्रतिपद्यन्ते एवंविधस्तेषां सप्तभङ्गीरूपोऽयं ।
न्यायोपन्याय एव अपकृष्टो न्यायो न्यायाभास एवेत्यर्थः कुत इत्यत आह एकस्मिन्निति एकस्य जी
वपदार्थस्य सदादित्वं प्रति सद्रूपत्वमसदादित्वं प्रत्यसद्रूपत्वं चेत्येवमादिविरुद्धधर्मप्रतिपादक
त्वात् न च जीवस्य सावयवत्वं युज्यते शरीरादिवदनित्यत्वप्रसंगात् तदनित्यत्वे मोक्षः कस्य पुरु
षार्थः स्यात् तस्मान्न्यायाभासेन सप्तभंग्याख्येन जीवादिपदार्थानां न सिद्धिरिति ततश्च पारि ।
शेष्यात् सर्वोक्तेश्श्रुत्यादिभिश्च जगतो मायामयत्वसिद्धिः तदुक्तं ततो निर्वेशश्चानन्दे विवर्तो जगदि
ष्यताम् अवस्थान्तरभानं तु विवर्तो रज्जुसर्पवत् १ मायाशक्तिः कल्पिका स्यादिन्द्रजालिकशक्ति
वत् शक्तिः शक्तात्पृथङ्नास्ति तद्वद्दृष्टेर्न चाभिदा २ प्रतिबन्धस्य दृष्टत्वाच्छक्त्यभावे तु कस्य सः श

अग्निवत्=१ अग्नेः=१

शा.गी.
टी.
१८

क्तेःकार्यानुमेयायाश्चानिर्वाच्यत्वान्मिथ्यात्वइति तदेवंसंसारस्याज्ञानमूलत्वेसिद्धेऽज्ञाननाशोपायःकइ
त्यतआह विद्ययैवेति तन्नाशविधौऽज्ञाननाशविधौपटीयसीसमर्थाविद्ययैवनान्यउपायइत्यर्थः त
थाचवेदेसाधनान्तरनिषेधनपूर्वकंतत्त्वज्ञानंतत्साधनानिविधीयन्ते तमेवविदित्वातिमृत्युमे
तिनान्यःपंथाविद्यतेऽयनायेति तरतिशोकमात्मविदिति आत्मावारेद्रष्टव्यःश्रोतव्योमंतव्योनि
दिध्यासितव्यइत्येवमादौ अत्रआत्मावारेद्रष्टव्यइतिपृथक्वाक्यम् आत्मसाक्षात्कारेणमूला
ज्ञाननिवृत्तिंभावयेदित्यर्थः आत्मसाक्षात्कारःकेनभवतीत्यतआह श्रोतव्यइति श्रवणात्क
थंसाक्षात्कारोजन्यतइत्याह मंतव्यइति मनननिदिध्यासनाभ्यामुपकृतोत्यर्थः श्रवणंतु उ
पक्रमोपसंहारावभ्यासोऽपूर्वताफलं अर्थवादोपपत्तीचलिंगंतात्पर्यनिर्णय इत्युक्तैः षड्भिस्ता
त्पर्यलिंगैर्वेदान्तानामद्वितीयेब्रह्मणितात्पर्यनिश्चयः श्रुतस्यार्थस्योपपत्तिभिश्चिन्तनंमन
नम् विजातीयप्रत्ययतिरस्कारेणचेतसःसजातीयप्रत्ययप्रवाहीकरणंनिदिध्यासनंध्यान
मित्यर्थः तदेवाविक्षिप्तजायमानंसत्समाधिरित्युच्यते ननुतमेवविदित्वेत्यादावाग्नेयोष्टाक १८
पालोभवतीत्यत्रेवस्वरूपबलेनलिङादिशब्दंविनैवविध्यर्थमाक्षिप्यमृत्यादीनांसकार्यवर्मा

18

नि॰ २

ज्ञानोपलक्षकत्वादात्मवेदनेनाज्ञाननिवृत्तिंभावयेदित्यर्थोभवेदपिआत्मावारेद्रष्टव्यइत्यत्रज्ञा
ननिवृत्तिवाचकशब्दाभावादज्ञाननिवृत्तिःकथंभाव्यत्वेनान्वेतीतिचेदुक्तएव पुंसांनेष्टाभ्युपायत्वा
त्क्रियास्वतःप्रवर्त्तिकाः प्रवृत्तिहेतुंधर्मंचप्रवदन्तिप्रवर्त्तनामितितत्रप्रत्ययार्थप्रवर्त्तकविधेरेव
भाव्येष्टसामान्यापेक्षकत्वात् इष्टविशेषस्यात्मानंज्ञात्वा अविद्याऽस्मितारागद्वेषाऽभिनिवेशा
ख्यैःक्लेशरूपैःपंचभिःपाशैर्मुच्यतेइत्यर्थकात् ज्ञात्वादेवं मुच्यतेसर्वपाशैरितिश्रुत्यंतरादभ्यु
पगन्तव्यः नचमुमुक्षोःकैवल्यमेवेष्टमितितदेवभाव्यत्वेनान्वेतुमर्हतीतिवाच्यम् तस्यवास्त
वत्वेनाजन्यत्वात् अहंब्रह्मास्मिनेहनानास्तिकिंचनेत्यादिश्रुत्यर्थानुसन्धानेनाज्ञानभ्रमनिवृत्तौ
ब्रह्मविद्ब्रह्मैवभवतीत्यादावनूद्यमानत्वात् एवंचमोक्षस्यजन्यत्वेविनाशःस्यात् स्वतःसिद्धत्वे
तुशास्त्रानर्थक्यंसदानुभवश्चस्यादितिशंकापिनोदेति अज्ञानस्यैवकैवल्यानुभवविरोधित्वात्
अज्ञाननिवृत्तेस्तुजन्यत्वेपिनविनाशःतस्याअभावरूपत्वात् जन्यत्वस्यभावविनाशानुमितावेव
लिंगत्वात् अन्येतुज्ञानेनाज्ञाननिवृत्तेर्दृष्टत्वान्नापूर्वविधिः अप्राप्तविधायकोह्यपूर्वविधिः वि
धिरत्यन्तमप्राप्तेनियमःपाक्षिकेसति तत्रचान्यत्रचप्राप्तेपरिसंख्येतिगीयतइत्युक्तत्वात् अज्ञान।

रा॰गी॰
टी॰
११

निष्ठत्वेनैव साधनान्तराभावेन ज्ञानस्य पाक्षिकप्राप्तियुगपदुभयोरसंभवात् नियमविधिः परिसंख्या
विधिर्वापि न शङ्कनीय एवं तत्रश्चनीतिशास्त्रवद्दृष्टफलत्वाद्धि ज्ञानरूपस्य ब्रह्मणः स्वतःसिद्धत्वेना
नुष्ठानाप्रतिपादकत्वाच्च नायं विधिः किमर्हार्थ एव प्रत्ययः विधौ विधीयत इत्युक्तिस्तु सा तात्पर्यं
परतया वा वेदोक्तसर्वविधिफलत्वेनोपपद्यत इत्याहुः ननु वेदेन ज्ञानमेव विधीयत इत्युक्तम् ततश्च
19 नित्यादिकर्मापि वेदोक्तत्वादज्ञाननिवर्तकं स्यादित्यत आह नकर्मेति तद्यतस्तज्जन्मप्रज्ञाननम् आ
त्माज्ञानकृतदेहाद्यध्यासेन जायमानत्वात् ननु सात्विकपरिणामभूतया विद्ययाऽइव कर्मणो
ऽज्ञाननिवर्तकत्वमस्त्वित्यत आह सविरोधमिति निष्ठत्वहेतेनावदज्ञानं विर्तकत्वशंकापि किंतु वि ति
रोधकरजःकार्यं कर्मदेहाद्यध्यासकृतन कर्तृत्वाद्यनुसन्धानेनाज्ञानं दृढयत्यतस्तन्न तन्निवर्तकविद्या
ध्यासे सविरोधमीरितं प्रतिपक्ष्यिकथितमितिभावः ननु वेदोक्तकर्मणोऽज्ञाननिवर्तकत्वाभावेन
ज्ञानमेवेत्युक्तमनसंगछेतेतिचेन्न तत्र विद्यासाधनसत्त्वशुद्ध्यादिजनकत्वेन कर्मणोऽपि परंपरयाऽ ११
ज्ञाननिवर्तकत्वांगीकारात् न च तत्र स्वतंत्रस्वर्गादिफलश्रवणान्नैवमिति वाच्यम् बालकस्य कटुकौ
षधपानप्रवृत्त्यर्थं खंडलड्डुकप्रदानवत्फलानां श्रेयस्करकर्मप्ररोचनार्थत्वात् एवमेव मेव वशेना

दियागौतमादिमुनिप्रणीतन्यायादिशास्त्राणामपि नास्तिकनिवारणादिप्रयोजनानि सन्त्यम्
त्यानि किमन्यद्वात्स्यायनमुनिप्रणीतकामशास्त्रस्यापि शास्त्रोद्दीपितमार्गेणापि विषयभोगे दुः
खमात्रपर्यवसानं भवतीति विषयवैराग्यं स्फुटमेव प्रयोजनं तेषां सर्वज्ञत्वात् किं तु न हि विष
येष्वेव प्रवणानामापाततोऽपि परमपुरुषार्थप्रवणता संभवतीति तेषां कथंचित्तस्यान्निथ्यं
स्यादिति तेषां मुनीनां तात्पर्यम् तद्वद्बुद्धावेदविरुद्धेऽपि सद्वैतवादार्थे तेषां तात्पर्यमुत्प्रेक्ष्यम्
एवीत्स्तन्मतमेवोपादेयत्वेन गृह्णान्ति न विद्वांस इति तन्देवं कर्मादीनामपि सत्त्वशुद्धिनास्तिकनि
वृत्त्यादिद्वारा वहिर्मुखानां परमपुरुषार्थाभिमुख्योपादनेन परंपरयाऽज्ञाननाश एव परं प्रयोज
नमिति सिद्धम् ॥ ९ ॥ नाज्ञानहानेन वैराग्यसंक्षयो भवेन्नतः कर्मसदोषमुद्भवेत् ततः पुनः संसृ
तिरप्यवारिता तस्माद्बुधो ज्ञानविचारवान्भवेत् ॥ ९ ॥ तस्मात्कर्मणोऽज्ञाननिवर्तकत्वाभावात्स्वत
स्सदोषत्वेन संसृतिप्रवर्तकत्वाच्च हेतोर्बुधः कर्मदोषाभिज्ञः यद्वा बुधः सत्त्वशुद्धिवैराग्यादिना
त्मविचारसमर्थः पुरुषः ज्ञानविचारवान्भवेत् ज्ञानं सर्वं खल्विदं ब्रह्म नेह नानास्ति किंचनेत्ये
वं रूपं विचारस्तु तदनुकूलयुक्तिविमर्शरूपः तद्वान् तदभ्यासपरो भवेत् ततश्चाज्ञानापनोदनक॰

र्मनिष्ठएवभवेदितिभावः पूर्वहेतुमाह नाज्ञानेति यस्मात्कर्मणाअज्ञानहानेनभवेत् रागसंक्षयश्च।
नभवेत् कर्मणस्तदुभयैकाश्रयकत्वात् ततःकर्मसंदोषंदोषारागद्वेषादयस्तत्सहितमुद्भवेत् उत्प
न्नंभवतीत्यर्थः ततश्चरागादिसहितकर्मोत्पत्तेःपुनःसंसृतिःसंसारोपिअनिवारितानिवर्त्तितइ।
त्यर्थःयतएवंतस्मादित्यादित्वक्तार्थम् एवंचनज्ञानवत्कर्मणोऽज्ञाननिवर्तकत्वमितिभावः ९ ॥
ननुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनं कर्त्तव्यताप्राणभृताप्रचोदिताविद्यास
हायत्वमुपैतिसापुनः ११ ॥ नन्वितिपूर्वपक्षद्योतकः पूर्वपक्षस्तुश्लोकत्रयात्मकः केचिद्वदन्तीति
वदन्त्यग्रेश्लोकेतुतस्यदूषणार्थमितिशब्देनपरामर्शमात्रं ननुयथैववेदमुखेनआत्मावारेद्रष्टव्यइत्या
दौपुरुषार्थसाधनत्वेनविद्याप्रचोदिताविहितातथैवक्रियाप्रचोदितेत्यन्वयः यथाऽहरहःसं।
ध्यामुपासीतयावज्जीवमग्निहोत्रंजुहुयादित्यादिः ननुनिष्कामकर्ममात्रस्यविविदिषासाधनत्वे
पितीव्रतरबुभुक्षावत्पन्नात्यर्थविविदिषस्यतुपुंसोऽनुष्ठीयमानंकर्मज्ञानरागादिदोषपोषणे।
नज्ञानोदयंप्रतिबध्नात्येवेतिकथंपुनस्तत्कैवल्यसाधनमित्यतआह कर्त्तव्यतेति यःसत्वशुद्ध्यर्थं २०
पूर्वंप्राणभृतोदेहिनः कर्त्तव्यताक्रियाप्रचोदिताविहितासापुनःसत्वशुद्ध्याद्यनन्तरमपिविद्यया।

कैवल्येसाध्येसतिविद्यासहायत्वमुपैतिकृष्णादेर्निर्विघ्नफलजननेउपाकृतकर्मवत्त्वात्स्वबले
नविद्यायांकैवल्यस्वरूपजननसामर्थ्यंप्रयच्छतीत्यर्थः तथाचकर्मणःसंन्यासादिसाम्यमुक्तंभ
गवताकृत्स्नेन अनाश्रितःकर्मफलंकार्यंकर्मकरोतियः ससंन्यासीचयोगीचननिरग्निर्नचाक्रि
यइति एवंचकैवल्यपर्यंतेक्रियानुष्ठेया संन्यासस्तुगार्हस्थ्यासमर्थान्यपंग्वादिविषयइति
सिद्धम् अत्रहेतुत्वेनोत्तरपद्यमाह ११ ॥ कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमु
क्षुणा नतुस्वतंत्राध्रुवकार्यकारिणीविद्यानकिंचिन्मनसाप्यपेक्षते १२ ॥ कर्माकृतौकर्मपरि
त्यागेश्रुतिर्वेदोदोषमपिजगौप्रोक्तवान् तथाचवीरहावाएषदेवानांयोऽग्निमुद्वासयतइत्यगृहा
सनलक्षणस्यगार्हस्थ्यपरित्यागस्यदोषःश्रूयते तस्मात्कर्मणःपरित्यागदोषश्रवणात्कैवल्य
सिद्धौसहायत्वाच्चइदंकर्ममुमुक्षुणासदाकार्यंसदैवकर्तव्यमित्यर्थः ननुकेवलविद्ययैवकैव
ल्यसिद्धौकिंकर्मणेत्यतआह नतुस्वतंत्रेति स्वतंत्राकर्मानपेक्षिणीविद्याध्रुवकार्यकारिणी
मोक्षप्रदायिनीनतुनैवभवतीत्यर्थः अपिहेतौयस्मान्मनसाचिंतिमनोयस्यतेननविद्यावतामु द्वि ४
क्षयेकर्मकिंनअपेक्ष्यतेकिंतुअपेक्ष्यमेवेत्यर्थः जनकादिभिर्विद्यावद्भिरप्यनुष्ठितत्वात् कचि

वा॰गी
टी
२१

त्वस्तकेऽपेक्ष नञ्इतिनिर्थकारः कर्तृलकारपाठपक्ष अत्रचविधेयवकर्त्रीविद्यामननसामनंशोधकत्
पेणाश्रुत्येकिञ्चित्कर्मणापेक्षतेनअपेक्षतएवेत्यर्थः द्वितीयनकारस्त्वागामिश्लोकादाकृष्यते
अस्यत्वप्रकृतमेव इदानींफलोपकारत्वेनान्यसहायत्वेप्रयाजादिदृष्टान्तमाह ॥ नसत्यकार्यो।
पिद्वियद्वदध्वरःप्रकाशतेऽन्यानपिकारकादिकान् तथैवविद्याविधितःप्रकाशितैर्विशिष्य॰
तेकर्मभिरेवमश्रुत्ये १३ ॥ यद्वत्यथादिस्फुटम् अध्वरोयज्ञःदर्शपौर्णमासादिःस्वर्गादिफलो
२१
त्पादनायाऽन्यान्स्वरूपातिरिक्तानपिकारकादिकान्प्रयाजादीन्प्रकाशतेस्वशेषत्वेनप्रकाशय
त॰ तिधात्वर्थान्तर्भावितणिजर्थः अपेक्षत इतिभावः तथैवविद्यमश्रुत्येकैवल्यजननार्थविधितःप्र॰
काशितैर्वेदविहितैःकर्मभिरेवशेषभूतैर्विशिष्यतेयुज्यतेनान्यैःश्रवणादिभिस्तेषांदृष्टार्थानां श्रवणादीनां=
विद्यास्वरूपजननेनोपक्षीणत्वात् किंभूतोऽध्वरः नसत्यकार्योपिनसत्यंकार्यंयस्यसनश्वरफ।
लोपीत्यर्थः यदिनश्वरफलेपियागेफलोपकार्यंगापेक्षास्तितर्हिकिमुवक्तव्यंध्रुवफलायां
विद्यायांफलातिशयेयत्नातिशयस्यप्रसिद्धत्वात् पूर्वत्रनकाराश्लेषेण ननुतत्रकटुकौषधप्र २१
रोचनार्थलड्डुकादेरिवयागादिकर्मप्ररोचनार्थस्वर्गादेरपिफलत्वाभावात्कथंफलोपकार्यङ्गा

त्व विधि=

पेक्षायां याग इष्टं तत्रत्यत आह सत्यकार्येपीति अवितथफलः वेदप्रमाणत्वं कारीरीयागादेः प्र
त्यक्षदृष्टादिफलोपलम्भान्निश्चितफल एवेत्यर्थः अत्रायं भावः यागो हि द्विविधमंगजातं
३४ भवति सिद्धरूपं साध्यरूपं च तत्र सिद्धरूपं जातिद्रव्यसंख्यादि साध्यरूपं तु क्रियैव तच्च द्विविधं सं
निपत्योपकारकमाराडुपकारकं च तत्र द्रव्यादिकारकत्वेन विधीयमानं यागस्वरूपान्तर्भूतं कर्म· संस्का=
सन्निपत्योपकारकं व्रीहीनवहन्यात् व्रीहीन्प्रोक्षतीत्येवं विहितावघातप्रोक्षणादि तद्विपरीतं
च फलजननसामर्थ्यजनकत्वादिना यागोन्वितं कर्माराडुपकारकम् तत्र समिधो यजति तनूनपा
तं यजतीत्येवं विहितं प्रयाजादिकं सामर्थ्यजनकतया कारकं कथ्यते बृहस्पतिसवादिकं तु या
गस्य फलजननसामर्थ्यस्थितावुपयुक्तत्वात् स्थापकमित्युच्यते वाजपेयेनेष्ट्वा बृहस्पतिसवेन य
जेतेति वाजपेयान्तरकालं तत्प्रयोगवहिर्भूतत्वेन विहितो बृहस्पतिसवः सामर्थ्यस्थापक एव सा
मर्थ्यस्य वाजपेयेन स्वाराज्यकामो यजेतेत्यत्राकांक्षादिना प्रयोगान्तर्भूताराडुपकारकैः प्रागेव सि
द्धत्वात् एवं विधा आराडुपकारका एव श्लोके कारकादिकशब्देनोच्यन्ते तत्र च यदाग्नेयोष्टाकपा
लो मावास्यायामित्यादिवाक्यविहितावघातप्रोक्षणादि संनिपत्योपकारकैर्लब्धसमग्रस्वरूपो

रा.गी
टी
२२

पिर्दर्शपौर्णमासाभ्यांस्वर्गकामोयजेतेत्यभिहितफलौदर्शपौर्णमासयागौयथातदुपकारकप्र।
याजादिनैरपेक्ष्येणस्वर्गरूपंफलंनजनयति तथाश्रवणादिनालब्धात्मिकापिब्रह्मविद्यैवमभव
तीत्यभिहितफलाविद्याकर्मनैरपेक्ष्येणब्रह्मभावरूपंफलंनजनयतीतिसिद्धम् इदानीनन्वि।
त्यादिश्लोकत्रयोक्तंसर्वंपक्षंदूषयति ॥ केचिद्वदन्तीतिवितर्कवादिनस्तदत्रदुष्टंहिविरोधकारण
त् देहाभिमानादभिवर्ततेक्रियाविद्यागताहंकृतितःप्रसिद्ध्यति ४९ ॥ केचिद्वितर्कवादिनः।
विपरीततर्कवादशीलाःवस्तुविचारशून्याःपुरुषाः इतिसर्वश्लोकत्रयोक्तप्रकारेणयद्विद्यायामु
क्तयेकर्मसापेक्षत्वंवदन्ति तदत्रब्रह्मविद्यायांदुष्टंदोषयुक्तत्वान्नघटतइत्यर्थः दुष्टत्वेहेतुमाह।
विरोधरूपात्कारणाद्धेतोःज्ञानकर्मणोर्विरोधोहिज्ञानस्यकर्मसापेक्षत्वंदूषयति विरोधमाह॥
देहाभिमानादिति देहोहंममवेत्यभिमानात्क्रियाप्रवर्ततेगताहंकारस्यनिरभिमानस्यविद्याप्र
सिद्ध्यति षष्ठ्यर्थेतसिः स्पष्टोत्रदेहाभिमानसत्त्वासत्त्वाभ्यांविरोधः तत्राभिमानाभावप्रदर्शि
नायविद्यास्वरूपमाह ५० विशुद्धविज्ञानविरोचनाञ्चितांविद्यात्मवृत्तिंचरमेतिभण्यते उदेतिक २२
र्माखिलकारकादिभिर्निहन्तिविद्याखिलकारकादिकम् ५१ विशुद्धंकार्यकारणोपाधिविनिर्मु

22

क्तंयद्विज्ञानंब्रह्मतस्यविरोचनेनास्फुरणेनांचित्तप्रवर्तितायाआत्मवृत्तिःमनोवृत्तिःसाविद्याय
थाद्दृश्यसत्वनिश्चयवतःसर्वत्रदृश्यविरोचनाच्चित्तवृत्तिरुदेति तथाचिदतिरिक्तदृश्यात्यन्ता
भावनिश्चयवतःविशुद्धविज्ञानविरोचनाच्चित्तवृत्तिरुदेतितथाचिदतिरिक्तदृश्यात्यन्ताभा।
वनिश्चयवतःविशुद्धविज्ञानविरोचनाच्चित्तवृत्तिरुदेतिसैवविद्यायथास्रक्स्रजादौसर्पएवात्र
न्य॰ त्वप्रत्ययस्तथाशरीरादिदृश्यप्रभासमानेष्वपिचिन्मात्रत्वप्रत्ययोविद्येतिभावः तथाचविद्व।
दनुभवः सर्गादावेवनोत्पन्नंदृश्यमेतन्नकिंचन निर्विकारश्चिदानन्दघनोहंसर्वतःस्थितइ।
ति नह्यतस्यांदेहाभिमानःसंभवति ननूत्पन्नायामपिविद्यायांप्रत्यवायनिवृत्यादिद्वारामो
क्षार्थंनित्यादिकर्मकांतास्यादेवकृषिकर्मणिकर्षणसमीकरणवपनादेरिवोपायस्योप
यान्तरापेक्षकत्वादित्यतआह चरमेति साविद्याविद्वद्भिश्चरमाध्यवसानमता इत्येवंभण्यते
कथ्यते सर्वविधीनांसाक्षात्परंपरयावाविद्याजननैमात्रोपक्षीणत्वात् कृषिकर्मणिफलाव। न॰
चितिवज्ज्ञातायांतस्यांनकिंचित्कर्तव्यमवशिष्यतइतिभावः येत्वेतांविद्यात्मिकांचेतोवृ
त्तिमुपेक्ष्यकेवलंतदनुकूलयुक्त्यनुसंधानकौशलेनैवसन्तुष्यन्तिनेतेनैयायिकादिसदृशा

रा॰गी टी २३ निन्दिता एव तदुक्तम् वेदान्तैर्बहुतर्ककर्कशमतिग्रस्ताः परं मायया मोहिताः कर्मकलाकुलादतधि

योऽद्वैतेति वैशेषिकाः अन्ये भेदरता विवादकलहास्तेन त्वतो वञ्चितास्तस्मात्सिद्धमतं स्वभावकमा। सनक॰

यं धीरः परं संश्रयेदिति कुशला ब्रह्मवार्तायां वृत्तिहीनाः सुरागिणः तेऽप्यज्ञानतमा नूनं पुनराया

न्ति यान्ति चेति कर्म अखिलकारकादिभिरुदेति लब्धात्मकं भवति कारकाणि कर्त्रादीनि आदि

ना इतिकर्तव्यतादिग्रहः अखिलशब्दस्तेनेषामन्यतमाभावे कर्मवैकल्यद्योतनार्थः विद्या अध्य॰

स्तनिराकरणशीला अखिलं तत्कारकादिकं निहन्ति नाशयति तस्य विद्यात्मन्यध्यस्तत्वात् ततश्च

स्वरूपस्यैवोपमर्दात् कर्म विद्यायां सहायत्वेनान्वेतीति सिद्धम् १५ तस्मात्त्यजेत्कार्यमशेषतः सुधीर्वि

द्याविरोधान्न समुच्चयो भवेत् आत्मानुसन्धानपरायणः सदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

यस्माद्विद्याविरोधात्कर्मणः समुच्चयो विद्यया संहत्य कारित्वं न संभवति तस्मात्सुधीर्विचारवान्

विद्याधिकारी अशेषतः कार्यं त्यजेत् सर्वकर्म संन्यसेदित्यर्थः अस्य विविदिषासंन्यासिनः कृत्य

माह आत्मेति निवृत्तसर्वेन्द्रियवृत्तिगोचरः सन् त्यक्ताः सर्वेन्द्रियाणां वृत्तयो विषयाश्च येने २३

त्येवंविधः सन् सदा आत्मानुसन्धानपरायणः आत्मचिन्तापर एव स्यादित्यर्थः तथा च आत्मा

वारेद्रष्टव्य इत्यत्र श्रवणादीनां दृष्टार्थत्वान्नापूर्वविधिः किंतु नियमः परिसंख्या वा सा च उभयप्रा
प्तावितरनिवृत्तिं बोधयति यथा पञ्च पञ्चनखा भक्ष्या इत्यत्र शशादिमांसेतरपञ्चनखमांसभक्षण
निवृत्तिबोधः तदुक्तम् नियमः परिसंख्या वा विध्यर्थो हि भवेद्यतः अनात्मादर्शनेनैव परात्मान
मुपास्महे इति स्मृतिश्च आसुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तयेति त्वंपदार्थविवेकाय संन्यासः स
र्वकर्मणाम् श्रुत्याभिधीयते यस्मात्तत्त्यागी पतितो भवेदिति संन्यासिनो यावज्जीवाग्निहोत्रप्र
योगवन्नित्यत्वेन विहितस्य श्रवणादेः परित्यागे पातित्यमाहुः गृहस्थादीनां तु श्रवणादिकाम्यम्
दिने दिने तु वेदान्तश्रवणाद्भक्तिसंयुतात् गुरुशुश्रूषया लब्धात्कृच्छ्राशीतिफलं लभेदिति तथा
च संन्यासस्यार्कं यदहरेव विरजेदित्यादिप्रमाणसिद्धत्वाद्वीरहत्यादिदोषाभ्रष्टाग्निगृहस्थस्यप्रव
मा संभवेत्तु केन चित्प्रतिबन्धेन संन्यासाश्रमानस संन्यासः प्रागुक्त एव तथा च जनकादीनां वीरहत्याभीत्या
संन्यासास्वीकार इति कल्पने शोभते ९ ननु तेषां याज्ञवल्क्यजनकादीनां तत्त्वविदामपि विधि
किंकरत्वमेव कर्मसु प्रवृत्तिश्रवणादित्यत आह ॥ यावच्छरीरादिषु माययात्मधीस्तावद्विधेयो वि
धिवादकर्मणाम् नेतीति वाक्यैरखिलं निषिध्य तज्ज्ञात्वा परात्मानमथ त्यजेत्क्रियाः ९ ॥ शरीरादि

रा॰गी॰
टी॰
२४

24

षुशरीरं स्थूलसूक्ष्मकारणभेदेन त्रिविधं वक्ष्यति आदिना पुत्रादिसंग्रहः तेषु यावन्माययात्मधीः श
रीरादिरहमेवास्मीति बुद्धिरस्ति तावत्समानं विधिवादकर्मणां विधेयो भवति तत्र लिङादिशब्दवाच्या
भावना विधिरिति भाट्टाः विनियोगो विधिरिति प्राभाकराः इष्टसाधनता विधिरिति सर्वे तार्किकाः
अत्र विधिशब्देन निषेधोऽपि गृह्यते तथा चात्र प्रयोजनमुद्दिश्य प्रवर्तको निवर्तको वा विधिरिति सि॰
द्धम् तत्र निवर्तकनिषेधस्य तु अनर्थहेतुकर्मणः सकाशान्निवर्तनेन तदनर्थासंस्पर्श एव प्रयोज
नं बोध्यम् तौ च यथा वायव्यं श्वेतमालभेत भूतिकाम इति बर्हिषि न रजतं दद्यादिति च वादस्तु त
त्क्रमेण स्तुतिनिन्दाबोधको रुच्युत्पादनार्थः यथा वायुर्वै क्षेपिष्ठा देवतेत्यत्र क्षिप्रफलप्रदत्वेन
स्तुतिः सोऽरोदीदित्यत्र शोकजनकत्वेन निन्दा च बोध्यते स चार्थवादः यस्य पर्णमयी जुहूर्भवति ।
न स पापं श्लोकं शृणोतीति वह्न्यादेवताद्यंगद्वारैव विधेयप्राशस्त्यं बोधयति अंगेषु फलश्रुतिरर्थ
वाद इति न्यायात् विधेयं कर्म तु वादप्ररोचितं विधिबोधितं यागादिप्रसिद्धमेव तेषां विधादीनां व । २४
शे भवतीत्यर्थः याज्ञवल्क्यादीनां तु लोकसंग्रहार्थं कर्म कुर्वतामपि न विधिकिंकरत्वम् शरीरा॰
दिष्वात्मबुद्ध्यभावात् शरीरादिसंबंधेन प्रवर्तमानस्य विधेर्देवदत्त ग्रामं गच्छेत्यस्य यज्ञदत्तं प्रतीव॰

ति

शरीरायत्मत्वाभावनिश्चयपूर्वकं निष्क्रियं ब्रह्मात्मानं ज्ञानेन तं प्रत्यग्रहन्नेविंभावः तदेवाह नेतीति अथा
त आदेशो नेति नेतीति नेह नानास्ति किंचनेत्यादिभिः तत्र शरीरादिकमखिलं निषिध्य रज्जुभुजंगा
दिवद्बाधयित्वाऽथानेन तं परात्मानं ज्ञात्वा शुद्धं ब्रह्मात्मत्वेनानुभूय क्रियास्त्यजेत् त्यक्तुं समर्थो भवतीत्य
र्थः पूर्वत्र समाप्यत सर्वमित्यादौ विविदिषोः श्रवणादौ विनियुक्तत्वात्कर्मणां संन्यासविधिः इह तु न
कोपि विधिः प्रकृतत्वेन स्वातंत्र्यस्य विवक्षितत्वात् यद्वा अकृतोपास्तेः श्रद्धाद्यतिशये श्रवणादिभिरे
व जातसाक्षात्कारस्य गृहस्थादेर्विधिकिंकरत्वाभावेपि योगाभ्यासादिना जीवन्मुक्तिलाभाय विद्वत्सं
न्यासोयं विधीयत इति अत्र पक्षे पूर्वार्द्धेन विदुषः संन्यासविधिमपि निषिध्यापरितोषादाह नेतीति
अथशब्दोऽत्र पक्षद्योतकः पक्षास्त्विष्टानुरोधात्तत्त्वज्ञानमात्रेण चित्तविश्रान्त्यभावे सति जीवन्मुक्ती
च्छा तु यः तथा च नेतीत्यादिना परात्मानमित्यन्तेनाभिहितो विद्वान् अथ यदि जीवन्मुक्तीच्छा जायते
तदा क्रियास्त्यजेत् संन्यसेदित्यर्थः ततश्चायं विद्वत्संन्यासो विधीयत इति सिद्धम् तत्र च एवं वै तमा
त्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरं
तीति एतमेव विदित्वा मुनिर्भवति इति यदा तु विदितं तत्त्वं परं ब्रह्म सनातनम् तदैकदंडं संगृह्यसो

पवीनांशिवांस्यजेदित्यादिश्रुतिस्मृतिवचनान्यपिप्रमाणानि १७ यदापरात्मात्मविभेदभेदकंविज्ञा
नमात्मन्यवभातिभास्वरम् नदैवमायाप्रविलीयतेऽञ्जसासकारकंकारणमात्मसंसृतेः १८
यदाआत्मनिचित्तेविज्ञानंविद्याअवभातिप्रकाशते तदैवाञ्जसानिरायासेनैवमायाज्ञानंप्रविलीयते
नश्यति नाशोत्पत्तिप्रजनकस्यचिन्त्यतइतितस्याअनिष्टजनकत्वमाह आत्मसंसृतेःआत्मनःसंसा
रस्यकारणम् नन्वविद्यामात्रनिवृत्तावपिशरीराद्यनेककार्याणांसत्वेकथंसंसारनिवृत्तिरित्यतआह स
कारकंप्रविलीयते नन्वेकमेवविज्ञानंकथमनेकनाशनक्षममित्यतआह परात्मेति ब्रह्मजीवयोर्भेदः
सर्वज्ञत्वाद्यल्पज्ञत्वादिरूपोनिखिलभेदहेतुःतस्यभेदकंविनाशकमित्यर्थः नन्वनन्तकोटिजन्मा
भ्याससिद्धघनतरमज्ञाननत्कार्यंकथंज्ञानोदयसमकालमञ्जसानेश्यतीत्यतआह भास्वरम् प्रज्वलति
प्रदीपेकंदरादिषुवर्षकोटिसमवस्थितमप्यन्धतमससमनायासेनतत्क्षणएवयथानश्यतितथाने।
श्यतीतिभावः १८ श्रुतिप्रमाणैरपिनाशितासाकथंभविष्यत्यपिकार्यकारिणी विज्ञानमात्रा
दमलाद्द्वितीयात्तस्मादविद्यानपुनर्भविष्यति १९ श्रुतिप्रमाणैरपिअपिशब्देनगुरूपदिष्टानांस्वय
मूहितानांचश्रुत्यनुकूलयुक्त्यनुभवानांसंग्रहःनाशितापमेयगताज्ञाननिवृत्तिरेवश्रुत्यादिप्रयोज॰

नत्वान्त्वशाब्दोप्यर्थेनाशितापीत्यर्थः द्वितीयोपि शाब्दस्तस्याशब्देनान्वेति तथा च सापि पूर्वोक्ता-
ज्ञानोदयमात्रेण सद्यो विलयशीलापि श्रुतियुक्त्यनुभवैर्नाशितापि माया पुनः कथं कार्यकारि-
णी भविष्यति नष्टस्य कार्यजननासंभवप्रसिद्धेरिति भावः यद्वा प्रत्यक्षोपलभ्यमानकार्याया
मायाया विज्ञानेन कथं प्रविलय इत्याशंक्याह कार्यकारिण्यपि साक्षान्निप्रभृति प्रमाणैर्नाशि-
तासती कथं भविष्यतिस्यास्यति किंतु सर्पादिका रज्ज्वज्ञानवद्धिनं तस्यैवेति भावः ननु श-
रीरादिवस्तु नष्टं न भविष्यतीत्यत आह तस्मादिति ब्रह्मणः ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः
स्मृत इति स्मृतेः अविद्या पुनर्न भविष्यति शरीरादेस्तु मायाकार्यत्वान्न द्वेषम्यम् ननु स्वर्णात्क-
टकादिवद्ब्रह्मणोपि पुनर्भविष्यतीत्यत आह विज्ञानेति नहि प्रकाशादन्धकारोत्पत्तिः संभव-
ति ननु सोपाधिका ह्रविष्यतीत्यत आह प्रत्यक्तजगदुत्पत्तौ ब्रह्मणि मायोपाधिः कल्पितो मायो-
[स्यात्] त्पत्तौ पुनः कः प्रत्यक्तकल्पकैर्निरपेक्षेणापि कल्पनाप्रहत्तौ वनवस्था दुष्परिहरैव ननु यथा सति
सूर्ये सुद्रादपि सूर्यकान्तादग्निरुत्पद्यते तथा ब्रह्मणोन्यसन्निधिमात्रेण भविष्यतीत्यत आह अ-
द्वितीयादिति अत एव मायाया अनादित्वम् तथा च श्रुतिः अजामेकामित्यादिः अत्रापि वक्ष्यति॥

रा॰गी॰ अनाद्यनिर्वाच्यमिति १९ यदास्य नष्टा न पुनः प्रसूयते कर्ताहमस्येति मतिः कथं भवेत् तस्मात्स्वतंत्रा न
टी॰ किमप्यपेक्षते विद्या विमोक्षाय न कर्मसाधनम् २०॥ यदास्य ज्ञानिनो नष्टा माया पुनर्न प्रसूयते पुनः
२९ कार्यजननी न भवति तदा रज्जुसर्पादिवद्बाधिते शरीरादावहंकारादेरसंभवादहमस्य कर्मणः कर्तेति
बुद्धिः कथं भवेन्नैव भवतीत्यर्थः तस्मात्सर्वानर्थमूलभूताज्ञानान्धकारनिवर्तकस्य प्रबोधप्रकाशस्य
तज्जनितानर्थकलापान्तर्गतेन कर्मणा सह भावासंभवात् विद्या स्वतंत्रा कर्मनिरपेक्षैव साधनं भ-
वतीत्यर्थः ननु विद्यायाः स्वोत्पत्तौ कर्मसापेक्षत्वस्य प्रसिद्धत्वात्कथं स्वातंत्र्यमित्यत आह विमोक्षाये
ति स्वोत्पत्तौ निष्कामकर्मश्रवणादिसापेक्षत्वेपि विमोक्षाय केवल्यं प्रापयितुं किमपि किञ्चिदपि
न॰ नापेक्षते अतोस्या मुक्तौ स्वातंत्र्येण कर्मसाधनं भवतीत्यर्थः २० ननु ज्ञानोदये सति कर्मण उपसा
धनत्वाभावेपि विविदिषोर्ज्ञानाभावात् ज्ञानसाधनत्वात्कर्मैवानुष्ठेयमित्यत आह ॥ सा तैत्तिरी।
यश्रुतिराह सादरं न्यासं प्रशस्ताखिलकर्मणां स्फुटम् एतावदित्याह च वाजिनां श्रुतिर्ज्ञानं वि।
मोक्षाय न कर्मसाधनम् २१ सा लोकप्रसिद्धा न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशु- २९
रित्येवं रूपा तैत्तिरीयश्रुतिः प्रशस्ताखिलकर्मणां न्यासं त्यागं आह प्रोक्तवती प्रशस्तत्यागे प्रोक्ते का

म्यनिषिद्धपरित्यागस्तुकैमुतिकन्यायेनैवसिद्धः न्यासशब्देनसंन्यासाश्रमग्रहणंस्यादित्यत
आह सादरमिति नित्यकर्मस्त्रीशूद्राधिकारंचनतिरस्कृतमित्यर्थः संन्यासाश्रमेतन्नतदनादरः प्र
सिद्धएवत्यागस्तुनित्यकर्मस्वक्रियमाणेष्वपिमनसातत्संकल्पपरित्यागरूपोनविरुध्यते तत्र ।
काम्यनिषिद्धयोस्तुचित्तकालुष्यहेतुत्वात्स्वरूपतोपिपरित्यागः अत्रत्यागेनपुराणवाक्यैःश्र
वणादिप्रवृत्तानांस्त्रीशूद्राणामप्यधिकारोननिवार्यते अयंचत्यागोवैराग्यविशेषोथित्यादिनाप्र
तिबद्धसंन्यासाश्रमस्यविविदिषोःश्रवणादौविक्षेपनिवृत्तयेभवति संकल्पविक्षेपकत्वादेत
स्यचतत्यागरूपत्वात् तथाचश्रीकृष्णगीतायाम् ब्रह्मण्याधायकर्माणिसंगंत्यक्त्वाकरोतियइ
ति योगिनःकर्मकुर्वंतिसंगंत्यक्त्वात्मशुद्धयइति अनाश्रितःकर्मफलंकार्यंकर्मकरोतियः ससं
न्यासीचयोगीचननिरग्निर्नचाक्रियइतिच तत्रयःकार्यंनित्यमात्रंकर्मकरोतिकर्मफलमनाश्रि
तोभवतिकर्मफलेचेतिसमाहारद्वंद्वः तदुभयंनाश्रयतिसम्यगनुष्ठितेदृष्टादृष्टार्थंनित्यंकर्म
तत्फलंवाममोपकरिष्यतीतिनसंकल्पयतीत्यर्थः नित्येचनहियावज्जीवंसांगप्रयोगःकेनाप्य
नुष्ठातुंशक्यतइतिकाम्यकर्मवदंगवैकल्यभीत्यभावाद्यथासंभवमनुष्ठीयमानमपिनित्यंकर्म

रा॰गी॰
टी॰
२२

संन्यासिनः शौचभिक्षादिवज्जिज्ञासोः श्रवणादौ विक्षेपकं भवति प्रत्युत सत्त्वशोधकमेव भवति तत
श्चत्यागाश्रमभेदाद्धि विविदिषासंन्यासद्वैविध्यमस्त्येव एतावदिति एतावदरे खल्वमृतत्वमित्येवंप्र
कारा वाजिनां श्रुतिः बृहदारण्यके विमोक्षाय मुमुक्षार्थं ज्ञानं साधनमाह प्रोक्तवती न कर्म श्रुतेरर्थस्तु
अरे मैत्रेयि अमृतत्वं त्वज्जिज्ञासितम् अमृतत्वसाधनं एतावदस्ति यदेतदुपदिष्टं तन्मात्रं वर्तते नान्यदि
ति चकारोऽत्र न्यासान्तरस्यार्थः न्यासं च प्राहेत्यर्थः तद्यथा एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजंती
अत्र श्रुतिवाक्ये स वा एष महानज आत्मेति प्रक्रमादात्मन इति एतच्छब्देन परामृष्टत्वाल्लोक्यतेऽ
नुभूयते शास्त्रशीलितबुद्ध्यायमिति व्युत्पत्त्यावात्मानमनुभूयमानं तदेवेच्छन्तः प्रव्रजन्तीति श्रुतेर
र्थः संपद्यते अयं तु विविदिषासंन्यासः विद्वत्संन्यासोऽपि तत्रैव मैत्रेयीति स होवाच याज्ञवल्क्यः प्रव्र
जिष्यन्वा अरे अहमस्मात्स्थानादस्मीति प्राक्प्रतिज्ञाय मैत्रेयीबोधनानन्तरम् एतावदरे खल्वमृ
तत्वमिति होक्त्वा याज्ञवल्क्यो विजहारेति ॥ विद्वच्छिरोमणिना याज्ञवल्क्येन संन्यासस्यानुष्ठित। २२
त्वाभिधानादर्थादभिहित एव अत उक्तं संन्यासद्वयमप्याश्रमरूपमेव प्रव्रजेत्तत्रैव रूढत्वा
त् तथा च ज्ञानानुकूलतया कर्मसंन्यासविधानात् साधनान्तरनिषेधात् ज्ञानकर्मणोर्विरोधाच्च

मोक्षस्यज्ञानमेवसाधनंनकर्मेतिसिद्धम् २१ इत्यंश्रुतियुक्तिभिःसिद्धांतदृढीकरणेननिराकृतमम
प्येकादशादिश्लोकत्रयेणपूर्वमुक्तं ननुक्रियेत्यादिपूर्वपक्षमिदानीमनूद्यदूषयति॥ विद्यासमत्वे
नतुदर्शितस्त्वयाक्रतुर्नदृष्टान्तउदाहृतःसमः फलैःपृथक्त्वाद्बहुकारकैःक्रतुःसंसाध्यतेज्ञा
नमतोविपर्ययः २२ त्वयाननुक्रियेत्यादिनावाक्येनक्रतुःकर्मविद्यासमत्वेनज्ञानतुल्यतया।
दर्शितःकथितःउदाहृतस्तुदृष्टांतोदर्शपौर्णमासादियागोयथाप्रयाजादिकंविनास्वर्गादि।
फलंनजनयति तथाज्ञानमपिकर्मविनाकैवल्यंनजनयतीत्येवंरूपोनसमःतुल्योनास्तितत
श्चदृष्टान्तवैषम्याद्दार्ष्टान्तिकसिद्धिरितिभावः कथंवैषम्यमित्यतआह फलैःपृथक्त्वादिति
कर्मणःफलंस्वर्गादिःविद्यायास्तुकैवल्यमितिफलभेदात् प्रयाजादेर्हिफलाभावाद्आकां
क्षायांप्रयाजादिभिरुपकृत्ययागेनफलंभावयेदितियागफलमेवभाव्यत्वेनप्रकल्प्ययागफ
लोपकारत्वेनयागेन्वयःसंभवति इहतुसतंत्रस्वर्गादिफलशालिनांकर्मणांभाव्याकांक्षाया
एवाभावात्कथंविद्यायांतत्फलकैवल्योपकारकत्वेनान्वयःसंभवेत् नचजीवनादिनिमित्ते
षुविधीयमानानांनित्यकर्मणांफलाश्रवणाद्भाव्याकांक्षायांविद्याफलोपकारित्वेनविद्या

रा॰गी॰
टी॰
२८

28

यामन्वयोऽस्तीति वाच्यम् वर्णाश्रमाश्च स्वधर्मनिष्ठाः प्रेत्य लोका भवन्तीत्यादिस्मृतेः नित्यकर्म
फलस्यापि श्रवणात् ननु वेदस्यागमापायिरज्जुभुजंगायमानजगद्भ्रमपोषकत्वे रोचयामः किं
तु फलानामर्थवादत्वे कर्मप्ररोचनार्थत्वेन प्रकल्प्य वेदोक्तकर्मणामपि भाष्यकारोक्तायां कैवल्यो
पकारकत्वेन विद्यासहायत्वमेव न्याय्यमिति चेन्न प्रधानकर्मसंबंधिनां फलानामर्थवादत्वप्रक
ल्पने मानाभावात् फलनैरपेक्ष्येण कृतानां तेषां सत्त्वशुद्ध्यादिना ज्ञानोपकारकत्वेऽपि कैवल्यो
पकारकत्वासम्भवाच्च प्रसिद्धं हि कर्मणां कर्तृकर्मादिभेदबुद्धिनिबंधनत्वेन कैवल्यानुपका
रकत्वम् आत्मज्ञानस्य तु कैवल्यस्य निःश्रेयसहेतुत्वमस्ति भेदप्रत्ययनिवर्तकत्वेन कैवल्य
फलावसानत्वात् अकार्यत्वाच्च निःश्रेयसस्य न कर्मणां तत्साधनत्वं नहि नित्यं वस्तु कर्मणा
ज्ञानेन वा जन्यते नचैवं ज्ञानस्याप्यानर्थक्यम् स्वाज्ञायमानानेकजागतपदार्थभेदापादका
विद्यातमोनिवर्तकस्य ज्ञानस्य कैवल्यफलावसानत्वात् दृष्टं हि प्रदीपप्रकाशफलस्य रज्जु
ज्ञानस्य विनिहतसर्पादिभेदभ्रमरज्जुकैवल्यफलावसानत्वम् तथा च दृष्टार्थत्वाद्यथा छि २८
दिक्रियादीनां तद्योग्यतत्कारकाणां च द्वैधीभावादिफलादन्यफले कर्मान्तरे वा व्यापारो नोप

पद्यते तथा दृष्टार्थायां ज्ञाननिष्ठाक्रियायां व्याहतत्वात् ज्ञानादिकारकसाध्यकैवल्यफलादन्यफ
ले कर्मान्तरे वा प्रवृत्तिर्नोपपद्यते न तस्य ज्ञाननिष्ठायां कर्मसाहित्यम् न च ज्ञाननिष्ठस्याग्नि। तृप्तिः फलम् =
स्वर्गः फलम् = होत्रादिक्रियावत्त्वादिति वाच्यम् कैवल्यफले हि ज्ञाने प्राप्ते सर्वतः संप्लुतोदकफले प्राप्ते कूपत ८
डागादिक्रियाफलार्थित्वाभाववत् फलान्तरे तत्साधनक्रियायां वार्थित्वानुपपत्तेः न हि राज्यप्रा
प्तिफले कर्मणि व्याहतस्य क्षेत्रप्राप्तिफले व्यापारस्तद्विषयं वार्थित्वमुपपद्यते तस्मान्न कर्मणो
निःश्रेयससाधनत्वं नापि ज्ञानकर्मणोः समुच्चितयोरिति सिद्धम् नन्वदृष्टद्वारा कैवल्योपका
रकस्य कर्मणो यात्रादौ शुभमुहूर्तस्येव ज्ञाने साहाय्यमपेक्ष्यत इत्यत आह बहुकारकैरिति क्रि
तुर्बहुकारकैः संसाध्यते ज्ञानमतः कर्मणः सकाशाद्विपर्ययः विपरीतं सर्वकारकविलापक
त्वात् अतो विरोधात्तु न ज्ञानस्य कर्मसाहाय्यापेक्षेति भावः न हि तमस्तमसो निवर्तकमतः के
वलमेव ज्ञानमज्ञाननिवर्तकत्वान्निःश्रेयससाधनमिति सिद्धम् मुहूर्तस्य तु शकुनवच्छु।
भाशुभसूचकत्वेनादृष्टस्य फलोपकारसंभवस्य प्रसिद्धत्वाद्दृष्टान्तवैषम्यं स्फुटमेव २२ ननु
न केवलाज्ज्ञानात्कैवल्यप्राप्तिः नित्यकर्मणामकरणेन नरकादिप्राप्तिलक्षणस्य प्रत्यवायस्य

दुर्वारत्वात् नचैवंकर्मभ्योमोक्षोनास्तीत्यनिर्मोक्षप्रसङ्गादितिवाच्यम् नित्यानांकर्मणामनुष्ठानात्प्रत्य
वायाप्राप्तिःप्रतिषिद्धस्याकरणादनिष्टशरीरानुपपत्तिःकाम्यानांचवर्जनादिष्टशरीरानुपपत्तिःव
र्तमानशरीरारंभकस्यचकर्मणःफलोपभोगेनक्षयेसंनिपतितेस्मिन्शरीरेदेहान्तरोत्पत्तौका
रणाभावादात्मनोरागादीनांचाकरणात्स्वरूपावस्थानमेवकैवल्यमित्ययत्नसिद्धत्वात्कैवल्यस्य
अतिक्रान्तानेकजन्मकृतस्यस्वर्गनरकादिप्राप्तिफलस्यसञ्चितकर्मणस्तुअनारब्धकर्मणस्तुअ।
नारब्धकर्मत्वान्नित्यकर्मणांचप्रायश्चित्तवत्सर्वपापनुद्दुरितक्षयार्थत्वाद्वाभोगानुपपत्तिरित्यत
आह॥ सप्रत्यवायोप्यहमित्यनात्मधीर्यस्यप्रसिद्धानन्तुतत्त्वदर्शिनः तस्माद्बुधैस्त्याज्यमवि।
क्रियात्मभिर्विधानतःकर्मविधिप्रकाशितम् २२॥कर्माकृतौदोषमपिश्रुतिर्जगाविति एवंव
योक्तोयोनित्याकरणेप्रत्यवायःसतुयस्यपुरुषस्यप्रसिद्धान्तत्त्वज्ञानेनदग्धपटसाम्येनापादिता
अहमित्याद्याकाराअनात्मधीःशरीरादिभावनावर्ततेतस्यैवभवति नतुतत्त्वदर्शिनःतस्यतत्त्वद
र्शनेनतद्भावनायादग्धत्वादितिभावः अपिशब्दोऽनुक्तसमुच्चयार्थः तेनसर्वकर्मसंस्पर्शोवार्य्य
ते तथाचशेषः हयमेधशतसहस्राण्यथकुरुतेब्रह्महत्यालक्षाणि परमार्थविन्नपुण्यैर्नचपापैर्लि २९

ध्यते विमल इति श्रीकृष्णोपि यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते हत्वापि स इमांल्लोकान्न ह
न्ति न निबध्यत इति यत्तु पूर्वोक्तरीत्या कर्मानुष्ठानेन यत्नसिद्धमेव कैवल्यमित्याहुस्तत्र तमेव
विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेत्यादिश्रुतिषु ज्ञानेतरसाधनप्रतिषेधात् संचित
कर्मणां तयानुपपत्तेर्नित्यकर्मणां पुण्यलोकप्रापकत्वोक्तेश्च नित्यकर्मणां संचितदुरितक्षया
र्थत्वेपि संचितपुण्यक्षयानुपपत्तेर्धर्माधर्महेतूनां रागद्वेषमोहानामप्यन्यत्रात्मज्ञानादुच्छेदा
नुपपत्त्या धर्माधर्मोच्छेदानुपपत्तेश्च दुर्वार एव संसारः कर्मिण इति सिद्धम् तथा च भागवते क
र्मणा कर्मनिर्हारो न ह्यात्यन्तिक इष्यते अविद्वदधिकारित्वात्प्रायश्चित्तं विमर्षणमिति विमर्ष
णं ज्ञानमेव नैष्कर्म्यसाधनमुक्तम् तस्मात्कर्मणां विद्यावत्स्वतंत्रकैवल्यहेतुत्वाभावाद्बुधैर्विचा
रवद्भिर्ज्ञानाभ्यासविरुद्धत्वात्कर्मविधानतो नुष्ठानं न त्याज्यं नानुष्ठेयमित्यर्थः यद्वा विधान
तः विधिवत्स्वाधिकारानुसारेण त्याज्यं त्यागं संन्यासाश्रमं वा सोचितं कुर्यादित्यर्थः विधिप्रका
शितं कथं त्यजन्त इत्यत आह अविक्रियात्मभिरिति रागादिविकाररहितान्तःकरणैः कर्मविधे
रागिणः प्रत्येव प्रवृत्तत्वात् विरक्तस्य तु यदहरेव विरजेत्तदहरेव प्रव्रजेदिति संन्यासविधानात्

कर्मत्यक्त्वा किं कुर्यादित्यत आह ॥ श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोः प्रसादादपि शुद्धमानसः वि
ज्ञाय चैकात्म्यमथात्मजीवयोः स्वाद्वीभवेन्मेरुरिवाप्रकम्पनः २४ श्रद्धान्वितः शुद्धमानसोपि उक्ता
र्थे अपि शब्दस्तत्त्वमयोरावश्यकत्वद्योतनार्थः तथाचायं ज्ञानाधिकारी कर्मत्यक्त्वा तत्त्वमसीतिवाक्य
तो गुरोः प्रसादाच्च दृष्टादृष्टोभयविधसामग्रीसंपादकात् आत्मजीवयोर्ब्रह्मात्मनोरैकात्म्यमभेदं
विज्ञाय साक्षात्कृत्याघ्रजानसंगलस्मेरुरिव यथा सुमेरुर्वायुनानप्रकम्प्यते तथायमपि रागादिभिर
प्रकम्पनोऽक्षोभ्यः सन्स्वाद्वीभवेज्जीवन्मुक्तो भवेदित्यर्थः अथ शाह्रौ मंगले २४ आदौ पदार्थावगति
र्हि कारणं वाक्यार्थविज्ञानविधौ विधानतः तत्त्वंपदार्थौ परमात्मजीवकावसीति चैकात्म्यमथा
नयोर्भवेत् २५ विधानतः विधिवद्वाक्यार्थविज्ञानजनने आदौ प्रथमं हि सिद्धं कारणं पदार्थाव
गतिः पदानामर्थज्ञानं भवति पदार्थज्ञानाधीनत्वाद्वाक्यार्थज्ञानस्य पश्चात्संसर्गादिः कारणम्
अतस्तत्त्वमसीतिपदानामर्थः पूर्वं कथ्यते तत्त्वंपदार्थाविति विस्तरेण तु परमात्मजीवयोस्तदे
कस्य च स्वरूपं समस्तवाक्यार्थकथनानन्तरं वक्ष्यते अथ तत्त्वंपदार्थसामानाधिकरण्यपर्यालोच
नानन्तरमवबुद्धं यदनयोस्तत्त्वंपदार्थयोरैकात्म्यमेकत्वं तदसीतिपदस्यार्थो भवेदिति योजना २५

ननु तत्त्वमसीत्यत्र नीलमुत्पलमित्यादिवद्विशिष्टोऽर्थो गृह्यते नापि वैश्वदेव्यामिक्षेत्यत्रेवाभेदः
संभवति परस्परविरुद्धप्रत्यक्त्वाऽप्रत्यक्त्वादिधर्माश्रयत्वादित्याशंक्य वाक्यार्थप्रकारमाह ॥
प्रत्यक्परोक्षतादिविरोधमात्मनोर्विहाय संगृह्य तयोश्चिदात्मताम् संशोधितां लक्षणया च लक्षितां
ज्ञात्वा स्वमात्मानमथाद्वयो भवेत् २९ आत्मनोर्जीवात्मपरमात्मनोः प्रत्यक्परोक्षत्वादिविरोधं
विहाय त्यक्त्वा तयोरात्मनोश्चिदात्मतां चिदेकरूपतां संगृह्य विज्ञाय ततश्च तदखंडचैतन्यरूपं स्व
मात्मानं ज्ञात्वा साक्षात्कृत्याद्वयो भवेत् अत्रादिनाऽल्पज्ञत्वसर्वज्ञत्वादिसंग्रहः प्रत्यक्परोक्षेतिभा
वप्रधानो निर्देशः ननु गवाश्वयोः शृंगित्वाशृंगित्वादिविरोधं विहाय पशुत्वैकरूपताग्रहेऽपि नै
कत्वं सिध्यति तथात्रापीत्यत आह संशोधितामिति मायिकप्रत्यक्परोक्षताद्युपाधिमलस्य नेति नेती।
ति निषेधनेन चिदात्मताया एवावशेषितत्वात् ननु कथं तत्त्वंपदयोर्वाच्यार्थपरित्याग इत्यत आह ल
क्षणयेति वक्ष्यमाणया स्वरूपलक्षणया चकारो वाक्यजन्याखंडार्थबोधे शोधनलक्षणयोरुभयो
रप्यावश्यकत्वद्योतनार्थः २९ इदानीं तत्त्वमसीतिवाक्ये लक्षणान्तरनिषेधपूर्वकं जहदजहल्लक्ष।
णाया उपयोगमाह ॥ एकात्मकत्वाज्जहती न संभवेत्तथाजहल्लक्षणता विरोधतः सोऽयंपदार्थावि

रा॰गी
टी
३१

वभागलक्षणयुक्तेन तत्त्वंपदयोरदोषतः २२ ॥ मानान्तरविरोधे हि मुख्यार्थस्य परिग्रहे मुख्यार्थे
नाविनाभूते प्रवृत्तिर्लक्षणेष्यते इत्युक्तत्वान्मुख्यार्थसंबंधिबोधकः शब्दव्यापारो लक्षणेति सिद्धम्
स च लक्षणाभिधः शब्दव्यापारस्त्रिविधः जहज्जहदजहदजहच्चेति तत्र निःशेषतः शक्यार्थं विहाय
तत्सम्बन्धिबोधनं जहल्लक्षणाव्यापारः यथा प्रवाहे द्रुमावस्थानासम्भवात् कुक्षमितद्रुमा गंगेत्य
त्व त्र गंगाशब्दात्तीरस्य बोधस्तथा तत्त्वमसीत्यत्रं जहता शब्दव्यापारेण न कस्यचिदर्थस्य बोधः संभवेत् सं
भवतीत्यर्थः अत्र हि शब्दव्यापारेणेति विशेषणमर्थबोध इति पदं वाध्याह्रियते उक्तेन न संभवतीत्य·
तत्राह एकात्मकत्वात् तत्र हि तीरस्यान्यत्वाज्जहती लक्षणम् इह तु मायिकोपाधिभेदेपि तदर्थस्य
त्वमर्थस्य च वस्तुतः स्वरूपभेदाभावात्तस्मिन्नेव वाक्ये उपयुक्तत्वाच्च न जहल्लक्षणा गम्यत्वेन दध्यस्त।
स्यात्तदुपायेस्त्वरज्जुभुजंगादेरिवावस्तुत्वादपीति ननु यथा यजमानः प्रस्तर इत्यत्र यागोपकारक·
था लक्षणे यजमानशब्दः प्रस्तरस्तुतिपरस्तथा तत्त्वमसीत्यत्रापीश्वरवाचकतच्छब्दः कर्तृस्तुतिपरः
सा च स्तुतिर्यथेश्वरो जगत्सृजति तथा जीवोपि कर्मणा दृष्टमदृष्टं चार्थं सृजत इत्येवं रूपा कर्मस्तुत्या ३१
दविहत्यर्थो न हि तत्रैक्यप्रतिपादकत्वं संभवति नाहमीश्वर इत्यादिप्रत्यक्षेण किंचिज्ज्ञत्वादिविरु

31

द्धर्माश्रयत्वलिंगेन द्वासुपर्णा सयुजेत्यादिश्रुत्या यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः अतो
ऽस्मिंल्लोके वेदे च प्रथितः पुरुषोत्तम इत्यादिस्मृत्या चावगतस्य जीवपरभेदस्य त्यागायोगादिति चे
न्मैवम् तत्र सदेव सोम्येदमग्र आसीत् तत्त्वमसि आत्मेत्येवमुपक्रमोपसंहाराद्यवगताद्वैततात्प
र्यस्यैव प्रबलत्वात् नाहमीश्वर इत्याद्यनुभवादीनां का गतिरिति चेच्छृणु वेदान्तश्रुतियुक्तिबा
धितस्य भेदानुभवस्यान्तःकरणदोषजन्यत्वं स्वप्नद्विचंद्राद्यनुभववत् एवमेव सर्वज्ञत्वाद्यैर्विशेष
णैर्भिन्नजातिगुणादेरेव वाच्यत्वेन स्वीकृतत्वात् पाकरक्ते घटे रक्तोयं न तु श्याम इत्यत्र रक्तत्वादिध
र्मभेदविषयत्ववन्नाहमीश्वर इत्यत्रापि सर्वज्ञत्वाल्पज्ञत्वादिमायिकधर्मभेदविषयत्वं तु प्रकटमेव
अत एव नानुमानमपि भेदे प्रमाणं मेरोः पाषाणमयत्वानुमानवदागमविरुद्धत्वाच्च नापि द्वासु
पर्णेत्याद्यागमविरोधः तत्परातत्परवाक्ययोस्तत्परवाक्यस्य प्रबलत्वेन लोकसिद्धभेदानुवादिद्वा
सुपर्णादिवाक्यापेक्षयोपक्रमोपसंहाराद्यवगताद्वैततात्पर्यविशिष्टस्य तत्त्वमसीत्यादिवे
दान्तवाक्यस्य प्रबलत्वात् न च निरवयवचैतन्ये विरुद्धधर्माश्रयत्वानुपपत्तिः तेषां धर्माणां मा
यिकत्वात् मायायां चानुपपन्नभावस्य प्रसिद्धत्वात् किं चात्र द्वितीयः वाक्यार्थपरित्यागेन तत्त्वं

न

वंपि बोधरूपोऽजहल्लक्षणाख्यव्यापारः कुन्ताः प्रविशन्तीत्यादौ कुन्तधरादिबोधहेतुः सोऽप्यत्र
न संभवतीत्याह तथेति अजहल्लक्षणयापि नार्थबोधः संभवतीत्यर्थः कुत इत्यत आह विरोधइ तं
ति स्वशक्यार्थापरित्यागेन तत्पदस्य त्वंपदार्थलक्षकत्वं त्वंपदस्य तत्पदार्थलक्षकत्वं वा न संभव
ति सर्वज्ञत्वाऽल्पज्ञत्वादिरूपशक्यार्थस्य परस्परविरुद्धत्वेन सामानाधिकरण्यासंभवादिति भा
वः इदानीं तत्त्वमसीत्यत्र तृतीयः शक्यार्थैकदेशपरित्यागेनैकदेशबोधनरूपो जहदजहल्ल।
क्षणाख्यः शब्दव्यापारः संभवतीति सदृष्टान्तमाह सोऽयमिति सोऽयंपदार्थौ विरुद्धार्थत्वात्स्पष्टार्थे।
प्रथमा यथा सोऽयंपदार्थयोर्भागत्यागेन भागलक्षणा युज्यते तथैव तत्त्वंपदयोरपि युज्यते इत्यन्वयः य
द्वा यथा सोऽयंपदार्थौ भागलक्षणागम्यौ तथा तत्त्वंपदयोरर्थावपि भागँम्याविति युज्यते इत्यन्वयः अ लक्षणागं
स्मिंस्तु पक्षे अर्थौ विरुध्याद्यर्थम् लक्षणाशब्दस्य तद्बोधिते लाक्षणिकः अर्थाविति द्विवचनं तु वा
चकशब्दापेक्षयैव लक्ष्यार्थस्य वस्तुतः शब्दद्वयेऽप्येकरूपत्वात् अयं भावः कश्चिल्लवपुरे दृष्टं पुरु
षं कालान्तरे तमेव गोपालगच्छे दृष्ट्वा सोऽयं तेजोभानुशर्मेति वदति तत्र वाक्ये यथा तद्देशकालवैशि ३२
ष्ट्यं सशब्दार्थस्य विरुद्धभागं परित्यज्य एतद्देशकालवैशिष्ट्यमयंशब्दार्थस्य विरुद्धभागं च परित्यज्य

सोयमितिपदयोः केवलतेजोभानुसंज्ञकपिंडलक्षकत्वं युज्यते तथैवतत्त्वंपदयोः सर्वज्ञत्वाऽल्पज्ञ
त्वादिविरुद्धवाच्यांशपरित्यागेनाविरुद्धाखण्डचैतन्यभागलक्षणायुज्यतेवऊनतइत्यतआह अ
दोषतइति पूर्वोक्तलक्षणयोरिवात्रदोषाभावादित्यर्थः अत्रजहल्लक्षणाग्रहेएकंदोषःतत्त्वात्रप्र
तिपाद्यमेवअजहल्लक्षणाग्रहेतुविरोधोदोषः अत्रवतत्त्यागपवलक्षणास्वरूपमितिनकोपिदो
षइतिभावः २७ इदानींलक्षणयोत्याज्यभागभूतमात्मनोभेदभ्रमापादकमुपाधित्रयमाहत्रि
भिः॥ रसादिपंचीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् शरीरमाद्यंदुरितादिकर्म
णांमायामयंस्थूलमुपाधिरात्मनः २८ स्थूलंशरीरमात्मानउपाधिर्भवतितस्याध्यासेनात्मनि।
स्वधर्मैर्भेदभ्रमप्रयोजकोभवतीत्यर्थः यथास्थूलोहंब्राह्मणोहमित्यादि कथंभूतंरसादीनिपृ
थिव्यादीनिपृथिव्यप्तेजोवाय्वाकाशाख्यानिपंचीकृतानिभूतान्येवसंभवउपादानकारणंयस्यत
त् तत्रपंचीकरणमेकस्यापिभूतस्यपंचात्मकतापादनंमेलनमितियावत् तत्प्रकारस्तुद्विधा
कृतस्यभूम्यादेरर्धमेकंचतुर्धाकृतम् स्वान्यद्वितीयकार्धेषुसंयुक्तंपंचतारकम् । एवमर्धद्विभू
तानामितराष्टमभागजम् स्वांशाधिकेनभूम्यादिव्यपदेशोत्रसंस्फुटइति तानितुपंचीकृता।

पा॰गी टी ३३ न्येवपूर्वपूर्वस्वकार्यभूतस्मादिमहाभूतासाधारणैकैकगुणपँत्यागेन गंधरसरूपस्पर्शशब्दगुण
शालीनि सन्ति स्थूलकार्यजनकानि भवंति मिलितानामेव तेषामनुभवयोग्यस्वकार्योत्पाद
कत्वात् पुनः कथंभूते दुःखसुखादीनि कर्माणि कार्याणि येषां ते सर्पादिवनितादिविषयाः
अत्रादिना मिश्रितसुखदुःखे उभयाभावश्च गृह्यते तेषां सुखादिजनकविषयाणां भोगालयमनु
भवस्थानं तथा च पतञ्जलिः कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषामिति न चाद्यशरीरा॰
33 रम्भककर्मणां कथं शरीरकारणकत्वमिति शंकाम् संसारस्यानादित्वात् ननु सकारणत्वेनो॰
पाधेः सत्यत्वमुचितं तथा च तत्त्वमसीत्यादिवाक्येन त्यागायोगाड्क्रमहद्यत्वेनासिद्धेदित्यत आ॰
ह मायामयमिति विसदृशप्रतीतिकारणं हि माया तन्मयं मदात्मकम् स्वप्नेंद्रजालसदृशमि त=
तिभावः हृदयवत्प्रत्येकं स्थूलशरीरं व्यष्टिस्तदुपहितं चैतन्यं विश्वइत्युच्यते वनवत्तत्समुदायः स
मष्टिस्तदुपहितं चैतन्यं विराड्वैश्वानर इति चोच्यते विविधं राजमानत्वात्सर्वनराभिमानित्वाच्च
अयमेवोपाधिरन्नविकारत्वादन्नमयः कोश इत्युच्यते कोशत्वं तत्स्थाध्यासेनात्मनः कोशवदाच्छाद॰ ३३
कत्वात् २८ सूक्ष्मं मनोबुद्धिरहंक्रियेंद्रियैः प्राणैरपंचीकृतभूतसंभवम् भोक्तृसुखादेरपि सा

यत्नंभवेत्सूक्ष्मशरीरमन्यद्धिउपाधिरात्मनोबुधाः २१ उपाधिरितिमायामयमिति दुरितादिकर्मणामाद्य
मितिचानुवर्ततेबुधाःपण्डिताअन्यतत्कारणत्वेनस्थूलप्रपंचाद्भिन्नतयाव्यवहृतंसूक्ष्ममपिश॰
रीरमात्मनउपाधिंविदुरितिविभक्तिपरिणामेनान्वयः तत्किंरूपमित्यतआह अहंकृतेंद्रियैः
प्राणैश्चसहमनोबुद्धिर्मनःसहिताबुद्धिरितिमध्यमपदलोपीसमासः तथाचास्यलिंगशरीरस्य
सप्तदशावयवकत्वंसिद्धमिति मनःसंकल्पात्मकमेकोवयवःनिश्चयात्मिकाबुद्धिर्द्वितीयोव
यवः अहंकृतमहंकारस्तृतीयः इंद्रियाणितुपंचश्रोत्रादीनिपंचवागादीनिदशप्राणश्चा
नि प्राणास्तुप्राणापानसमानोदानव्यानाख्याःपंचतत्रप्राणोनासादौअपानःपाय्वादौव्या
नोनिखिलशरीरेउदानःकंठेसमानस्तुअशितपीतान्नादिसमीकरणकआमाशयेसंचरति
केचिदहंकारंबुद्धावन्तर्भाव्यसप्तदशावयवकत्वमाहुः यथापंचप्राणामनोबुद्धिदशेन्द्रियस
मन्वितम् अपंचीकृतभूतोत्थंसूक्ष्मांगंभोगसाधनमिति ननुभिन्नंचेत्स्थूलशरीरवदन्यैः
कथंप्रत्यक्षेणोपलभ्यतेइत्यतआह सूक्ष्ममिति सूक्ष्मंकुतइत्यतआह अपञ्चीकृतानितत।
न्मात्राख्यानियानिभूतानितेभ्यःसंभवोजन्मयस्यतत् तदयंप्रकरणार्थः वक्ष्यमाणंमायावि

रा.गी.
टी.
३५

यादिशब्दवाच्यमव्यक्तमव्यक्तेनापदीयस्तमोवदेकविषयाश्रयमज्ञानं रजसा विक्षेपशक्तिप्रधानं सत्त्व
र्वस्पृष्टमनुभवजन्यसंस्कारमात्रसहकारेण रज्जौ भुजंगादिवच्चिदात्मनि प्रातीतिकनाममत्रूपात्म
कतत्तत्पदार्थाकारेण परिणमति सैव पुनः सृष्टिरित्युच्यते तदुक्तम् विक्षेपशक्तिर्लिंगादिब्रह्मा। सू॰
ण्डान्तं जगत्सृजेदिति तत्रादौ सृज्यमानप्रपंचवैचित्र्यहेतुजीववासनासहकृतापरिमितानि
रूपितशक्तिविशेषविशिष्टमायोपहिताच्चिदात्मन इदं सर्वं स्यामीत्यादिसंकल्पशालि महत्तत्त्वा
ख्यं लिंगशरीरं जायते तदुपहितस्त्वात्मा हिरण्यगर्भः प्राणः सूत्रात्मेति चोच्यते अयं तु ब्रह्मादि
विलक्षणप्रवाहादिजीवः स चेश्वर इत्युच्यते सर्वशरीरी प्रथमः सर्वपुरुष उच्यते आदिकर्ता सम्
त्तानां ब्रह्माग्रे समवर्तत हिरण्यगर्भः समवर्तताग्र इत्यादिश्रुतेः ततश्च तदधिष्ठिते महत्तत्त्वा·
ष्टिभूतानि जीवलिंगशरीराण्युत्पद्यन्ते तत्रादौ चित्प्रतिबिम्बाविष्टस्यैवाहंकारस्य प्रादुर्भावो।
भवति स च जीवशब्देनोच्यते तत्रावच्छिन्नसाक्षिणस्तु न वास्तवं जीवत्वम् तदुक्तम् अहंकार ३५
स्य तादात्म्यं चिच्छायादेहसाक्षिभिः सहजं कर्मजं भ्रान्तिजन्यं च त्रिविधं क्रमात् तत्राहंकारे ति॰
विलीनायाः सर्वानुभूतपंचभूतात्मकप्रपञ्चवासनास्ताः प्राविर्भवन्त्योऽपंचीकृतभूतानीत्यु·

35

च्यन्ते तत्राकाशस्यवासनाशब्दतन्मात्रंजायते ततश्चवायोःस्पर्शतन्मात्रंततश्चाग्नेःरूपतन्मात्रम्
ततश्चजलस्यरसतन्मात्रं ततश्चपृथिव्यागन्धतन्मात्रमुत्पद्यते ततश्चैभ्यस्तन्मात्ररूपापंचीकृ-
तमहाभूतेभ्यःसूक्ष्मशरीरमुत्पद्यते तद्यथा तेषांत्रिगुणानामध्यादौसत्त्वप्राधान्येनज्ञानशक्तिप्र-
धानान्तःकरणचतुष्टयरूपःपरिणामोभवति ततश्चान्तःकरणरूपेणपरिणतानांशब्दादित-
न्मात्राणांक्रमेणज्ञानेन्द्रियरूपःपरिणामोभवति यथाशब्दतन्मात्राच्छ्रोत्रंस्पर्शतन्मात्रात्त्वक्
रूपतन्मात्राच्चक्षुः रसतन्मात्राद्रसनंगन्धतन्मात्राच्चघ्राणंप्रजायते ततश्चज्ञानेन्द्रियाकारेणप-
रिणतानांपुनर्विक्षेपकरजःप्राधान्योदयेसतिप्राणपंचकंकर्मेन्द्रियपंचकंचपरिणामोभव-
ति तदित्थंसूक्ष्मशरीरस्यापञ्चीकृतभूतसंभवत्वंव्याख्यातम् ततश्चवासनात्मकानुक्तरूप
पंचमहाभूतकार्यत्वाज्ञान्यप्रत्यक्षविषयत्वमस्येतिभावः ततश्चपञ्चीकृतभूतत्वंनामप्रकाश-
परिण॰ कसत्त्वावस्थायांजाग्रतीन्द्रियाकारेणतानांतन्मात्राणांयुगपत्प्रवर्तमानानांगुणप्रधानभावा-
दिनामिलितानामविशिष्टमलिनतमःप्राधान्येनसमष्ट्यंशानुसारतइयंभूमिरेवेदंजलमेवे-
त्येवंनियतलौकिकभूम्यादिव्यवहारहेतुःपरिणामविशेषोजायते तेषांजडानांपंचीकृतभू-

रा.गी.
टी.
३५

तानां प्रारब्धभोगानुकूलशरीरादिब्रह्माण्डान्तजगद्रूपत्वं तत्प्रसिद्धमेवास्ति बालवेतालावभासव
त्साक्षिचैतन्यप्रतिबिंबावेशेन लब्धात्मिका त्रिगुणा बुद्धिः सत्त्वरजोभ्यां जगदाकारेण परिणमंती
ग्रनियतमपरिमितमनवसानं वा जगत्सृजेद्यदि शुक्रणावरणात्मकेन तमसा कोषपंचककाला
द्यवच्छेदात्मना न नियमेन स्यादेतत् उभयस्य बुद्ध्यहंकारादीनां स्वपरिणामात्पृथगभावः स्या
त् यद्यपि जलस्य फेनशैवालादिवदत्रापि तत्तद्रूपविशेषांशवशेनैकदेशस्यैव परिणाम इति कथं
चित्तदोषनिवृत्तिस्तथापि जडानां तेषां स्वस्य स्वपरिणामस्य च पुरोवर्त्तितयान्यत्वेन ग्रहणं न संभ
वेदेवेति चेन्न शुद्धस्वभावसत्त्वप्राधान्यात्स्वाधिष्ठानसाक्षिचैतन्यप्रतिबिंबावेशेन चिद्वदवभास-
मानानां तेषां स्वस्य स्वपरिणामस्य च ग्रहणे बाधकाभावात् यथा स्वप्ने समुद्बुद्धजाग्रत्संस्काररूपाः
संकल्पाः स्वपरिणामं स्वाप्नप्रपंचमन्यत्वेन विषयीकुर्वंति यथा वा मुग्धबालसंकल्पाः स्वपरि।
णामं वेतालादिकमन्यत्वेन गृह्णंति तथात्रापि स्वपरिणामस्यान्यत्वेन ग्रहणं न विरुध्यते किं
च विशुद्धसत्त्वप्राधान्यादन्तःकरणे साक्षिचैतन्यस्य सम्यक्प्रतिसंक्रमात्स्वस्येन्द्रियादितृणान्तस्व ३५
परिणामस्य च ग्राहकत्वमुपपद्यते चक्षुरादीन्द्रियाणां तु सत्त्वरजःप्रधानान्तःकरणपरिणामरूपा

35

णामन्तःकरणेनैवान्यधर्मांघपटत्वादिधर्मैर्गृहीतानां स्वपरिणामस्वरूपादेरेव ग्राहकत्वं न स्वस्य:
नापि स्वकारणस्य तथा च श्रुतिः पराञ्चि खानि व्यतृणत्स्वयंभूरिति ग्राहकत्वेनामीषां स्वावच्छिन्न·
चैतन्ये स्वपरिणामावेदकत्वम् तदेव चैषां करणत्वं व्यवहरन्ति पंचीकृतमहाभूतकार्यस्थूलप।
स्व॰ दार्थानां तद्ग्राहकत्वमेव न कं चिद्ग्राहकत्वं एतदेव सर्वं श्रीकृष्णः कारणत्वसाक्षित्वपरेण इन्द्रजा
लापेक्षयेन्द्रजालिक इव तत्प्रयुक्तमाभ्यन्तरत्वं च बोधयता परशाहृप्रयोगेण गीतायां प्रदर्शया
मास इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः इति
एवं च व्यवहारदशायां कार्यकारणताद्यवस्थाभेदेन स्वकारणप्रारब्धसंस्कारविशेषप्रभेदेन·
च जायमानः सर्वोपि जागतपदार्थानां च भेदः स्वयमूहनीयः न चैवं जगतां जीवबुद्धिपरिणामत्व
इतस्ततः सर्वज्ञानेकजीवसाधारणस्तदुपलंभो न स्यादिति वाच्यम् स्वप्नवत्तदुपपत्तेः न च स्वप्ने संक
ल्पविशेषरूपाणां तत्तत्स्वाप्नजीवबुद्धीनां साधारणसंस्कारांशानुसारेणानेकसाधारणस्वाप्न
जगदाकारपरिणामनियामिका तत्समुदायभूता स्वप्नपुरुषबुद्धिरेकास्ति इह तु न तथेति वा
च्यम् इहापि सर्वबुद्धीनां तत्तद्वासनानुसारेण तत्तत्साधारणासाधारणपरिणामनियामिकाया

रा·गी
टी
३९

36

त्वन्समष्टिभूतायाहिरण्यगर्भबुद्धेः स्वीकृतत्वात् नन्वेवं स्वप्नदृष्टान्तेन जीवानां तथा तथा नियता का
रजगडुपलंभो वालवेतालवदलीकयोर्व्यष्टिसमष्ट्योस्तत्र तत्स्वरूपापादकसाक्षिचैतन्यप्रतिबिंब
रूपयोर्जीवेश्वरयोश्च वस्तुतोऽन्योन्यमभेदः साक्षिणस्तु भेदविक्रियाशून्यत्वमेवेत्येवमास्तां ते सर्वेष्ट
सिद्धिः किन्त्वीश्वरस्य सर्वज्ञत्वं न सिध्यति यावता दृष्टान्ते स्वप्ने इदमहं न जानामीत्युपलभ्यमा।
नमज्ञानं दार्ष्टान्तिकधर्मत्वमवगाहत इति चेन्न अज्ञानवृद्धितत्सम्बन्धितद्भावानां साक्षितया सर्व
दाप्रकाशमानेऽनावृतेऽधिष्ठानभूते कूटस्थचैतन्ये रज्जौ भुजंगस्येवाऽनेकबुद्धिपरिणामत्वेन।
भासमानानां पदार्थानां स्वपरिणामत्वाभावेन मानादिनान्यबुद्धिपरिणामत्वेन स्वीकारदशायां
व्यष्टिबुद्ध्या कथंचिदास्तां तावदज्ञानत्वव्यवहारः समष्टिबुद्ध्या तु यदज्ञातं तदकल्पितत्वाज्ज्ञास्ये·
वेति कथं तदज्ञानेनासर्वज्ञत्वमिति दृष्टान्तदार्ष्टान्तिकयोः सर्वज्ञत्वस्य तुल्यत्वात् न हि स्वप्नम
जानन् कश्चिदज्ञो भवति किं चेश्वरानेकत्वे कार्यत्वानुपपत्तेरनवस्थाप्रसंगात्सर्वान्तर्भाविशीला ३८
याः समष्टेरद्वितीयायाः एवैश्वरत्वप्रयोजकत्वाच्चैक एवेश्वरः प्राणिनां शुभाशुभमिश्रिताः कर्मवा
सनाः क्रमेण स्वर्गनरकमर्त्याकारेणोद्भाव्य तथात्वेणं संवर्द्धांति हरतीति सिद्धम् नचैवं जीवेश्वरभेदः

शंक्यः तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः स्वसंनिधिमात्रतो जगदाकारेण परिणमन्त्यां स्वा-
भिन्नायां स्वमायाशक्तौ स्वप्रतिबिंबजीवरूपेण प्रविष्टत्वादकर्त्रेवेश्वरस्य कूटस्थस्यैव सर्व-
थोपकारकरूपेण प्रतिप्रतिबिंबं सूर्यस्येव प्रतिजीवं साक्षिजीवरूपेणावस्थितत्वाच्च नचैवं बु-
द्धेरविद्यात्मकत्वात्तद्वृत्तिविशेषरूपाविद्याप्यविद्यैवेति कथं तन्निवर्तिका स्यादिति वाच्यम् क-
तकरजोवद्धि कृतस्वभावत्वात् यथा वारिणि निःक्षिप्तं कतकरजो रजोन्तरं निवर्त्य स्वयमपि।
निवर्तते तथा विद्याप्यविद्यां निवर्त्य स्वयमपि निवर्तते यद्वा शास्त्रविवेकनिर्मथनेन बुद्धिकाष्ठा-
दुत्पन्नस्य विद्यावह्नेः स्वयोनिनिर्दाहपूर्वकः स्वस्याप्युपशम इत्यविवादम् तथाचोक्तस्याज्ञाना-
दित्रयेणांतस्य सर्वस्य ज्ञेयत्वेन क्षेत्रशब्दवाच्यस्य जीवेशावाभासेन करोति माया चाविद्या च स्वय-
मेव भवतीति श्रुत्यादिभ्यो व्यष्टिसमष्टिबुद्धिप्रतिबिंबितचित्प्रकाशाविवेकेन क्रमाज्जीवेश्वर-
शब्दवाच्यस्याप्यस्य जगतो दृश्यत्वपरिणामित्वादिभिर्लिंगैश्च स्वप्नबालवेतालादिवदवास्त-
वत्वम् तदधिष्ठानस्य वस्तुभूतस्य तत्साक्षिणस्तु लक्षणया जीवेश्वरशब्दाभ्यां क्षेत्रज्ञकूटस्थ-
शब्दाभ्यां च व्यवहृतस्य चिदात्मनो ज्ञातृज्ञेयसंस्पर्शाभावस्य प्रसिद्धत्वात् तत्र तेषु शरीरेषु भि-

रा॰गी
टी
३२

37

घमानेष्व विक्रियमाणेष्वपि प्रत्येकं तत्तच्छरीरावच्छेदेन तत्तत्समुदायावच्छेदेन च स्वप्नसाक्षिव-
द्भूततत्तत्समुदायवनावच्छिन्नाकाशवच्चन भेदो नापि विक्रियेति सिद्धान्तो निष्पन्नः ततश्च मायि-
काऽनादिजगद्वासनाः संकल्पात्मना परिणमन्त्यः सृष्टिर्भवति तद्व्यष्टिसमष्टिविशिष्टश्चिन्न
काशः क्रमाज्जीवेशौ साक्षितया तदस्पृष्टा तदधिष्ठानभूता चितिस्त्वखण्डं ब्रह्मेति सिद्धम् एवं च मा-
यामयबुद्धिपरिणामत्वे जगतः स्वप्नादिवत्स्वाधिष्ठानसाक्षिचैतन्यसत्तास्फुरत्ता प्रतिसंक्रमेण
नुभवावसरे स्वरूपनिष्पत्तिर्भविष्यतीति भविष्यज्जगरत्वप्रतिपादनं निद्रायां बुद्धेः स्वकारणात्मा ८
८ ने विलयान्नित्यप्रलयप्रतिपादनं सर्वं खल्विदं ब्रह्मेति श्रुत्या स्वाधिष्ठानकूटस्थस्वरूपत्वप्रतिपाद
ति नं नेह नानास्ति किंचनेति श्रुत्यानुभूयमानस्यापि तस्यात्यन्ताभावप्रतिपादनं रज्जौ भुजंगस्येव।
नित्यैकरसेऽधिष्ठानेन तस्य प्रतीतावुक्तश्रुतिद्वयोक्ताध्यारोपापवादाभ्यां बाधनेन तन्निवृत्तौ
च विशेषाभावाद्बन्धमोक्षाभावप्रतिपादनं च संगच्छते तथा च श्रुतिः न निरोधो न चोत्पत्तिर्न ब- ३२
द्धो न च साधकः न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थतेति उक्तं च मायामेघो जगन्नीरं वर्षत्वेष य-
था तथा चिदाकाशस्य नो हानिर्न वा लाभ इति स्थितिः १ का बुद्धिः कोयमाभासः को वात्मात्र ज-

गात्कथम् इत्यनिर्णीयते मोहः सोयं संसार उच्यते २ बुद्ध्यादीनां स्वरूपं यो विविनक्ति स तत्त्ववित् स
एव मुक्त इत्येवं वेदान्तेषु विनिश्चयः ३ एवं च सति बंधः स्यात्कस्येत्यादिकुतर्कजाः विडंबना दृढं
खंड्याः खंडनोक्तप्रकारत इति प्रकृतमनुसरामः स्वरूपादेरिति शेषषष्ठी तत्स्वरूपं स्वरूपादेः पूर्वो
क्तस्य भोक्तुं भोगाय साधनं करणं भवेत् स्थूलशरीरस्य जडस्य भोगायतनत्वेपि करणत्वासं
भवः तर्हि द्विविधेन तत्तस्यापि तथात्वमिष्टमेव स्थूलवत्तस्यैकं लिंगशरीरं तु व्याप्तिः तदुपहितं चै
तन्यं तैजसत्वम् उच्यते तैजसोमयान्तःकरणोपहितत्वात् तच्च सूक्ष्मशरीरं कोषत्रयात्मकं भवति
यथा कर्मेन्द्रियैः सहितः प्राणः प्राणमयः कोषः ज्ञानेन्द्रियसहितं मनो मनोमयः कोषः ज्ञाने
न्द्रियैः सहिता बुद्धिस्तु विज्ञानमयः कोषः इति कोषत्वं च अहं वदाम्यहं गृह्णामीत्याद्यहंकार
कृतस्वाध्यासेनात्मन आच्छादकत्वात् २९ अनाद्यनिर्वाच्यमपीदृक्कारणं मायाप्रधानं तु परं
शरीरकम् उपाधिभेदात्तु यतः पृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्रमात् ३०॥ अपि तु
इदृक्कारणशरीरकमात्मन उपाधिरिति युज्यते अपिशब्द उपाधित्वेन समुच्चयार्थः तुशब्दः
पूर्वोक्तोपाधिद्वयाद्भेदनार्थः इदृक्कार्यभूते स्थूलसूक्ष्मरूपसर्वप्रपंचे कारणं तस्योपादानभूत

मित्यर्थः शरीरत्वं स्थूलस्य प्रागुक्तस्य प्रारब्धक्षयेन सूक्ष्मकारणयोस्तु प्रबोधोदयेन शीर्यमाणत्वाद्दो
द्धवम् तेनैतस्यैव सर्वानर्थरूपसंसारमूलभूतत्वेनोक्तमायांकन् तत्किमित्यत आह मायेति वि
सदृशप्रतीतिकारणमज्ञानमित्यर्थः आत्मन्यसदेव जगज्जीवादिकमिन्द्रजालवत्प्रदर्शयतीति
भावः कथं जगत्कारणमित्यत आह परंप्रधानमिति परं सर्वकार्यापेक्षया पुराणं प्रधानं सत्व
रजस्तमोगुणमयम् यथा रज्ज्वाः ज्ञानं तज्जाड्यादिकमाहृत्य सर्पादिरूपेण विक्षिप्यतो रज्जुं तथा
प्रकाशयति एवमात्माज्ञानमपि सर्गादौ निमग्नपरमानन्दमाहृत्य रजसा जगदाकारेण विक्षि
प्य सत्वेन तथाऽऽत्मानं प्रकाशयतीति भावः ननु मायाया अपि किंचित्कारणं भवेदित्यत आह ॥
अनादीति कार्यान्यथानुपपत्त्या कल्प्यमानायास्तस्या आदिग्रहे प्रमाणाभावात् ननु मायाया
असत्वे कार्यानुपपत्तिः सत्वे चाद्वैतहानिरित्यत आह अनिर्वाच्यमिति सदसद्भ्यां निर्वक्तुमश
क्यं प्रत्यक्षकार्यकत्वेन सत्तार्हत्वेऽपि स्वाधिष्ठानसत्तातिरिक्तसत्ताकत्वाभावात् एकमेवाज्ञानं शु ३८
द्धसत्वगुणप्रधानं मायेति मलिनसत्वप्रधानं चाविद्येत्युच्यते यद्वा ज्ञानक्रियाशक्तिभेदाद्द्वैवि·
ध्यमस्य इतरानभिभूतं सत्वं ज्ञानशक्तिः क्रियाशक्तिस्तु द्विविधा इतरानभिभूतं तम आवरण

शक्तिः इतरानभिभूतंरजोविक्षेपशक्तिः तत्रावरणशक्तिप्रधानमज्ञानमविद्याविक्षेपशक्तिप्रधा
माया नंतु मायोपहितंचैतन्यमीश्वरोजगत्कारणमंतर्यामीत्युच्यते अविद्योपहितंचैतन्यंजीवःप्राज्ञइ।
त्युच्यते केचित्तु अज्ञानप्रतिबिंबितंचैतन्यंजीवः अज्ञानोपहितंबिंबचैतन्यमीश्वरः अत्रपक्षेजी
वस्यैकएवतस्मिन्नंतःकरणविशिष्टाःप्रमातारःकल्पिताइति केचित्तु नानाज्ञानंस्वीकृत्यवन
वदज्ञानसमुदायः समष्टिस्तदुपहितंचैतन्यमीश्वरः वृक्षवत्प्रत्येकमज्ञानंव्यष्टिस्तदुपहितं
चैतन्यंप्राज्ञइतिवदंति अन्येतुकारणीभूताज्ञानोपहितंचैतन्यमीश्वरः अंतःकरणोपहितंचै
तन्यंजीवः तदुक्तं कार्योपाधिरयंजीवःकारणोपाधिरीश्वरः कार्यकारणतांहित्वापूर्णबोधोऽ
वशिष्यतइति अयमेवोपाधिरानंदमयःकोशइत्युच्यते अस्मिन्सुषुप्तिप्रलययोरानंदस्यानुभूय
मानत्वात् अस्योपाधिभेदनिरूपणस्यप्रयोजनमाह उपाधिभेदादिति उक्तसार्द्धश्लोकद्वयेनसो
यंत्रिविधउपाधिभेदउक्तःमुमुक्षुर्यतः यस्मात्पृथग्विभिन्नत्वेनस्वात्मानमवधारयेत् निश्चितंकु
र्यात् उपाधिंनिरस्यशुद्धंस्वात्मानमवशेषयेदितिभावः इत्थंचोपाधिनिरूपणंज्ञात्वानिरसना
र्थमेवेतिसिद्धम् तथाहि तत्त्वमसीत्यत्रव्यष्ट्युपाधिविशिष्टंचैतन्यंत्वंपदस्यवाच्यार्थः तद्धिवि

क्तेन लक्ष्यार्थः समष्ट्युपाधिविशिष्टं चैतन्यं तत्पदस्य वाच्यार्थः तद्विविक्तं तल्लक्ष्यार्थः परोक्षत्वस
रा॰गी॰ र्वज्ञत्वादिप्रत्यक्षाऽल्पज्ञत्वाद्यात्मकसमष्टिव्यष्ट्युपाधिविशिष्टं चैतन्यं तत्पदस्य वाच्यार्थः इत्युपविरु
टी॰ द्धभागनिरसनेन तत्त्वंपदार्थयोः सोयंपदार्थदृष्टान्तेनैक्यं तत्प्राक्प्रतिपादितमेव तथा च वनेद्व
३५ त्वभेदेपि यथा तदवच्छिन्नाकाशयोः परस्परं महाकाशस्य च न भेदस्तथा मायिकसमष्टिव्यष्ट्यु
पाधिभेदेपि तदुपहितयोर्जीवेश्वरयोः परस्परं तदनुपहितस्य शुद्धब्रह्मणश्च न भेदः इति सिद्ध
39 म् आत्मन्येवस्थिते उपाधिभेदपरसत्तास्फूर्तिप्रदत्वेन स्थितं सर्प एव स्थितां रज्जुमिवावधारये।
दितिभावः तथाऽह्योऽवधारणे सर्वार्थवशादात्मनीत्यत्रैव सम्बध्यते यद्वा तथा हि उपाधिभेदस्य
नियम्यत्वप्रातीतिकत्वादिनियामकत्ववस्तुत्वादिप्रसिद्धधर्मविरोधेनात्मनो भेदं द्योतयन्नथा
प्युतक्रमेणैवान्वेति आत्मनि विभिन्ने स्वात्मानं उपाधिभेदात्पृथक् स्थितमवधारयेदिति वान्वयः
अनेकजन्माभ्यस्ताध्यासस्य हृत्तत्वस्य रूढत्वपर्वतमशकात्वादाह क्रमादिति स्थूलात्पृथक्
मवधार्य सूक्ष्मादवधारयेत्ततः कारणादिति भावः ३० इदानीं क्रमान्तरनिदर्शनार्थमुपाधिप्र ३५
कारान्तरेण विभज्य तस्य प्रातीतिकत्वं पृथक्त्वावधारणे प्रकारान्तरं च सदृष्टान्तमाह॥ कोशेषुपं

चस्वपितत्तदाकृतिर्विभातिसंगात्स्फटिकोपलोयथा असंगरूपोयमजोद्वयोपिवाविज्ञान:
नोस्मिन्नभिन्नोविचारतः ४१ अयंप्रज्ञानस्वरूपआत्माअसंगरूपःनकेनापिसंसृष्टस्वरूपःअजः
नजायते अद्वयःअखंडस्वरूपःतथापिपूर्वोक्तेषुअन्नमयप्राणमयमनोमयविज्ञानमयानन्द
मयाख्येषुपंचस्वपिकोशेषुतत्तदाकृतिःतत्तत्कोशरूपोविभाति कुतइत्यतआह संगादिति
स्थूलोहंस्वादामिसंकल्पयामीत्येवमाद्यहमित्यभिमानरूपादित्यर्थः तत्तदाकारापन्नावस्था
त्मनस्तत्तत्संसर्गाभावएवेत्यत्रदृष्टान्तमाह स्फटिकोपलः स्फटिकमणिर्यथानीलपीताद्यने
कपदार्थसंनिधानात्तत्तदाकृतिर्विभातितद्वत् अयंभावः यथास्फटिकस्यस्वास्मिन्नवभासमा
नैर्नीलपीताद्यनेकपदार्थैर्नसम्पर्कः नापितेषांभानाभानादिनाविकारेणविकारोनापितेषा
मनेकत्वेनानेकत्वं तथैवस्वास्मिन्नवभासमानैरन्नमयादिभिर्नात्मनःसंयोगविकारौद्वैताप
त्तिर्वासंभवतीतिसिद्धम् ननुयथास्फटिकस्यस्वास्मिन्प्रतिबिंबितैर्विकारोनास्तितथाचिदा
त्मनोपिस्वास्मिन्प्रतिबिंबितेनान्नमयादिनानेनजगतासंगविकारद्वैतापत्तयोनसंतु तथापि
यथास्फटिकेप्रतिबिंबितानांबिंबभूताअन्येभवंतितथाचेतनप्रतिबिंबितस्यास्यजगतो।

वा॰गी॰
टी॰
५॰

50

बिंबभूतमन्यज्जगद्व्विघ्यतितेनद्वैतापत्तिर्दुर्वारैवेति चेन्नैवं स्वाप्नप्रपंचरज्जुभुजंगादिप्रतिभास
स्यैवचितिजगत्प्रतिभासस्यापिलघुसंस्कारमात्रापेक्षकत्वेनपृथग्बिंबानपेक्षणात् नचवास्त॰
वजगदभावेकथंप्रथमसंस्कारोत्पत्तिरितिवाच्यम् जगद्भ्रमस्यानादित्वेनपूर्वपूर्वभ्रमादेवानेक
विधसंस्कारोत्पत्तेःसंभवात् ननुमृषैवजगदाकारेणभासमानस्यात्मनःकथंपृथगवधार।
णमित्यतआह विज्ञानतइति विज्ञानरूपेणसर्वाधिष्ठानज्ञानस्वरूपेणास्मिन्कोशपंचात्मकेजगति २४
अभितःसर्वतःप्रतिबिंबितानेकवर्णेष्विवचमत्कारिस्वरूपेणस्फटिकवद्विभातीतियुज्यतेकेन
साधनेनेत्यतआह विचारतइति धर्मभेदेनपृथक्करणादित्यर्थः चिदात्मादिप्रकाशकत्वनित्य
त्वैकरसत्वादिनाप्रकाश्यत्वव्यभिचारितानेकत्वादिधर्मशालिनोजगतःपृथगेवविभातीतिभा
वः यथानामरूपात्मकाज्जगतःसच्चिदानंदात्मापृथक्कृतः स्यात्तथासाक्षित्वादिनाविचारये
दित्युपदेशः यथाहुः अस्तिभातिप्रियंरूपंनामचेत्यंशपंचकम् आद्यंत्रयंब्रह्मरूपंजगद्रूपंत ५॰
तोद्वयम् । रूपंदृश्यंलोचनंदृक्तद्दृश्यंदृक्तुमानसं दृश्याधीवृत्तयःसाक्षीदृगेवनतुदृश्यत
इति ३१ इदानींस्थूलसूक्ष्मकारणभेदेनत्रिधाप्रदर्शितसोपायेर्बुद्धिवृत्तित्वनिरूपणेनावास्तव

त्वंप्रदर्शयंश्चिदात्मनो विवेकमाह ॥ बुद्धेस्त्रिधावृत्तिरपीह दृश्यते स्वप्नादिभेदेन गुणत्रयात्मनः
नू॰ अन्योन्यतोऽस्मिन्व्यभिचारतो मृषा नित्ये परे ब्रह्मणि केवले शिवे २२ इदं पूर्वोक्तत्रिविधोपाधिरू
पे जगति बुद्धेर्वृत्तिरेव दृश्यते अन्विष्यमाणमप्यन्यदुपाधिरूपं नोपलभ्यत इत्यर्थः अपिरेवकार
ऐ यद्वा पूर्वोक्तत्रिविधोपाधौ यथा कोशपंचकविभागप्रकारस्तथा स्वप्नादिभेदेन त्रिविधा बु
द्धेर्वृत्तिरपीति समुच्चयार्थ एवास्तु कथमेकस्या बुद्धेस्त्रिधावृत्तिरित्यत आह गुणत्रयात्मन इति
सत्वरजस्तमोगुणत्रयरूपाया इत्यर्थः अयंभावः अनित्वेल्वज्ञानस्य तमःस्वभावस्य स्वाश्रयाभिन्न
विषयस्य तद्व्यतिरेकेणानुपलभ्यमानस्य कार्यानुमेयस्यातएवानिर्वचनीयस्य सत्वरजस्तमो
भिधानं गुणत्रयं तत्र विशुद्धिविक्षेपमलीमसत्वात्मना विरुद्धस्वभावमपि कार्यजनने गुण
प्रधानभावेनान्योन्यं सहायतां प्रतिपद्यते तत्राज्ञानस्य स्वावृते रज्ज्वादिविषयेऽधिष्ठानभूते
तदीयसत्तास्फूर्ती प्रतिबिंबनयोपादाय तत्तत्सर्पादिकार्याकारपरिणामरूपया स्वहृद्या विव
त॰ र्तोपादानयोग्यत्वं नाम शुद्धंम् शुद्धस्यैव जलादेर्विक्षेपमालिन्यगुणविशेषसहकारेण विवि
धविलक्षणप्रतिबिंबजनकत्वदर्शनात् तत्र शुद्धमज्ञानं सत्वं बुद्धिरिति चोच्यते तदेव सत्वरज

ग॰गी
टी॰
५१

41

स्तमःप्राधान्यप्रयुक्ततत्तत्परिणामशालितया धर्मत्वेन व्यवह्रियते ततश्च यथा रज्ज्वज्ञाने विपर्य
यप्रत्ययप्राबल्येन सर्प एवायमिति निश्चलप्रतीतिः विक्षेपप्राबल्येन सर्पोयं दण्डोयमित्येवं।
क्षणिकप्रतीतिस्तमः प्राबल्येन च न किंचिदित्यविशिष्टप्रतीतिर्भवति तथात्माज्ञाने प्रतिसं
क्रान्तात्मसत्तास्फूर्तिबुद्धिभावमापन्ने सत्त्वरजस्तमोन्यतमप्रधानस्वभावमपि तत्कदाचित्तत्त
त्प्रधानान्तःकरणेन्द्रियादिकार्याकारेण परिणते सत्त्वप्राधान्येन प्रत्यभिज्ञानात्मजाग्रदाकारवृत्ति टि॰
र्भवति रजःप्राधान्येन तु तत्तद्वृत्तिसंस्कारविलासविक्षेपप्रधानस्वप्नाकारवृत्तिर्भवति तमःप्रा॰
धान्येन च तामपि विलाप्य सर्वोक्तद्विविधवृत्तिकारणात्मनावस्थिते विक्षेपाभावात्प्रतिसंक्रा
न्तात्मानन्दसुषुप्त्याकारवृत्तिर्भवति मरणमूर्छयोस्तु सुषुप्त्यवस्थायामन्तर्भाव इष्यते तत्र सु
षुप्त्यवस्थाकाराद्यपरिणामाभावेनोल्लेखाभावेपि सुखमहमस्वाप्सं न किंचिदवेदिषमित्युत्थि चि॰
तस्य स्मृतेरनुभवपूर्वकत्वावश्यंभावान्निर्विकल्पसमाधाविवातिसूक्ष्मासुखाकाराज्ञानवृत्तिरस्त्ये बै॰
व तथा च श्रुतिः सुषुप्तिकाले सकले विलीने तमोभिभूतः सुखरूपमेतीति तस्याश्चाज्ञानपरि
णामभूताया वृत्तेर्बुद्धित्वमस्त्येव अत्र प्रतिसंक्रान्तात्मसत्तादिना लब्धात्मकस्य परिणमतोज्ञान

सेवबुद्धिशब्दवाच्यत्वात् तस्य रज्जौ सर्पदंडाद्यनुभवस्येवात्मनि स्वप्नानंदाद्यशेषजगदनुभवस्य
जनकत्वात् अतएव कारणशरीरत्वमुक्तं प्राक्समाध्यानंददहेतेस्तु सात्विकोंतःकरणपरिणाम
त्वादिना स्वप्नभिन्नो विशेषः तदुक्तम् लीयते हि मनः स्वप्ने निगृहीतं न लीयते तदेव निर्भयं ब्रह्म
प्रज्ञालोकं समंततमिति ननु वाधितस्यास्य जगतः कथं मायामयत्वमित्यत आह अन्योन्यत इ
ति यथेंद्रजालिके बहुविध इंद्रजालो यथा च रज्जौ सर्पदंडादिः अन्योन्यतो व्यभिचारात्परस्परम
त्यंताभावप्रतियोगित्वात् अधिष्ठाने अन्यतमप्रतिभानावसरे अन्याप्रतिभानात्कृधा तथास्मिन्
स्वयंप्रकाशत्वान्नित्यप्रत्यक्षे चिदात्मन्यधिष्ठाने हि त्रयात्मकं जगन्मृषा आरोपितानामधिष्ठा
नव्यतिरेकेणान्विष्यमाणानामकिंचनत्वात् यथा स्फटिकरज्ज्वादिव्यतिरेकेणानुपलभ्यमा
नाव्यभिचारिणो वर्णसर्पादयो वाधिता भवंति तथा चिदात्मव्यतिरेकेणानुपलभ्यमानं व्यभिचा
रिजगद्वाधितं भवतीति भावः न च तत्र तदेवेदं जगदिति प्रत्यभिज्ञारूपप्रमाणसद्भावान्नैवमि।
तिवाच्यम् अधिष्ठानसाक्षात्कारेण निवर्तितभ्रमस्य पुंसः स्थाण्वाद्यधिष्ठाने पुनः पुनः स एवा
यं पुरुष इत्यादिरूपेण जायमानायास्तत्संभ्रमसाधारण्येन प्रमाणत्वाभावात् प्रकृते चाधिष्ठान

रा॰गी
टी
५२

भूतात्मसाक्षात्कारं विना पूर्वोत्पन्नभूतशुभाशुभवृद्धिपरिणामजन्यदृढतरसंस्काराद्धर्माधर्माख्या
त्मकसूक्ष्मप्रपंचवासनारूपपंचतन्मात्रात्मनावस्थिताज्जायमानानां तत्तद्देशकालादिविशिष्टश
रव्याप्यव्यापरिणामानां मध्येऽतीतपरिणामावयववशाद्रूपेण जायमानानां वर्तमानपरिणामाव
यवानां प्रत्यभिज्ञा जायमाना परिणामवद्भ्रम एव सुषुप्तौ तत्सर्वविलापकतमोहेतोस्तस्याभा
व एव तन्मात्रेभ्यः सूक्ष्मस्थूलशरीररूपपरिणामोत्पत्तिस्तत्प्रकाशप्रवृत्तिजाड्यात्मकगुणत्रय
परिणामविशेषैकत्वैव सूक्ष्मशरीरनिरूपणे प्राक् विनाशस्तु द्विविधः बाधस्तिरस्कारश्चेति
बाधस्तु अधिष्ठानसाक्षात्कारेणारोपितस्यात्यंताभावः स चाधिष्ठानरूप एव यथाहुः अधिष्ठाना
वशेषो हि नाशः कल्पितवस्तुन इति अधिष्ठानातिरिक्त इति केचित् तथापि नेह नानास्ति किंच।
नेत्यादिश्रुतिविचारजन्यवृद्धिपरिणामरूपस्यात्यंताभावस्याप्यात्मसाक्षात्कारेणैवाकाशादे।
रिव स्वोपादानभूतवृद्धिविनाशाद्धि नाशः अत एवाज्ञानशब्दवाच्याया अस्या बुद्धेः सत्वमसत्वं
वा न कल्पयितुं शक्यते मायातत्कार्याधिष्ठानभूते शुद्धचिदात्मनि तत्कल्पकप्रमाणांतराभावात् ५२
मायातत्कार्ययोर्जडत्वेन स्वसत्तासत्वयोः प्रामाण्यायोगात् न च शुद्धचिदात्मैव साक्षित्वेन तत्र प्र॰

माणमितिवाच्यम् सत्तास्फुरत्तारूपेण सकलप्रपंचविवर्ताधिष्ठानभूतस्य स्वात्मरूपस्य तस्य सा
क्षित्वेन पृथक्कृतो सर्वस्य तत्त्वान्तरत्वात् अत एव बाध्यमकाले ऽधिष्ठानात्मसत्तयानुभूयमानमपि ष्ठा ४
सर्वबालानुभूतछायापिशाचवन्न वस्तुतां प्रतिपद्यते अत एव व्यभिचारतो मृषेति मिथ्या·
त्वमुक्तं तस्याऽनिर्वचनीयत्वमेव तथा चाविचारितरमणीयत्वादशेषं जगद्दिनकरकरस्प
ष्टनीहारवद्विचारेण विलयमुपयातीति सिद्धम् न चात्मापि तथास्त्विति वाच्यम् छायापि
शाचायमानस्य जगतः साक्षित्वेन चिद्रूपस्य तस्याव्यभिचारेणावस्थानात् अत एवाधिष्ठान।
विशेषणं नित्य इति अव्यभिचारिसत्तात्मक इत्यर्थः नचैवं सर्वदा सर्वद्वैतप्रतीतिः स्यादिति·
शंक्यम् तिरस्काररूपाद्विनाशाद्वैतस्य सर्वदंडपातेन घटस्येव विरोधिपरिणामोदयेन का
र्यस्य स्वकारणे विलयः तथा च श्रुतिः यद्वैतन्न पश्यति पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विप
रिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदिति अस्यार्थः आत्मान
पश्यतीति यल्लौकिकैरुच्यते तदसत् स पश्यन्नेवैतन्न पश्यतीति भ्रान्त्या केवलं व्यपदिश्यते न
ह्येतद्दृष्टुरात्मनः स्वरूपभूताया दृष्टेर्लोपो न विद्यते विनाशरहितस्वभावात् न च पदार्था·

रा.गी
टी.
५३

नुपलंभेनदृष्टेरेवविनाशःस्वीक्रियतामितिवाच्यम् सर्वसाक्षिभूतायास्तस्यानिःसाक्षिकस्यविना
शस्यासंभवात् अन्यथासुषुप्तिमूर्छासमाधानेतरेस्त्वमहमस्वाप्समित्यादिदृष्टिस्मृतीनांस्वप्न
जागरयोस्तत्तत्पश्यामितत्तत्स्मरामीत्येवंपदार्थाभावेदृष्टेश्चाभावप्रसंगात् कथंतर्हिलौकिका
नांनपश्यतीतिभ्रमोदयइत्यतआह नविति ततःद्रष्टुरन्यद्दृश्यंयद्द्वितीयंद्वैतंतद्विभक्तंनास्तिय
53 त्पश्येत् विभागोनामबुद्धेस्तदन्तःकलसंस्काराच्छायापिशाचवत्तद्दृश्याकारापरिणामः सवा
दर्शनावसरेनास्तिसुषुप्तिमूर्छयोस्तमःपरिणामेनसमाधावेकाग्रतारूपसत्वपरिणामेनजा
ग्रत्स्वप्नयोस्तद्दृश्यांतरपरिणामेनप्रबलविरोधिनातिरस्कृतत्वात् ततश्चतत्पदार्थरूपबुद्धिप
रिणामाभावान्नदर्शनेनतद्दृष्ट्यभावादितिसिद्धम् नचतस्यपदार्थस्यबहुभिरन्यैरुपलभ्यमा
ति नत्वान्नैवमिवाच्यम् सामग्रीसाम्येरज्जासर्वेषांस्तद्ग्रहणान्यतमनियतसदृशभ्रमोदयवत्प्रार
ब्धसंस्कारसाम्येनतेषांतादृशबुद्धिपरिणामोपलंभेबाधकाभावात् एतेनवस्तुनएकबुद्धिपरि
णामत्वेवस्तुकारणगुणप्रक्रमेणस्वंवेडः एवंमाहकंवैकरूपमेवस्यात् तस्यांचबुद्धावर्थांतरव्या ५३
सक्तायांनद्वस्तुनकिंचित्स्यात् ततश्चान्यैर्नोपलभ्येत बहुबुद्धिपरिणामस्तद्वस्त्वितिचेन्नैकबु

नैवमितिहृदयस्यबुद्धिपरिणामत्वंनेत्यर्थः = ४

द्विपरिणामाद्वस्तुनस्तस्यैवेलक्षणमवश्यंवक्तव्यम् नोचेत्कारणाभेदेसत्यपिकार्यभेदाभा
वान्निर्द्वैतकमेकरूपंवाजगत्स्यादित्यादयस्तर्काः परास्ताः पृथक्जगत्स्वीकारेजीवकर्मफलवे
नश्यतस्यैकस्यापिशरीरापत्त्यातःपदार्थस्यानेकभोग्यत्वेनायंपदार्थएकस्यपुंसःकर्मफलमित्या
दितर्काणान्त्वस्मन्मतेपितुल्यत्वात् संघातारंभादिवादानांप्राक्प्रत्याख्यातत्वाच्च किंचसिद्धांतेप्र
तीतिशरीरेऽस्मिञ्जगतिसर्वंप्रतिबिंबितद्रुमादावेकस्यदृश्यभ्रमोयमित्यादितर्काणामिवतेषां
तर्काणामनवकाशएव एवमनादिद्वैताध्यासमसंस्कारवशेनद्वैतवदवभासमानोपिशुद्धस
च्चिदानंदघ्रात्मास्वयमव्यभिचारेणप्रकाशमानःसरोवारिवत्सद्वस्त्वद्वैतस्यनतुचिदात्मनिस
रोवारिणिद्रुमादेरिवात्यंताभावएव अतएवाधिष्ठानविशेषणानि परेब्रह्मणिकेवलइति
परेजगत्प्रतीतेः प्राचीनेकारणत्वात् यद्वापरेनिःसंगे वारिणिद्रुमादेरिवास्मिन्द्वैतसंस
र्गाभावात् ब्रह्मण्यपरिच्छिन्नेपरिच्छेदकदिक्कालादेरत्यंताभावात् केवलेद्वैतस्यात्यंताभा
वादेव तथैवाहवासिष्ठदेवः नासतोविद्यतेभावोनाभावोविद्यतेसतइति वासिष्ठेप्येवमेवप्रपं
चितंयथा तस्मादेतत्समुद्भूतंमनोमननमंथरम् स्वास्थिरादस्थिराकारंतरंगइववारिधेः त

रा॰गी
टी
४४

त्स्वयंस्वैरमेवाशुसंकल्पयतिनित्यशः तेनेयमिंद्रजालश्रीर्जगतीप्रवितन्यतइति अत्रमनःशब्दे
नजीवेश्वरसाधारणजगदध्यासरूपाबुद्धिर्विवक्षिता ततश्चप्रातीतिकोपाधिभेदेनैनेमित्तिकाव।
लोकितथामवच्छिन्नमध्यस्यचंद्रवदात्मनोभेदक्रियाप्रतीतावपिनतत्रतत्त्वशंकावकाशोपीतिदि
क् नन्वेवंसद्वस्तुविचारेणाधिष्ठानसाक्षात्कारेपिकिंफलमित्याशंक्यफलभूतमधिष्ठानस्वरूप
माह शिवेपरमानंदेपरप्रेमास्पदत्वात् यथाहुः तत्प्रेमात्मार्थमन्यत्रनैवमन्यार्थमात्मनि अत
स्तत्परमंतेनपरमानंदतात्मनइति आनंदोब्रह्मेतिश्रुतेश्च सच्चिदानंदात्मकंहिअधिष्ठानस्वरू
पंतच्चतदध्यस्तेघटादावपिसन्घटोभातिइष्यतेवेतिस्फुटंप्रतिभासतेदुःखस्याशुद्धंकामसंक
ल्पमित्यशुद्धविक्षेपात्मकराजसबुद्धिकार्यस्येष्टत्वव्यवहाराभावेपिसच्चिद्व्यवहारोऽस्त्येव किं
चआत्मानंदएवविक्षेपकोपाधिनिवृत्तौसत्त्वगुणेसमाधावौदासीन्येविषयेषुचसर्वत्रतत्तदानंदा
त्मनाऽऽविर्भवति तथाचश्रुतिः आनन्दाद्ध्येवखल्विमानिभूतानिजायंते आनन्देनजातानिजी ४४
वंतिआनंदंप्रयंत्यभिसंविशंतीति ततश्चसिद्धंसच्चिदानंदात्मनएववस्तुत्वमिति तथाचप्राती
तिकनामरूपात्मकोपाध्युपेक्षायांसच्चिदानंदआत्मासर्वदैवप्रकाशतइतिजिज्ञासुरुक्तस्सहेदिति २२

44

ननुउभयदृष्टोविवपरिणामिनोरज्ञानतत्कार्ययोःपरिणामेनस्वयमेवविनाशेसतिपुनरुद्भ।
वोनैवभविष्यतीत्यलं तन्नाशोपायेनेत्याशंक्यबीजपरंपरिवपरिणामेनाज्ञानपरंपराभवती
त्यतआह ॥ देहेंद्रियप्राणमनश्चिदात्मनांसंगादजस्रंपरिवर्ततेधियः वृत्तिस्तमोमूलतया
ऽलक्षणायावद्भवेत्तावदसौभवोद्भवः ॥ देहेन्द्रियप्राणमनश्चिदात्मनांसंगाहंदेहोहमित्या
दितादात्म्याध्यासात्कुतश्चैतत्तादात्म्याविवेकमूलादज्ञानलक्षणामामहंनजानामीत्येवंरूपा।
धियःबुद्धेर्वृत्तिःपरिवर्ततेपुनःपुनर्भवतीत्यर्थः नन्वेवंदेहाद्यहंकारस्याज्ञानप्रवर्तकत्वात्त
न्निवृत्त्यावाज्ञाननिवृत्तौमोक्षोभवतीतिसत्यं तथापितन्निवृत्तिस्तस्यप्रत्यक्षस्वतोभवतीतिकिं अहमोबुद्धिरेतेषु निवृत्तिः =
विषयेत्यतआह अजस्रादितिनिरंतरात्संगात्सुषुप्त्यादावपिबीजेवटवदज्ञानेस्वकारणेत
स्यावस्थितत्वादितिभावः ननुत्रिगुणात्मनोहंकारादज्ञानलक्षणावृत्तिःकथमित्यतआह त
मोमूलतयाआवरणात्मकतमोंशकार्यत्वेनपरिवर्ततइत्यर्थः येयंसंगादज्ञानलक्षणावृत्तिः
परिवर्ततेसायावद्भवेत्तावदसौदृश्योभवःसंसारोभवेत्विषयाज्ञाननिवृत्तिपर्यंतंतेननिव
र्ततेइतिभावः ॥ ननुविद्यावाकथमज्ञानंनिवर्तयेदित्यतआह ॥नेतिप्रमाणेननिराकृता

गी॰
टी॰
४५

खिलोऽस्त्रदासममास्वादितविद्वनाम्रतः त्यजेदशेषंजगदात्तसद्रसंपीत्वायथाम्भःप्रजहातितत्फ
लम् २४ सर्वोद्रेक्तविशेषणद्वयेनलब्धोविद्वानःशेषंजगत्त्यजेत्विस्मरेत् यतआत्तसद्रस
म् आत्तोगृहीतःसद्रसस्सच्चिदानन्दात्मकोरसोयस्मात् तत् रज्जुवद्रसग्गृहीत्वाअसद्रसंयाभुजंग न॰
वत्परिशिष्टंप्रातीतिकनामरूपात्मकंजगद्रुपेक्षेतेत्यर्थः तत्रदृष्टांतः यथानालिकेरद्राक्षादेः
फलस्यांभःरसंपीत्वात्वगस्थिमात्रावशेषंतत्फलंप्रजहातितद्वत् अम्भोविशेषणमपिआत्तसद्र
आस्वादितः स्व स्वादुः रसो यस्य संआत्तं नेतिप्रमाणेनं नेतिनेतीत्येवमादिवाक्येननिराकृतंप्रतीतिकत्वेनतिरस्कृतमखिलंसर्वं
दृश्यंयेनसः इदाममास्वादितविद्वनाम्रतः आत्तं आस्वादितंअनन्मृतंविद्वनाम्रतंचिदेकरसं।
45 मृतंयेनसः ॥ २४ ननुचिदात्मापिशरीरवद्विकारवान्स्यादित्यतआह ॥ कदाचिदात्मानम्रतोनजायतेन
हीयतेनापिविवर्द्धतेऽमरः निरस्तसर्वातिशयःसुखात्मकःस्वयंप्रभःसर्वगतोयमद्वयः २५
जायतेऽस्तिवर्द्धतेविपरिणमतेऽपक्षीयतेम्रियतेचेतिषड्भावविकाराः नैवकदाचिदपिशरीरव
दात्मनिनसन्तिकदाचित्क्वचित् अयमात्माकदाचिन्नम्रतःकदाचिन्नजायतइत्येवंप्रत्येकंसंबध्य ४५
तेअमरःअपरिणामीत्यर्थः अस्तित्वविकारप्रतिषेधस्तुविकारांतरनिषेधादेवसिध्यतिवास्तवी

एतम् अन्यभूतेपदार्थेयदन्यविभावनंसोध्यासइत्यर्थः यथाऽसर्पभूतेपिरज्ज्वादिकेऽहिविभा
वनंसर्पभावनाअध्यासः तद्वदीश्वरेपिजगत्जगद्भावनाऽध्यासइत्यन्वयः अपिशब्दउभय
त्रसंबंधनीयः ईश्वरशब्दस्तत्रजगद्रूपचिदात्ममात्रपरः ३७ इदानीमात्मन्यध्यासप्रकारमाह
विकल्पमायारहितेचिदात्मकेऽहंकारएषप्रथमःप्रकल्पितः अध्यासएवात्मनिसर्वकार
णंनिरामयेब्रह्मणिकेवलेपरे ३८ ॥ विकल्पेनाध्यासेनसहिताविकल्परूपावायामायातया
रहितेविकल्पस्यप्रातीतिकत्वेनवस्तुतो[illegible]भावात्स्वप्निप्रलययोश्चतत्प्रतीतेरप्यभावात् तयो
रवसानेजागरादौचिदात्मनिसाक्षिभूतेकूटस्थचैतन्येएषप्रसिद्धः एकोऽहंबहुस्यांब्राह्मणोह
मित्यादिव्यवहारहेतुः अहंकारःप्रथमःप्रकल्पितःमायायाःप्रथमंकार्यंजायते सर्वध्यास
एवसचसर्वकारणंसर्वस्यकार्यजातस्यकारणंअहंकारेणैवसर्वमात्मन्यध्यस्यते ईश्वराहंका
रोजीवाहंकारतन्मात्रादिव्यक्ताव्यक्तंसर्वंजगत्सृजति तस्यसर्वनियामकत्वस्वीकारात् तत
उत्पन्नाज्जीवाहंकारात्तन्मात्रादिनाखिलप्रपंचोत्पत्तिर्निरूपितासूक्ष्मशरीरनिरूपणेप्राक्
लौकिकव्यवहारानुसारेणजीवेश्वरादिभेदप्रकल्पनेपितस्याध्यासकार्यत्वेनाऽसंताभावएव

अतएवसाधारणेनाधिष्ठानविशेषणानिनिरामयादीनिनिरामयेआनंदरूपे ३८ नन्वहंकारोत्पत्तावा

पिकथंनानाकारजगदुत्पत्तिरित्यतआह ॥ इच्छादिरागादिसत्वादियर्मिकाःसद्योधियःसंसृतिहेत

रा॰गी॰ टी॰ ४७ पत्रे वः यथाप्रसुप्तौतदभावतःपरःस्वस्वरूपेणविभाव्यतेहिनः ३९॥ परेअसंगचिदात्मनिधियअहं

काराज्जायमानाअहंकाररूपावाबुद्धयःसद्यःसंसृतिहेतवः नत्वणएवसंसारोत्पादिकाभवंतीत्यर्थः

तथाचबुद्धेर्द्वैविध्यमाहुः चिच्छायावेशतोबुद्धेर्भानंधीस्तुद्विधास्थिता एकाऽहंकृतिरन्यास्यादं

47 तःकरणरूपिणीतिताःकुतोविचित्रजगद्धेतवइत्यतआह इच्छादीतिसत्वादयःसत्वप्रकाशप्रीति

प्रभृतयः सात्विकाः रागइच्छारागादयः इच्छाद्वेषप्रयत्नादयोराजसाः श्लोकेइच्छाशब्देनप्रतिहता

मोहादिरूपेणपरिणतेच्छागृह्यतेतामसानामेवपरिशेषात् ततश्चेच्छादयोमोहक्रोधेर्ष्यादयस्ता

मसागृह्यंते अत्रादिनासात्विकराजसतामसाःपदार्थाअपिगृह्यन्ते तेषामपिबुद्धिपरिणामत्वात्

तेइच्छादिरागादिसत्वादयोधर्माःपरिणामायासांताःततश्चसत्वगुणकार्यवैचित्र्यान्नासांविचित्रज ४७

गत्कारणत्वंघटतइतिभावः ननुपरस्मिन्नहंकारादिभिःसंसारोत्पत्तिश्चेन्नर्हिपरस्यापितत्कृतविका

रदुःखसंस्पर्शःस्यादेवेत्यतआह यथाप्रसुप्ताविति परस्तुआत्मासुप्तौबुद्ध्यभावतःहिप्रसिद्धंस्वस्वरू

पेणयथानःविभाव्यतेअस्माभिर्जीवैरनुभूयतेतथैवास्तिस्वप्नजागरयोरपिनकिंचिद्विकारदुः
खलेशेनलिप्यतेअयंभावः यथाश्येनस्यापलाशुपाधिनानीडान्निर्गत्यइतस्ततोभ्रांत्वाश्रान्तस्या
पलादिप्रशमेविश्रामार्थंनीडंप्रविश्यतत्रसुखमनुभवति तथापरस्यप्रकाशोजीवःस्वोपाधिभूत
याबुद्ध्यामृषाकल्पितयोःस्वप्नजागरयोर्भ्रांत्वाश्रांतःस्वकारणमायागुणप्रवाहेणलयोदयशा।
लिन्यांतस्यांबुद्धौतमसास्वकारणेविलीनायामज्ञानावृतोपिविश्रामार्थंजलनिमग्नदर्पणस्थज
लप्रतिबिंबोजलइवस्वबिंबभूतेपरस्मिन्संयुज्यपरमानंदमनुभवतिपरस्यात्मनःपरमानंद
त्वेश्रुत्यादिकमपिप्रमाणंदर्शितंप्राक् तथाचात्मास्वरूपेणबुद्ध्यभावात्तत्परिणामसंसारशून्यः
परमानंदरूपोयथानुभूतःपुनर्बालवेतालवन्मृषारजःसत्वोद्रेकेणस्वप्नजाग्रदाकारेणवि।
भूतायामपिबुद्धौतथैवास्तिनकिंचिद्विक्रियतेसाक्षिणस्तस्यज्ञेयसंस्पर्शाभावात् अध्यासस्या
धिष्ठानाविदूषकत्वाच्च अत्रयत्तदोर्नित्यसाहचर्यात्तथाशब्दाध्याहारः ५५ इदानींतत्वंपदार्थौ
परमात्मजीवकावित्युक्तयोरात्मजीवयोरुपाधिकृतंस्वरूपभेदंदर्शयति॥ अनाद्यविद्योद्भवबुद्धि
बिंबितोजीवःप्रकाशोयमितीर्यतेचितः आत्माधियःसाक्षितयापृथक्स्थितोबुद्ध्यापरिच्छिन्न·

पदः सएवाहं ४॰ अनाद्यविद्याप्रागुक्तानन्तउद्भूतायांबुद्धौबिंबितः अन्योन्यतादात्म्याध्यासेनतद्धर्मविशि
ष्टतयाजलेसूर्यस्येवतत्रप्रतिबिंबितोयःचितःआकाशवन्निःसंगतयाव्याप्तस्यसाक्षिचैतन्यस्यप्रका
शःसजीवइतिईर्यतेशास्त्रेषुकथ्यतेशास्त्रोक्तप्रवृत्तियोग्योव्यावहारिकोजीवोभवतीत्यर्थः सचव्या
ष्टिसमष्ट्युपाधिवैशिष्ट्यभेदेनक्रमाज्जीवेश्वरशब्दाभ्यांव्यवह्रियते साक्षितयाधियःपृथक्स्थितः
बिंबभूतंचैतन्यंआत्मेतीर्यते मूर्खैस्तुपतत्प्रतिबिंबस्यकर्तृत्वादिकमस्मिन्नध्यारोपयंति ईश्वरसा
क्षिवेऽस्मिन्नीश्वरशब्दवल्लक्षणयाजीवसाक्षिवेजीवशब्दोपिप्रयुज्यतएव तथाचजीवत्रैविध्यमाहुः अ
वच्छिन्नश्चिदाभासस्तृतीयःस्वप्नकल्पितः विज्ञेयस्त्रिविधोजीवस्तत्राद्यःपारमार्थिकइति आभासस्य
स्वप्नकल्पितत्वं स्थूलशरीराविवेकेंपदार्थमभिधायवाक्यार्थमाह बुद्ध्यापरिच्छिन्नेति हिप्रसिद्धम् अ
यमात्माब्रह्मेति क्षेत्रज्ञंचापिमांविद्धिसर्वक्षेत्रेषुभारतेत्येवंविधश्रुत्यादिषुसआत्मैवबुद्ध्याअपरिच्छि
न्नपरइतीर्यतेकूटस्थब्रह्मत्वेनप्रतिपाद्यतइत्यर्थः इतीर्यतइतिप्रत्येकंयोज्यंतथाचोक्तंतत्त्वमस्यादि
वाक्येषुअनयोरेवेशजीवसाक्षिरूपयोर्ब्रह्मात्मनोरैक्यंप्रतिपाद्यते बुद्धिचिदाभासयोस्तत्तानका
र्यत्वादैक्यज्ञानेनबाध्यतएवतत्सिद्धमिति तथाचरामहृदये साभासबुद्धेःकर्तृत्वमवच्छिन्नेविकारिणि

साक्षिण्यारोप्यते भ्रान्त्या जीवत्वं च तथा बुधैः आभासस्तु मृषा बुद्धिरविद्याकार्यमुच्यते अवच्छिन्नं तत
ष्टव्यावच्छेदस्तु विकल्पितः अवच्छिन्नस्य पूर्णेन एकत्वं प्रतिपद्यते तत्त्वमस्यादिवाक्यैश्च साभास
स्याहमस्तथेति इदानीं बालमार्गोविनालस्यैवमूलाज्ञानेः सत एव स्थितस्यास्य जगतश्चिद्रूपाधि
ष्ठानसत्तादिना स्वरूपसंपादकत्वेन प्रत्यक्तत्त्वाद्देहस्तस्तादात्म्यं कथ्यते ॥ चिद्बिम्बसाक्ष्यात्मधियोप्र
संगतस्त्वेकत्ववासादनलाक्तलोहवत् अन्योन्यमाधारवशात्प्रतीयते जडाजडत्वं च चिदात्मचे
तसोः ४८ ॥ चिन्मात्रिविंबः साक्ष्यात्मधीश्च एषां त्रयाणां प्रसंगतस्तु अहंकारेणान्योन्यतादात्म्याध्या
सादेव अनलाक्तलोहवज्जगत्प्रतीयते प्रत्यक्त्वं भवति चिदात्मचेतसोर्जडाजडत्वं च प्रतीयते अत्रा
न्तशब्दः कारणान्तरव्यावृत्तिबोधकः तत्तादात्म्यं ज्ञातव्यं तत्राह एकत्ववासात् ततः कृतात् अन्यो
न्यमाधारभावात् अयं भावः तावन्मायावारविलासिनी वपरपुरुषैः सतोभावानुपदर्शयित
मुघनास्वप्रलीनानां बालवेतालमरुमरीचिकोदकसन्निभानां साभासबुद्धिरूपाणां जीवानां
स्वादृष्टवशेन तथा तथोत्पन्नमानानां स्वरूपनिष्पन्नये स्वं ब्रह्म तत्र तत्राहमेव ततस्साक्षिवे
न परिकल्पयति ततश्च भवति चिद्बिम्बसाक्ष्यात्मधियामेकत्ववासः स च धीपरिणामेषु धीवृत्ती

रा॰
गी॰टी॰
५८

न्द्रियशरीरादिषु जायमानस्तेषां पूर्वपूर्वपरिणामत्वेन पूर्वपूर्वपरिणामपूर्वकः यथा मूर्लत्तानस्य जी
र्वदृष्टवशेनेश्वरतोभितस्य बुद्धिरूपपरिणामो भवति स च द्विविधः इदमित्थमेव नान्यथेति सर्वबुद्धि
परिणामशक्तिनियामकेन साधारणभोग्यत्वापादकः समष्टिरूपो महत्त्वरूपवाच्यो हिरण्यगर्भोपा
धिरेकः द्वितीयस्तु व्यष्टिरूपस्तत्तद्वासनामयो नियतशक्तिर्जीवोपाधिः तस्य च किंचिदभूद्भवति
भविष्यतीत्येवं सामान्यविशेषरूपेणानुद्भूतरूपपदार्थपरिकल्पकः कामादिरूपो बहुधोहनिरू वि॰
पः परिणामो भवति द्वितीयश्च नियतभोगप्रदप्रारब्धविशेषसहकारेण सह विशेषपदार्थस्वरूपे।
ण परिणामी इन्द्रियरूपपरिणामो भवति तेषामिन्द्रियाणां च तथैव वालवेतालवदन्यत्वेन गृह्य
माणशरीरादित्वेणांतनिखिलजगद्रूपोऽयं परिणामो भवति स्रतान्नमितादिपदार्थस्य लेशपूर्व
स्येन्द्रियस्य तदाकारपरिणामाभावादनुद्भूतस्वरूपत्वेन साक्षिणैकत्रवासाभावान्न प्रत्यक्षं नचान्य
प्रत्यक्षविषयत्वेन तेषां पदार्थानां पृथक्सत्त्वं स्वीकार्यम् तत्तद्देशकालादिनियतसदृशभोगप्रद ५८
प्रारब्धवशेनान्यदीयेन्द्रियाणां तथा परिणामे नान्यप्रत्यक्षविषयत्वेऽपि तेषां पदार्थानां सरः प्रति-
बिंबितत्वमादेरिव पृथक्सत्ताभावात् तथा चोक्तबुद्धितत्परिणामानां व्यापकत्वेन साक्षिणैकत्रवा

49

सोनामपूर्वोक्तमायापरिणामेनोद्भूतत्वमिति सिद्धम् केचित्तु जागतपदार्थानां व्यावहारिकं
पृथक्त्वं स्वीकृत्य प्रमाता जीवः प्रमाणं हृत्यवच्छिन्नं चैतन्यं प्रमेयं तु घटाद्यवच्छिन्नं चैतन्यं तत्र
वृत्तिर्नाम चक्षुरादिद्वारा विषयदेशं गतायां बुद्धेर्विषयाकारपरिणामः तत्र वृत्तौ विषयचैतन्यं प्र-
तिफलति स एव प्रतिबिम्बः फलचैतन्यमित्युच्यते यथा च योग्यविषयत्वे सति विषयचैतन्यस्य
प्रमाणचैतन्याभिन्नत्वलक्षणं प्रत्यक्षं जायते तत्र वृत्तिविषययोर्युगपदेकदेशस्थत्वेन स्वप्रतिबिं-
बितचैतन्यभेदाप्रयोजकत्वादित्याहुः तदपि पारमार्थिकसत्ता स्वीकारात्सममेवास्माकं मायिक-
पदार्थानामेषां स्वाप्नपदार्थानामिवाबाधदशायां व्यावहारिकसत्त्वस्यास्माभिरपि स्वीकरणीय-
त्वात् ततश्चैकत्रवासाच्चिद्विवसाहचर्यात्मधियामन्योन्यमाश्रयत्वं भवति तथा तथा परिणमन्त्या
बुद्धौ प्रतिसंक्रान्तसत्तादिरूपस्वप्रतिबिंबप्रवर्तकस्य साक्ष्यात्मनस्तत्तद्विवर्ताधिष्ठानत्वेन स्वप्र
प्रतिबिंबसहितबुद्धेराश्रयत्वात् प्रतिबिंबसहितबुद्धेश्च स्वसाक्षित्वेनात्मावच्छेदकत्वात्तदाश्र-
यत्वम् तेन चान्योन्याधारत्ववशेन प्रसंगस्तादात्म्याध्यासः स चातद्रूपे स्वास्मिंस्तद्रूपाभिनिवेशः
ततश्चान्योन्यधर्माध्यासे सति यथा लोहः स्वयमप्रत्यक्षोपि तिमिरे प्रत्यक्षवह्नितादात्म्येन प्रत्यक्षो

भवति तथा यस्मात्तादपरोक्षाद्ब्रह्मणोतिसूक्ष्मप्रत्यक्षस्वभावब्रह्मतादात्म्याध्यासेन बालवेतालवद्
रा॰ ब्रह्मापि बुद्धितत्परिणामभूतंप्रपंचजगत्प्रत्यक्षंभवति चिदात्मचेतसोः साक्षिबुद्ध्योर्जडाजडत्वंच प्रतीयते
गी॰टी॰ तत्र साक्षिणि बुद्धिस्थितजाड्याध्यासेन अहंनजानामीति बुद्धिपरिणामेंद्रियशरीरादिजाड्याध्या।
५॰ सेन च न शृणोमि स्थूलोऽहं घटो न भातीत्येवमादिजडत्वंप्रतीयते तत्र बुद्धितत्परिणामेषु साक्षिचैत
न्याध्यासेन तु जानामि शृणोमि अहंभामि घटो भातीत्येवमादिज्ञानस्फुरत्तान्यतररूपेणाजडत्वंप्र
50 तीयते ननु शरीरादेर्निखिलप्रपंचस्य बुद्धिपरिणामत्वेन साक्षिण्यध्यस्तत्वे अहंप्रत्ययवेद्यत्वमेव
स्यान्न तु पुरःस्थितत्वेनेदंप्रत्ययवेद्यत्वमिति चेन्न तथाध्यस्तत्वस्याहंप्रत्ययाप्रयोजकत्वात् किंतु
स्वप्नवद्यस्य पदार्थस्य यदाकारानुभवसंस्कारसहकृतबुद्धिपरिणामत्वं तस्य तदाकारानुभववि
षयत्वमित्येवानुगतं नियामकम् बुद्धेस्त्वहमाद्याकारानुभवविषयत्वं तस्या एव मूलाज्ञाने प्र।
लीनत्वात्तत्संस्कारसहकृतत्वेन तथैवोदय इत्यविवादः नन्वेवं स्वप्नजागरयोरुभयोरपि मिथ्या ५०
त्वे को विशेष इति चेच्छृणु जागरस्य दृश्यमानसत्त्वावस्थत्वेन तत्र जीवानां जन्मांतरीयवास
नाः समष्ट्यंशानुसारतो नियतपदार्थाकारेण परिस्फुरंतीति तस्य चानुभवस्य यत्र त्वस्य सर्वमात्मै

वाक्यत्वकेनकंपश्येदितिश्रुतस्तत्त्वोवाधोब्रह्मसाक्षात्कारानंतरमेवभवति नतुततःप्राक्यत्रद्वि
द्वैतमिवभवतितदितरइतरंपश्यतीतिश्रुतेः अतएवजाग्रत्प्रपंचेप्रत्यक्षादिज्ञानानांव्यावहा
रिकंप्रामाण्यंपरिकल्प्यते नातिचप्रत्यक्षानुमानोपमानागमार्थापत्त्यनुपलब्धिभेदात्षडेव
तेषांप्रामाण्यंतुसंवादिप्रवृत्त्यनुकूलंतद्वतितत्प्रकारकत्वमेवतच्चस्वतएवोत्पद्यते अप्रामाण्य
दोषस्यैवात्रान्यस्यकस्यापिप्रयोजकत्वास्वीकारात् गृह्यतेचस्वतएवतत्रुद्देदोषाभावेसतिस्वा·
श्रयज्ञानग्राहकसाक्षिचैतन्यातिरिक्तस्यकस्याप्यनपेक्षणात् संशयविपर्ययादिरूपेणाप्रामा
ण्यंतुपरतएवगृह्यते विसंवादिलिंगकानुमित्यादिविषयत्वात् स्वप्नस्यापिनिद्रादूषितरजोव·
स्थावेनतत्रजाग्रत्प्रपंचवासनामात्रेणैवप्रारब्धवशादनियतंशुक्तिरूप्यादिवत्प्रातिभासिके
जगत्स्फुरतीतितत्रप्रामाण्यमितिजागराद्विशेषः पारमार्थिकंतुप्रामाण्यंसदेवसोम्येदमग्रआ
सीदित्यादीनांतत्त्वमसीत्यंतानामेवतद्विषयस्यजीवपरैक्यस्यकालत्रयावाध्यत्वात् सुषुप्तौतत
मसासर्वप्रविलापनमित्येवमनन्यत्स्वयमूह्यम् तदेवंत्रिगुणमाययाचिदेवजगदिवप्रतिभातीति
सिद्धम् तथाचसंग्रहः ब्रह्मण्येवस्थितामायाविक्षेपावृतिरूपिणी आवृत्याखंडतांतस्मिन्जगज्जी

रा॰
गी॰टी॰
५१

वोप्रकल्पयेत् तत्त्वमसीतीजीवस्तधीस्थोर्बिंबोद्भिमाद्विणः जगद्वीपविणामस्तु विनादात्म्येनजाय।
तेइति ५१ तदित्थंतादात्म्याध्यासस्यैवसंसारकारणत्वेनतन्निवृत्त्यैवसंसारनिवृत्तिरितिसिद्धम् एवं
तन्निवृत्तिरेवकुतइत्यतआह ॥ गुरोःसकाशादपिवेदवाक्यतःसंजातविद्यानुभवोनिरीक्ष्यतम् ॥
स्वात्मानमात्मस्थमुपाधिवर्जितंत्यजेदशेषंजडमात्मगोचरम् ५२ आत्मनिवात्मत्वेनालमदृशेशरी
रेसत्तादिप्रदत्वेनस्थितं यद्वास्वप्रकाशत्वेनान्यनिरपेक्षतयानन्याश्रितं उपाधिर्नामरूपात्मकम
शेषंजगतत्तद्वर्जितंशुद्धमित्यर्थः स्वात्मानंसच्चिदानंदंनिरीक्ष्यसाक्षात्कृत्यआत्मगोचरमात्मन्य·
ध्यस्तमशेषंजडंप्रागुक्तोपाधिरूपंत्यजेत् उपेक्षेतमायिकस्यतस्यप्रतीतिमात्रशरीरत्वेनप्रागेवभावात्
यथाहुः उपेक्ष्यनामरूपेद्वेसच्चिदानंदवस्तुनि समाधिंसर्वदाकुर्याद्धृदयेवाथवाबहिरिति साक्षा
५ त्कारएवकुतइत्यतआह संजातविद्यानुभवः संजातःप्रागुक्तवृत्तिरूपविद्यायाअनुभवोयस्य·
सःसएवकुतइत्यतआह वेदवाक्यतः तत्त्वमसीत्यादिमहावाक्यार्थविचारादित्यर्थः सएवकु·
तइत्यतआह गुरोःसकाशादपिशब्देनव्युत्पन्नस्यस्वतोपि यद्वाव्युत्पन्नेनस्वयंविचारितेपिवेदवाक्ये ५१
गुर्वपेक्षावश्यकीतिबोधनार्थंवाक्यविशेषणम् गुरोःसकाशादपिकृतादिति ५२ प्रकाशरूपो

पुण

हमजोहमव्ययःसकृद्विभातोहमतीवनिर्मलः विशुद्धविज्ञानमयोनिरामयःसंपूर्णआनंदम
योहमक्रियः ४३ सदैवमुक्तोहमचिंत्यशक्तिमानतींद्रियज्ञानमविक्रियात्मकः अनंतपारोहम।
हर्निशंबुधैर्विभावितोहंहृदिवेदवादिभिः ४४ एवंसदात्मानमखंडितात्मनाविभाव्यमानस्यविशु
द्धभावना हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजि ४५ एवंपूर्वोक्तश्लोकद्व
योक्तप्रकारेण आत्मानमखंडितात्मनाअपरिछिन्नरूपेणसदासर्वदाविभाव्यमानस्यविभाव
यतःपुंसोजायमानाविशुद्धभावनाविशुद्धंब्रह्मभाव्यतेनयेतिविशुद्धंनाविद्याहन्तिः अविद्याकार भाव५
कैः अहंकर्तादिकार्यवर्गेणसहैवअचिरेणशीघ्रमेवहन्याद्विनाशयेत् विभाव्यमानस्येत्यत्रार्थेत्वा
त्कर्तरियक् यद्वामानशब्दात्मनेपदीयोऽर्थप्राप्यश्च मानस्यमानवतःश्रुतियुक्त्यनुभवतःपुंसो व५
जायमानाविशुद्धभावनाआत्मानंविभाव्यसाक्षात्कृत्याविद्यांहन्यादित्यन्वयः अत्रत्यागवदेवा
न्वेति तत्रदृष्टांतः रुजिरोगेउपासितंरसायनंसिद्धौषधंयद्वत्सोपद्रवांरुजंनिहन्यात्तद्वद्वि
द्यासकार्यामविद्यांनिहंतीतिभावः एवंकथमित्यतआह प्रकाशरूपः अहंसर्वावभासकत्वा
त्रूपः ननुवह्निरेवस्यादित्यतआह अजः ननुनैयायिकाभिमततत्परमाणुरूपएवस्यादित्यत

© Dharmartha Trust J&K. Digitized by eGangotri

रा॰
गी॰टी॰
५२

52

आह अद्वयः छायापिशाचायमानस्य मायातत्कार्यस्य वस्तुनि द्वित्वाप्रयोजकत्वात् ननु वस्तुनो
न्यस्याभावात्सजातीयविजातीयभेदाभावेपि स्वगतभेदः स्यादेव तथा च श्रुतिः पादोऽस्य विश्वाभू
तानि त्रिपादस्ति स्वयंप्रभुरितीत्यत आह सकृद्विभातः निरवयवत्वादेकदैवावभासमानः
अवयवश्रुतेस्तु प्रपंचवासनावासितं प्रतिनिष्प्रपंचब्रह्मप्रतिपादने तात्पर्यं न त्ववयवप्रतिपा
दने ननु प्रपंचस्य ब्रह्मणि भेदप्रयोजकत्वाभावेपि कालुष्यापादकत्वं तु स्यादेवेत्यत आह
अतीवनिर्मलः मायातत्कार्यस्यास्याविचाररमणीयत्वेन गगने नीलत्वादेरिव कालुष्या-
पादकत्वासंभवात् तदेवाह विशुद्धविज्ञानमय इति ननु विज्ञानस्येंद्रियजन्यत्वमित्यत आ।
न्द्रि ह अतीँयज्ञानमिति ननु विज्ञानरूपेणावभासमानस्यात्मनोऽहं दुःखीत्यादिप्रतीतेः कथं शु
द्धत्वमित्यत आह निरामयः अहं दुःखीत्यादिप्रतीतेः शरीराहंकारविषयत्वात् ननु शरी
रव्यतिरेकेणात्मन एवाभावात्तयाऽहंकारः पारमार्थिक इँ आह संपूर्णः सर्वव्यापकः सर्व ५२
परिच्छेदशून्यः तदेवाह अनंतपारः अंतः कालतः परिच्छेदः पारश्च देशतः न विद्येते अंत
पारौ यस्य सः अद्वयादिपदैर्वस्तुपरिच्छेदोपि निराकृत एव देशकालवस्तुपरिच्छेदशून्य इ

त्यत

तिभावः अतएवाऽक्रियः क्रियाहि चलनात्मिका परिच्छिन्नधर्मः अतएवाविक्रियात्मकः क्रियावतो
हि विकारः सत्वास्तित्वादिरूपः षड्विधउक्तएवं ननु तथापि किमर्थं विभाव्यस इत्यत आह आनन्दम-
यः ऊत इत्यत आह सदैवमुक्तः विशुद्धविज्ञानानन्दरूपे मयि वस्तुनि रज्जौ भुजंगस्येवाध्यस्तस्य जड-
त्वविकारादिरूपस्य बंधस्यात्यंताभावात् नन्वेवमात्मनो विशुद्धविमुक्तविज्ञानानंदस्वरूपत्वेक
स्य संसारः स्यात् कथं वा स्यादित्यत आह अचिंत्यशक्तिमान् नन्वेवमात्मनोविशुद्धविमुक्तविज्ञाना
नंदस्वरूपत्वे कस्य संसारः स्यात् अचिंत्याऽनिर्वचनीया मायारूपा या शक्तिः सर्वजगज्जीवभ्रमाव
भाससामर्थ्यं तद्वान्स्वयं विशुद्धविज्ञानानंदस्वरूपोपि स्वाचिंत्यशक्त्या मृषैव नामरूपात्मकजग
दिवावभासमानोऽहमिति भावः यद्वा निर्विशेषत्वादचिंत्यो गोचरः शक्तिमांश्चेति कर्मधारयो
स्तु तथा च श्रुतयः यन्मनसा न मनुते यतो वाचो निवर्तंते अप्राप्य मनसा सहेत्यादयः मनसैवा-
नुद्रष्टव्यं दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरित्यादिश्रुतयस्तु दशमस्त्वमसीतिवाक्ये
नेव तत्त्वमसीत्यादिवाक्येनाविधिकभ्रमापकरणपूर्वकनित्यापरोक्षात्मवस्तुसाक्षात्कारजनने
मनननिदिध्यासनसंस्कृतस्य मनसः सहकारित्वमात्रं बोधयंतीति तथा च सर्वे वेदा यत्पदमामनंति

रा·
गी·टी
५२

53

तेनैवौपनिषदं पुरुषं पृच्छामीत्यनेन वेदविन्मनुते तेनं ब्रह्म तं तमित्यादिश्रुतयः सामंजस्येनोपपद्यंते यद्वा·
आत्मनः स्वयंप्रकाशत्वेऽप्येतन्मनोरूपस्यागोचरत्वं तावन्मात्रनन्यतया घटादेरिव स्वाकारवृत्तिप्रतिफ
लितविषयत्वेनैतन्मनोव्याप्यत्वाभावः गोचरत्वं तस्याजितात्मबुद्धिदोषस्य न भाति तेनास्मिन्कूटस्थस्य त्वा
वरणात्मकाज्ञानस्य तिमिररोगसदृशस्य विहृतबुद्धिदोषस्य च विक्षेपकाविद्याभागाद्याभासरूपस्य
निवृत्त्यर्थमेव सदा प्रवर्तमानया खंडाकारवृत्त्या व्याप्यत्वमिति पूर्वोक्तद्विविधश्रुतिविरोधः तथा·
चोक्तम् फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितं ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षितेति
शक्तिमानितितद्व्याख्यातम् अत एव वेदविद्भिरुपनिषदर्थविद्भिर्बुधैर्विद्वद्भिर्मायिकनामरूपे·
उपेक्ष्य हृदये ब्रह्मनिशमहोरात्रं सच्चिदानंदात्मतया विभावितः चित्तैकाग्र्येणानुभूतो ह्ययमित्य
र्थः अत्रासकृदहं शब्दप्रयोगस्तु तदिदं प्रतीतिविषययोः परोक्षदृश्यत्वयोरत्यंतव्यवच्छेदार्थः ४५
इदानीमत्यंतनिर्मलस्वांतस्य जन्मांतराभ्यासवतो निदिध्यासनप्रयत्नं विनापि श्रवणमननाभ्यां ५२
विद्योत्पत्तिरिस्यैर्थ्यमनस्य तत्कथादौ कथंचिदुत्साहेपि निदिध्यासनं विना देहात्मत्वस्य रात्मत्वदार्ढ्य
बोधः समाप्यत इत्यपक्वपरिपक्वबोधरूपाया विद्यायामुत्पत्तेरंतिममतोपीद्वजीवन्मुक्तस्याया

रणकारणमनोनाशवासनाक्षयसाधनत्वाच्च निदिध्यासनस्य तन्निरूपयति ॥ विविक्त आसीन उपारतें
द्रियो विनिर्जितात्मा विमलांतराशयः विभावयेदेकमनन्यसाधनो विज्ञानदृक्केवलमात्मसं।
स्थितः ४४ एकमखंडं वस्तु विभावयेत् किंतदेकमित्यत आह विज्ञानदृक् विज्ञानं पश्यतीति वि
भावनायां ज्ञानैकालंबन इत्यर्थः ननु विभावनीयस्यान्यत्वापात इत्यत आह केवलमात्मसंस्थितः
अवच्छेदस्यावास्तवत्वेनाखंडज्ञानस्यैवात्मत्वात् ननु कर्मादिसाधनांतरमप्यपेक्षणीयमित्यत आ
ह अनन्यसाधनः निदिध्यासनेतरसाधनशून्यः विद्यानिश्चयवति तदनुभवस्थैर्यार्थं निदिध्या
सनप्रवृत्ते पुरुषे कर्मादीनां कृतकृत्यत्वाद्विदुषस्तस्य विधिकिंकरत्वाभावाच्च अत्र च ध्यानसमा
धिशब्दनिर्देशे निदिध्यासने विक्षेपाभावोपेक्षित इत्यत आह विविक्त इत्यादि एकांते सर्ववि
क्षेपशून्यदेश इति यावत् आसीनः बद्धासनः शरीरकृतविक्षेपशून्य इत्यर्थः उपारतेंद्रियः निव
र्तितेन्द्रियः इंद्रियकृतविक्षेपशून्य इत्यर्थः विनिर्जितात्मा जितचित्तः चित्तनिरोधपर इति भावः
एतावता व्याख्यानश्लोकेन बहुविषयपरिणामपरित्यागेन मनसो निरिंधनाकारपरिणामरूपस्य
मनोनाशस्य साधनमष्टांगयोगोर्थादुक्तो वेदितव्यः योगं तदंगानि च पतंजलिः सूत्रयामास ॥

रा.
गी.टी
५४

54

योगश्चित्तवृत्तिनिरोधः यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावंगानि तेषु
च अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि निय
माः २ स्थिरसुखमासनं ३ तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः ४ स्वस्वविषया
संयोगे चित्तस्य स्वरूपानुकार इवेंद्रियाणां प्रत्याहारः ५ इंद्रियाणां स्वस्वविषयाभिमुखप्रवृत्त्यभा
वेन चित्तस्वरूपानुसारित्वं प्रत्याहार इत्यर्थः ततश्चेंद्रियाणां स्वातंत्र्याभावेन स्वकरश्चित्तवृत्ति
निरोधः ५ देशबंधश्चित्तस्य धारणा ६ आधारनाभिचक्रादौ चिदात्मनि वा देशे बंधः स्थापनं ६
तत्र प्रत्ययैकतानता ध्यानम् ७ तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ८ तेषु विशेषं च
सूत्रयामास त्रयमंतरंगं पूर्वेभ्य इति धारणादित्रयं पूर्वयमाद्यपेक्षया संप्रज्ञातसमाधेरंतरंगसा का
धनं तत्स्वरूपनिष्पादनादित्यर्थः सिद्धस्य च संप्रज्ञातसमाधेरसंप्रज्ञातांगत्वं चाह तस्यापि निरोधे
सर्वनिरोधान्निर्बीजः समाधिरिति अयं भावः चित्तस्य पंच भूमिका भवंति क्षिप्तं मूढं विक्षिप्तमे· ५४
काग्रं निरुद्धं चेति तत्रासुरसंपल्लोकशास्त्रदेहवासनाभिः क्षिप्यमाणं मनः क्षिप्तं निद्रातंद्रादिग्र·
स्तं मूढम् अत्रोभयत्र समाधिशंकानास्ति विक्षिप्तं तु क्षिप्ताद्विशिष्टं कादाचित्कध्यानयुक्तं तत्र च·

१ = शान्तः पूर्वप्रत्यय उदितो ३ परप्रत्ययः एकवस्तुविषयत्वेन तुल्यौ

समाधिप्रारंभ एव विक्षेपाधिकात्तु समाधिः क्लिश्यति शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रता
परिणाम इति सूत्रितलक्षणायामेकाग्रतायां तु संप्रज्ञातसमाधिर्भवति स च कामादिहृदय।
स्थितादिदृष्टाहमिति दृश्यानुरूपेण स्वप्रकाशाखण्डचिदात्माहमिति शब्दानुरूपेण अखण्डचिदा
१५ त्मानमहं भावयामीति कर्त्रादिरूपेण वा विकल्पेन सहितत्वात् सविकल्प इत्युच्यते एतदभ्यासे ता
च निद्राविक्षेपौ रागादिकृतस्तब्धत्वरूपं कषायं विजानीयात् समप्राप्तं न चालयेत् नास्वादयेद्रसं
तत्र निःसंगः प्रज्ञया भवेदिति एतत्स्थैर्यबलेन योगिनो निर्विकल्पसमाधेर्भूमिका निरुद्धाख्या ड
भवति स चायं भूमिकात्रयात्मकव्युत्थानजन्यसंस्कारस्य तिरस्कृतत्वेन प्रशान्तवाहिन्येव तत्
त्रायं स्थितप्रज्ञो भवति अन्तर्धानादिसिद्धिहेतुभौतिकभूतेन्द्रियाद्यालंबनसमाधिषु तु
नात्मविदामादरः तेषामन्तरायत्वात् तथा च सूत्रम् ते समाधावुपसर्गा व्युत्थाने सिद्धय इति उ
क्तं च वासिष्ठे श्रीरामः जीवन्मुक्तिशरीराणां कथमात्मविदां वर शक्तयो नेह दृश्यन्ते आका
शगमनादिकाः वसिष्ठः द्रव्यमन्त्रक्रियाकालयुक्तयः साधुसिद्धिदाः परमात्मपदप्राप्तौ नोपकु
र्वन्ति काश्चन अनात्मविदमुक्तोऽपि सिद्धिजालानि वाञ्छति नात्मज्ञस्यैव विषय आत्मज्ञो ह्यात्ममात्र

कषायः सविक
ल्पानन्दास्वादस्त्रे
ति चत्वारो विघ्नाः
सन्ति यथाहुः लये
संबोधयेच्चित्तं वि
क्षिप्तं शमयेत्पुनः
स॰

न॰

त्क नकेचनतरङ्गावाततत्त्वंरंजयंत्यमी नागरंनागरीकांतंकुग्रामललनाइव अपिशीतरुचावर्केस्त
तीक्ष्णेचेंदुमंडले अप्यधःप्रसरत्यग्रेजीवन्मुक्तोनविस्मयीति वासनाक्षयंविनामनोनाशोनजाय
तइत्यतआह विमलांतर्दशायइति यंनस्पृशतिवासनइत्यर्थः तदुक्तंवासिष्ठे द्वेबीजेचित्तवृक्षस्य
वृत्तिव्रततिधारिणः एकंप्राणपरिस्पंदोद्वितीयंदृढवासनेति सत्संगोवासनात्यागोऽध्यात्म
विद्याविचारणं प्राणस्पंदनिरोधश्चेत्युपायास्तेनतेजयेइति तत्वज्ञानंमनोनाशोवासनाक्षयए
वच मिथःकारणतांगत्वादुःसाध्यानिभवन्तिहि समकालंचिराभ्यस्ताभवन्तिफलदायिनइ
तिच नचमुमुक्षुणाश्रवणादिभिर्विदेहमुक्त्यर्थंतत्वज्ञानमेवाभ्यस्यतेतत्सिद्धौचजीवन्मुक्त्य
र्थंयोगाभ्यासादिनामनोनाशवासनाक्षयावेवाभ्यस्येतेइतितेषांत्रयाणांसमकालाभ्यासनि
यमःसंभवतीतिवाच्यम् प्रधानोपसर्जनभावेनतत्संभवात् एवंमुमुक्षोःसाधनान्मुक्तिसाध
नेनतत्वज्ञानंप्रधानंमनोनाशवासनाक्षयौतु वैराग्यादिसाधनचतुष्टयरूपेणतत्वज्ञानार्थतयो
पसर्जनभूतौज्ञानोत्पत्तेःपश्चात्तुविदुषःसाक्षाच्चित्तविश्रांतिहेतुतयामनोनाशवासनाक्षयौ
प्रधानंतत्वज्ञानंतुप्राकसिद्धमेव तदुक्तं तच्चिंतनंतत्कथनमन्योन्यंतत्प्रबोधनं एतदेकपर ५५

त्वं च ज्ञानाभ्यासं विदुर्बुधा इत्येवमभ्यस्यमानमुपसर्जनमेवेति ग्रन्थेनोक्तम् तस्माद्राघववयत्नेन·
पौरुषेण विवेकिना भोगेच्छां दूरतस्त्यक्त्वा त्रयमेतत्समाश्रयेदिति अस्यार्थः यत एषां तत्त्वज्ञा।
नादीनां समकालाभ्यस्तानामेव स्वरूपं फलं च सिध्यति तस्माद्विवेकिना प्रयत्नेन पुरुष एत
त्त्रयं समाश्रयेत् तत्त्वैकमिति भावः तत्त्वज्ञानस्य श्रवणादिकं साधनं मनोनाशस्य योगः
वासनाक्षयस्य प्रतिकूलभावनेति विभज्य निश्चयो विवेकः येन केनाप्युपायेन संपादयिष्याम्ये
वेत्युत्साहः पौरुषः प्रयत्नः चित्तेन्द्रियशरीराणां सर्वेषां हन्तॄणां वात्याया इव विलोभकत्वेन मु
मुक्षोरत्यंतानिष्टत्वाद्भोगेच्छाया अवश्यत्याज्यत्वम् इन्द्रियाणां शद्वाँविषयैः क्षणसंबंधरूपेण दि˅
भोगेन चन्दनादिवत्स्मरणासंभवाद्विषयाणां सातिशयत्वेन च स्वल्पायामपि तस्याहूतेन वह्ने
त्य˅ रिव प्रौढहृद्धेश्वनोपेक्षणीयतेति बोधनाय दूरत इत्युक्तम् तदुक्तम् न जातु कामः कामा·
नामुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते इति धूमेनाव्रियते वह्निर्यथा
दर्शो मलेन च यथोल्वेनावृतो गर्भस्तथा तेनेदमावृतम् आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरि
णा कामरूपेण कौंतेय दुष्पूरेणानलेन चेति च भोगेच्छात्यागोपायस्तु वासनाक्षयोपाय एव

व तत्रकावासनाकस्यतत्क्षयोपायश्चेतिचेद्वक्ष्य एववसिष्ठादिवाक्यानि दृढवासनयात्यक्तपूर्वापरवि
चारणम् यदादानंपदार्थस्यवासनासाप्रकीर्तिता १ भावितंतीव्रवेगेनवस्तुयन्निश्चयात्मना पु
मांस्तद्धिभवेच्छीघ्रंज्ञेयंभ्रमरकीटवदिति स्वप्नरज्जुभुजंगादेरिवास्यसंसारभ्रमस्यावभासहेतुः
संस्कारोवासनेत्यर्थः तन्नाशोपायायथा दोषदर्शनसत्संगसंगत्यागात्मबोधतः प्रतीपवास॰
नाचिन्तनिरोधैर्वासनाक्षयइति स्वकीयंमलिनवासनादोषंपरकीयदोषवत्सम्यग्ज्ञात्वायथा
यथंदोषदर्शनादिभिर्विनाशयेत् तदुक्तं यथासुनिपुणःकश्चित्परदोषेक्षणेरतः तथाचेन्नि॰ ले४
पुणःस्वेषुकोनमुच्येतबंधनादिति तत्रलोकवासनयाजंतोर्देहवासनयापिच शास्त्रवासन॰
याज्ञानंयथावन्नैवजायतेइतित्रिस्रोवासनाः दंभोदर्पोभिमानश्चक्रोधःपारुष्यमेवच अज्ञानं।
चाभिजातस्यपार्थसंपदमासुरीमित्येवमभिहिताऽसुरसंपत् योषित्पुत्रादिविषयाभिलाषाश्च
मलिनवासनाद्रष्टव्याः सर्वेजनायथामांननिंदंतियथास्तुवंतितथैवाचरिष्यामीत्यभिनिवे॰ ५५
शोलोकवासनासाचविनस्यांतर्मुखत्वेप्रतिबंधः एवमन्याअपिज्ञासांनानाविधत्वःस्वप्रदर्शने
तुप्रसिद्धमेव किंच नकेनापिसंपादयितुंशक्यंते यथाश्रीरामस्यसीतायाश्चरावणहरणादिना

56

तीव्रो जनापवादः संप्रवृत्तः को न्यो लोकमाराधयिष्यति किंचान्यदेशकुलादिविशिष्टदेवतादिनिंदा
परस्परं जनेषु प्रसिद्धैव अतएवोक्तम् विघ्नेन खलु कश्चिदुपायः सर्वलोकपरितोषकरो यः सर्व
थास्वहितमाचरणीयं किं करिष्यति जनो बहुजल्प इति व्यसनत्रयात्मिका शास्त्रवासनापि द्विः
संपाद्यैव बहुपाठव्यसनं यथा तैत्तिरीयब्राह्मणे भरद्वाजो हि त्रिभिः पुरुषायुषत्रयेण बहून्वेदा
नधीत्येन्द्रेण वरं अर्थायुषि प्रलोभितस्तत्रापि परिशिष्टवेदाध्ययनाय मे वर्षकारेति बहुशास्त्रव्यसनं
ना॰ यथा दुर्वासा बहुविधशास्त्रपुस्तकभारैः सह मं देवं नमस्कर्तुं मागतस्तं भायां नारदेन मुनि ना स॰
भारवाहीति गर्दभसाम्यमापादितः सन्कोपात्पुस्तकानि लवणार्णवे परित्यज्य महादेवोपदेशात्म ल॰
विद्यायां प्रवृत्त इति अत्मविद्यानवहिर्मुखस्य गुरुभक्तस्य न वेदशास्त्रमात्रेणोत्पद्यते तथा च श्रु
तिः नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेनेति अन्यच्च बहुशास्त्रकथाकंथारोमंथेन
वृथैव किं अन्वेष्टव्यं प्रयत्नेन तत्त्वज्ञैर्ज्योतिरांतरमिति अनुष्ठानव्यसनं यथा वासिष्ठे दाशूरोऽसं
नश्रद्धा जाड्येनानुष्ठानाय शुद्धप्रदेशं भ्रमैर्न क्वाप्युपलभ्य वृक्षशाखामारुह्य तस्थाविति श्री
तित्रयरूपादेहवासनापि द्विःखपरैव चैतन्यविशिष्टदेहमात्रमात्मेति प्राकृतादीनामात्मबुद्धौ

रा
गी॰टी
५८

ॐ

57

तिःसाचदुःखितोहंकृशोहंमरिष्यामीत्यादिव्यवहारहेतुःयेनकोमलस्वरस्पर्शलावण्याद्यर्थमौष
धाहारमभ्यंगदुकूलादीनुपसेवंतेशरीरस्यमाकृण्यापशास्त्रीयंगंगास्नानादिकंचसंपादयंति ते
षामिदंगुणाध्यानंभ्रांतिःअत्यंतकुत्स्येस्मिन्शरीरेमेध्यताशाविवगुणाध्यानस्यासंभवात् ये
चौषधैःशौचाचमनादिभिश्चदोषानपनिनीषंतितेषामपिदुःसंपादतयादोषापनयनंभ्रांतिरे
व तदुक्तम् अत्यंतमलिनोदेहोदेहीचात्यंतनिर्मलः उभयोरंतरंज्ञात्वाकस्यशौचंविधीयतइति
यस्यात्मबुद्धिःकुणपेत्रिधातुके स्वधीकलत्रादिषु भौमइज्यधीः यत्तीर्थबुद्धिःसलिलेनकर्हि
चिज्जनेष्वभिज्ञेषुसएवगोखरइतिच तत्रमनसस्तमःप्रधानस्वभावस्यासुरसंपद्भवतिरजःप्रधा
नस्वभावस्यतिरश्चोलोकादिवासनाभवंति नैश्चतत्रलौकिकाभिलाषजननेनवहिर्मुखत्वापा
दिकामलिनाप्येव सत्वप्रधानस्वभावस्यतुमनसोदैवीसंपद्भवति साचमलिनवासनाविनाशि
नीज्ञानसाधनत्वेनमुमुक्षुणासदाभ्यसनीया तथाचोक्तंभगवता अमानित्वमदंभित्वमहिंसा ५८
क्षांतिरार्जवं आचार्योपासनंशौचंस्थैर्यमात्मविनिग्रहः इंद्रियार्थेषुवैराग्यमनहंकारएवच
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् असक्तिरनभिष्वंगःपुत्रदारगृहादिषु नित्यंचसम॰

चित्तत्वमिष्टानिष्टोपपत्तिषु ३ मयिचानन्यभावेनभक्तिरव्यभिचारिणी विविक्तदेशसेवित्वमर
तिर्जनसंसदि ४ अध्यात्मज्ञाननित्यत्वंतत्त्वज्ञानार्थदर्शनम् एतज्ज्ञानमितिप्रोक्तमज्ञानंयदतो
न्यथेति ५ एवंमैत्र्यादिवासनाःपतंजलिनासूत्रिताः मैत्रीकरुणामुदितोपेक्षाणांसुखदुःख
पुण्यापुण्यविषयाणांभावनातश्चित्तप्रसादनमिति अत्रसुखादिशब्दास्तद्वति सर्वाणिप्रा
णिनिमदीयमेवायमितिमैत्रींभावयतः पुत्रमित्रादिसुखमिवशत्रोरपिसुखंस्वीयमेवसंप
द्यते ततश्चरागद्वेषादिनिवृत्तौचित्तंप्रसीदति एवमन्यदुदाहार्यम् एवंविधसद्वासनास्थैर्यार्थं
सत्संगादिनिषेवणीयं तदुक्तम् महत्सेवांद्वारमाहुर्विमुक्तेस्तमोद्वारंयोषितांसंगिसंगमिति
ततन्मलिनवासनाविषयाणांतद्वतांचसंगत्यागःकार्यः तदुक्तम् निःसंगतामुक्तिपदंयतीनां
संगादशेषाःप्रभवंतिदोषाः आरूढयोगोपिनिपात्यतेऽधःसंगेनयोगीकिमुताल्पसिद्धिरिति
योषिद्धिरण्याभरणांबरादिद्रव्येषुमायारचितेषुमूढः प्रलोभितात्माह्युपभोगबुद्ध्यापतंगव
न्नश्यतिनष्टदृष्टिरितिच दोषदर्शनंयथा कथनानिमहीपानांब्रह्मणःक्वजगन्तिचप्राकृतानि
प्रयाता निकेयंविश्वस्तनानव कोटयोब्रह्मणांयाता गताःसर्ग परंपराः प्रयाताःपांसुवद्भूपाःकास्थि

रा॰
गी॰टी
५८

58

त्तिर्मम म जीवन इति परिणामं तथा नाशं व्रजंति प्रत्यहं जनाः क्व ते सर्वे वयस्याश्च पश्य देहं तथा स्व
कम् वसासृङ्मांसमेदोस्थिमज्जशुक्राणि तन्मलाः कफः पित्तं मलः स्वेदप्रस्वेदो नखरोमव २ ने
त्रविट्त्वक्चस्नेहो वपुरेषां तु संहतिः नाडं व्रणतनं वीतं दुर्गंधं दारुणं विक्रियम् ३ मलैर्विण्मूत्रवह्न
लैः कृमिभिश्च निरंतरं यत्प्रस्रवन्मलं नित्यं कृमसंयं किमतः परम् ४ अस्थीनि मांसावलिप्तानि नाडी
नद्धानि राशिः स्रुतयो मलानाम् दुःखात्मकं गर्ह्यमिमं शरीरं भ्रमं तिरस्कृत्य भवान्मनुष्यः विस्तु
पुराणेपि मांसासृक्पूयविण्मूत्रस्नायुमज्जास्थिसंहतौ देहे चैव प्रीतिमान्मूढो भविता नरकेपि स
इति ६ त्वङ्मांसरक्तवाष्पांबु पृथक्कृत्वा विलोचने समालोकय रम्यं चेत्किं मुधा परिमुह्यसि ७ नित्यं
स्रवति रक्तादि शैवं नाम न बुध्यते दुराग्रहकृष्यमैर्नारी ग्लानिप्रदैव हि ८ रहो नास्ति क्षणं
नास्ति नास्ति प्रार्थयिता जनः तेन नारद नारीणां सतीत्वमुपजायते ९ नाग्निस्तृप्यति काष्ठानां न
पुंसां वामलोचना नांतकः सर्वभूतानां नापगानां महोदधिः १० आवर्तः संशयानामविनयभव
नेपत्तनं साहसानां दोषाणां संनिधानं कपटशतमयं क्षेत्रमप्रत्ययानां स्वर्गद्वारस्य विघ्नो नरकपुरमु
खं सर्वमायाकरंडं स्त्रीयंत्रं केन सृष्टं विषममृतमिव प्राणिलोकस्य पाशः ११ जन्मपल्वलमत्स्यानां ५८

चित्तकर्दममवारिणाम् पुंसांदुर्वासनारज्जुर्नारीवडिशपिंडिका २ किमन्यद्वक्तव्यं यावंतिजयति
धनापत्याघशेषकारणप्रयुक्तदुःखानितानिसर्वाणिनारीस्वीकारप्रयुक्तान्येवानिष्कामस्यैका
त४ किनस्तसदानिश्चिंतयालंकाराप्रदेशेष्वानंदएवजायते अर्थानामर्जनेक्लेशस्तथैवपरिरक्षणे
नाशेदुःखंव्ययेदुःखंधिगर्थान्क्लेशकारिणइति पुत्रस्याऽन्तर्भवःपूर्वंपातःप्रसववेदना ग्रह
रोगादिकंपश्चान्मृत्युदुःखंतान्यपनीनते अविधत्वमनर्हाहःपरदारायपुत्रता दरिद्रत्वंमृतेदुःखंपि·
त्रोर्दुःखंनशाम्यतीति मदादिनिवर्तिकाःप्रतीपभावनायथा विद्याधनजनादीनांमदःकार्योनक·
र्हिचित् अधिकादधिकोप्यास्तियतोमद[illegible]विनाशकः स्वभ्यस्तमप्यनभ्यासात्क्षणेनैवनश्यति
शीघ्रतः उन्मदादिविकारैश्चतथैवान्येधनादयः असन्मानान्नपोह्यद्भिःसन्मानान्नप्रसःदयः अ
र्थिनःप्रजितोविप्रोदुर्भाग्योरिवगच्छतीति आत्मानंयदिनिंदंतिस्वात्मानंस्वयमेवहि शरीरंय
दिनिंदंतिसहायास्तेजनाममम मन्निंदयायदिजनःपरितोषमेतितत्त्वप्रयत्नसुलभोयमनुग्रहो
मे श्रेयोर्थिनोहिपुरुषाःपरतुष्टिहेतोर्दुःखार्जितान्यपिधनानिपरित्यजंतीति शोकहर्षभयक्रो
धलोभमोहस्पृहादयः अहंकारस्यदृश्यंतेजन्ममृत्युश्चनात्मनः अपकारिणिचेत्कोपःकोपे।

वा॰
गी॰टी॰
५५

कोपःकथंननेते धर्मार्थकाममोक्षाणांप्रसह्यपरिपंथिनि फलान्वितोधर्मयशोर्थनाशनःसचेदृशा।
र्थःस्वशरीरतापनः नचेहनामुत्रहिताययःसतांमनोसिरोषःसमाश्रयेत्कथमिति सविषयं
कोपंप्रतिनमेपरायःकिमकारणंनृणांयदभ्यसूयेत्यपिनैवचिंतयेत् नयत्कृताप्राग्भवबंध
निष्कृतिस्ततोपरायःपरमोनुचिंत्यताम् नमोस्तुकोपदेवायस्वाश्रयज्वालिनेभृशम् कोप्यस्य।
ममवैराग्यदायिनेदोषबोधिनेइति एवमेवपराधेयोपिदोषांतरप्रतीकारःस्वयमूहनीयः
59 चित्तनिरोधार्थंतत्रअजिह्वत्वाद्यभ्यासोपिविधेयः तानिचयथा इदमिष्टमिदंनेतियोश्नन्नपिन
सज्जते हितंसत्यंमितंवक्तितमजिह्वंप्रचक्षते अद्यजातांयथानारींतथाषोडशवार्षिकीम् शत
वर्षांचयोदृष्ट्वानिर्विकारःसषण्डकः भिक्षार्थंगमनंयस्यविण्मूत्रकरणायच योजनान्नपरंग
च्छेत्सर्वदाःपंगुरेवसः तिष्ठतोव्रजतोवापियस्यचक्षुर्नदूरगं चतुर्युगांभुवंमुक्त्वापरिव्राट्सोंध ब्रा॰
उच्यते ४ हितंमितंमनोरामंवचःशोकावहंचयत् श्रुत्वापियोनशृणोतीवबधिरःसप्रकीर्त्ति ५५
तः सान्निध्येविषयाणांयःसमर्थोविकलेंद्रियः सुप्तवद्वर्त्ततेनित्यंभिक्षुर्मुग्धःसउच्यतेइति तदे
वमुक्तविवेकात्पन्नाभिरजिह्वत्वाद्यभ्याससंरक्षिताभिरमानित्वादिसद्वासनाभिर्मलिनवासना

विनाशनेनचेतसिलब्धावकाशंसर्वंचिदेवनान्यदिति चिन्मात्रवासनांध्यानसमाधिप्रय।
त्नेनाभ्यसेत् साचनिःशेषसंकल्पपरित्यागपूर्वकमभ्यस्तासतीपुनःप्रयत्नंविनानिःश्वासोच्छ्वा
सवत्स्वतःप्रवर्तमानावस्तुस्वरूपानतिरेकिणीनिर्वासनत्वंस्थितप्रज्ञत्वंजीवन्मुक्तत्वमित्यादिश
ब्दैर्व्यवह्रियते तदुक्तंवासिष्ठे सम्यगालोचनात्सत्याद्वासनाप्रविलीयते वासनाविलयेचेतःश
ममायातिदीपवदिति विशुद्धांतःकरणस्यतुराजयोगेनैवविद्यावृत्तिस्थैर्यंनिर्वासनत्वंचजा
यते सचाचार्यैरुक्तः सर्वंब्रह्मेतिविज्ञानादिंद्रियग्रामसंयमः यमोयमितिसंप्रोक्तोभ्यसनीयो
मुहुर्मुहुः सजातीयप्रवाहश्चविजातीयतिरस्कृतिः नियमोहिपरानन्दोनियमात्क्रियतेबुधैः
सुखेनैवभवेद्यस्मिन्नजस्रंब्रह्मचिंतनम् आसनंतद्विजानीयान्नेतरत्सुखनाशकम् चित्तादिस
र्वभावेषुब्रह्मत्वेनैवभावनात् निरोधःसर्ववृत्तीनांप्राणायामःसउच्यते ४ विषयेष्वात्मतांदृ।
ष्ट्वामनसश्चित्तिमज्जनम् प्रत्याहारःसविज्ञेयोभ्यसनीयोमुहुर्मुहुः ५ यत्रयत्रमनोयातिब्रह्म
णस्तत्रदर्शनम् मनसोधारणंचैवधारणासापराभता ६ ब्रह्मैवास्मीतिसद्वृत्त्यानिरालंबत।
यास्थितिः ध्यानशब्देनविख्यातापरमानंददायिनी निर्विकारतयावृत्त्याब्रह्माकारतयापुनः वृ·

य॰
गी॰टी॰
८॰

त्तिविस्मरणं सम्यक्समाधिर्ज्ञानसंज्ञकः ८ एभिरंगैः समायुक्तो राजयोग उदाहृतः किंचित्पक्व
कषायाणां हठयोगेन संयुतः परिपक्वं मनो येषां केवलोयं हि सिद्धिदः गुरुदैवतभक्तानां सर्वेषां
सुलभो भवेदिति ५८ ननु एवं जगन्नास्तीति सत्त्वे कथमसंभावनेत्यत आह ॥ विश्वं यदेतत्परमात्मदर्शने ।
विलापयेदात्मनि सर्वकारणे पूर्णश्चिदानंदमयोवतिष्ठते न वेद बाह्यं न च किंचिदांतरम् ४१
त्रि॰ परात्माखंडचैतन्यमेव दर्शनं दृश्यतेऽस्मिन्निति दर्शनं रज्जुवद्विवर्ताधिष्ठानं यस्य तत् यदेतद्दृश्यं सर्वं
60 जगद्वर्तते तत् सर्वकारणे स्वव्यतिरिक्तकारणरहिते द्रष्टरि आत्मनि स्वप्नप्रपंचमिव विलापये
त् स्वव्यतिरेकेण कटकादेरिवात्मव्यतिरेकेण तस्यात्यंताभावं भावयेत् ततश्च विलापितः कटका
दिः स्वर्णरूपेणेव योगी अखंडचिदानंदरूपेणावतिष्ठते ततश्च बाह्यमिंद्रियग्राह्यमान्तरं च केव
लसाक्षिग्राह्यं चिंतादि किंचिन्न वेद न जानाति तदुक्तमाचार्यैः कारणं व्यतिरेकेण पुमानादौ विलो । के॰
कयेत् अन्वयेन पुनस्तद्धि कार्ये नित्यं प्रपश्यति कार्ये हि कारणं पश्येत्पश्चात्कार्यं विसर्जयेत् कार
णत्वं स्वतो गच्छेदवशिष्टो मुनिर्भवेदिति तदयं प्रकरणार्थः ज्ञानस्य सप्त भूमिका भवंति तत्र प्रथ
मा शुभेच्छा सा च प्राकृतव्यापारेण सच्छास्त्रसत्संगज्ञानवैराग्याभ्यासं सम्यक्कर्तुमशक्तस्यापि

उज्ञां मूढ एवास्मि कथंचिद्ब्रह्मवित्स्यामित्येवमभिलाषातिशयरूपा १ द्वितीयाया विचारणास्ता

त्तीव्रतरविविदिषया मानससंन्यासेन च तुर्याश्रमस्वीकारेण या सच्छास्त्रादौ सम्यक्प्रवृत्तिः २

तृतीया तनुमानसा सा तत्पूर्वभूमिकाद्वयाभ्यासजनितकिंचिद्वैराग्यपरोक्षज्ञानाभ्यां रागादिवि

काराणां तनूभावरूपा ज्ञानस्य पारोक्ष्यं तन्निष्पन्नश्रवणमननस्यापि प्रबलदेहादिवासनया दे

हादिविविक्तशुद्धचिदात्मनि चेतसः स्थैर्याभावः न तु ब्रह्मास्मीत्येवं स्वतो भेदभानादिः तदौ- आत्मनः सकाशात्

पनिषदात्मज्ञानस्यैवाभावः स्यात् तत्त्वमसीत्यादिवाक्यैर्भेदभ्रमनिराकरणस्यैव ज्ञानत्वात् इदं

तु भूमिकात्रयं ब्रह्मविद्यायाः साधनमेव न तु विद्याकोटावन्तर्भवति भेदसत्यत्वप्रतीतेरनिवर्ति

तत्वात् अत एव जागरणमिति प्रोच्यते तदुक्तम् भूमिकात्रितयं त्वेतद्रामजाग्रदिति स्थितम् यथा

वद्भेदबुद्ध्येदं जगज्जाग्रति दृश्यते इति नन्वेतद्भूमिकात्रयाभ्यास एवमन्तस्य व्यर्थ एव प्रयास इति चे

च्छृणु श्रीराम उवाच एकामथ द्वितीयां वा तृतीयां भूमिकां मुने आरूढस्य मृतस्याथ कीदृशी भग

वन्गतिः वसिष्ठ उवाच योगभूमिकयोत्क्रान्तजीवितस्य शरीरिणः भूमिकांशानुसारेण क्षीय

ते पूर्वदुष्कृतम् २ ततः सुरविमानेषु लोकपालपुरेषु च मेरूपवनकुंजेषु रमते रमणीसखः ३

भुंक्तेस्वकृतसंभारेडक्तेनेवपराकृते ततोभोगोपविक्षीणोजायतेयोगिनांभुवि शुचीनांश्रीमतां
गेहेगुप्तेगुणवतांसतां तत्रप्रागभावनाभ्यस्तयोगभूमित्रयंबुधः ५ युक्तःपरिपतत्येवैरुत्त
मंभूमिकाक्रममिति तथाकृष्णगीतायामपि अर्जुनउवाच अयतिःश्रद्धयोपेतोयोगाच्चलितमा
नसः अप्राप्ययोगसंसिद्धिंकांगतिंकृष्णगच्छतीत्यादिः श्रीभगवानुवाच प्राप्यपुण्यकृतांलोका
नुषित्वाशाश्वतीःसमाः शुचीनांश्रीमतांगेहेयोगभ्रष्टोभिजायते इत्याद्युत्तरंचेति अतोदेवलोक
प्राप्तिहेतुत्वात्तिरोधद्रूपत्वाच्चासांभूमीनांतपस्त्वंसिद्धम् तथाचश्रुतिः तपसादेवादेवताअग्रआ
सन् तपसर्षयःस्वरंविंदंतिस्मृतीश्च मनसश्चेंद्रियाणांचैकाग्र्यंपरमंतपः तज्ज्यायःसर्वधर्मेभ्यः च॰
सधर्मःपरउच्यते अग्रिमभूमिकानांतकैमुतिकन्यायेनतपस्त्वंसिद्धम् जन्मजन्मांतराभ्यासव
तोविशुद्धसत्वस्यश्रवणमननाभ्यामेवविशुद्धसत्वमात्रस्यतुराजयोगसहिताभ्यांमलिनसत्व
स्यतुहठयोगमपिपुरस्कृत्यसत्कारपूर्वकनिरंतरचिरकालसेविताभ्यांप्रयत्ननिरपेक्षंवस्तु॰
भूतस्यसच्चिदानंदात्मनोयन्नामरूपोभयात्मकमायिकप्रपंचविविक्तत्वेनसर्वदावभासनंसास ८१
त्त्वापत्तिर्नाम्नीचतुर्थीभूमिकाभवति तदायंब्रह्मविदित्युच्यते सचस्वप्नदशायांस्वप्नायंस्थैवेति

जानन्नपि यथा कश्चित्स्वाकृतः पुरुषो निद्राशेषेण रागादिना मनोराज्यवत्स्वप्नमेवानुभवति त
थास्य शेषे वेति सर्वदा जानन्नेवायं प्रपंचमनुभवति अत एवेयं भूमिका स्वप्न इत्युच्यते तदुक्तम्
अद्वैते स्थैर्यमायाते द्वैते च प्रशमं गते पश्यन्ति स्वप्नवल्लोकं चतुर्थी भूमिका मतेति सा च स्वोत्प
त्तिसमकालमेव भाविदेहपातादिलक्षणां विदेहमुक्तिं जनयति तदुक्तम् तीर्थे श्वपचगृहे
वा नष्टस्मृतिरपि परित्यजन्देहम् ज्ञानसमकालमुक्तः कैवल्यं याति हतशोक इति तथापि
तेन मनोनाशादेरसंपादनाद्दृष्टदोषलेशोऽस्त्येव तथा चोक्तम् वैराग्योपरती पूर्णे बोधस्तु प्र
तिबध्यते यस्य तस्य न मोक्षोऽस्ति पुण्यलोकस्तपोबलात् पूर्णे बोधे तदन्यौ द्वौ प्रतिबद्धौ यदा तदा
मोक्षो विनिश्चितः किं तु दृष्टदुःखं न नश्यतीति तस्मिन्विदुषि दृश्यमानानामविद्यारागादीनां न
न जन्मान्तरापादकत्वम् उत्खातदंष्ट्रोरगवदविद्या किं करिष्यति रागादयः सन्तु कामं न तद्भावो
ऽपराध्यत इति दग्धबीजवदाभासत्वेन स्वीकृतानां तेषां पुनः प्ररोहासंभवात् तदेवोक्तम् उत्पद्यमा
ना रागाद्या विवेकज्ञानवह्निना तदा तदैव दह्यन्ते कुतस्तेषां प्ररोहणमिति ४ अग्रिमास्तु निर्विकल्प
कसमाध्यभ्यासकृतविश्रान्तितारतम्येन त्रिधा भिन्नास्तु जीवन्मुक्तिरूपाः पंचम्यादिभूमिकास्तत्र

आभासभूतानामप्यविद्यादीनांसंभवोनास्त्येवतदीयज्ञानापेक्षयैव नचाध्यात्माभिमानोपिविद्
षोस्त्यासुरत्वतः विदुषोप्यासुरश्चेत्स्यान्निष्फलंब्रह्मदर्शनमिति रागोलिंगमबोधस्यचित्तव्याया
मभूमिषु कुतःशाद्वलतातस्ययस्याग्निःकोटरेतरोरित्यादिवोच्यते तत्रासंसक्तिनाम्नीपंचमीभू
मिकाभवति साचनिर्विकल्पसमाध्यभ्यासमहिम्नाव्युत्थानेपिस्वानंदमयस्य पुंसःसम्यक्क्रिय
माणेपिलौकिकव्यवहारेसर्वत्रौदासीन्यरूपाइयंतत्सप्तभिरिष्यते तदुक्तम् अंतर्मुखतयानि·
त्यंवहिर्वृत्तिपरोपिसन् परिश्रांततयानित्यंनिद्रालुरिवलक्ष्यते कामक्रोधभयादीनामनुरूपंच
रन्नपि योंतर्व्योमवदस्पृष्टःसजीवन्मुक्तउच्यतेइतिसोयंब्रह्मविद्वरइत्युच्यते॥ यत्रतुगाढंनि
र्विकल्पसमाधिंप्राप्तस्याखंडचिदानंदब्रह्मैकाकारतयावस्थितस्यसंस्कारमात्रावशेषस्यचि
त्तस्यमनोराज्यवाह्यपदार्थग्रहणसामर्थ्याभावात्स्वतस्तद्वृत्तिशून्यस्यपरप्रेरणयैवलौकिकत
त्त्वव्युदयोभवति सापदार्थाभाविनीनामषष्ठीभूमिकाभवति तदुक्तम् अंतःशून्योवहिःशू
न्यःशून्यकुंभइवाम्बरे अन्तःपूर्णोबहिःपूर्णःपूर्णकुंभइवार्णवे १ हरोयद्युपदेष्टातेहरिःक। ६२
मलजोपिवा तथापितवनस्वास्थ्यंसर्वविस्मरणादृते २ पार्श्वस्थबोधितःसंतःपूर्वाचारक्रमागतं

आचारमाचरंस्त्वेवमस्यप्रबुद्धवदःवर्तनादिति असंसक्तिपञ्चम्याख्यायांभूमौयोगीब्रह्मविद्वरीयानित्युच्य

ते नदेतज्जाग्रत्स्वप्नसुषुप्त्यवस्थात्रयरूपत्वेनाभिहितंभूमिषट्करूपेत्याह तुरीयावस्थारूपामेतप्

वत्तुरीयेतिनाम्नैवव्यवह्रियमाणा स्वरूपैकनिष्ठत्वलक्षणा सप्तमभूमिः वास्य तद्योगिनः स्वतः काम^

परतोवाव्युत्थानमेवनास्तिपार्श्वस्थजनाप्रवर्तनस्यशरीरंपश्यतीतिस्वयंतुनिर्मनस्कत्वान्मदीयमिदं।

शरीरमितिनस्मरति यथाचभागवतेनैकादशेवोह्यिप्यसमर्थ्यते देहंविनश्वरमवस्थितमुत्थितंवा

सिद्धोनपश्यतियतोऽध्यगमत्स्वरूपम् दैवादुपेतमथदैववशादपेतंवासोयथापरिकृतंमदिरामदा रा^

न्धइति सचायंब्रह्मविद्वरिष्ठइत्युच्यते तथाचश्रुतौ ब्रह्मविदादयश्चत्वारःप्रतीयन्ते आत्मक्रीड

आत्मरतिःक्रियावानेषब्रह्मविदांवरिष्ठइति ननुजीवन्मुक्तानांनिर्वासनत्वादिंद्रियप्रवृत्तिर्नस्या

त् ततश्चशरीरनिर्वाहोपिनस्यात्अन्यथोपभोगस्तुएवंतदनुवंपितुःएवमपिस्यादितिचेन्न अनंत

वासनिवालकप्रमत्तादिवद्देहनिर्वाहस्यजीवन्मुक्तपुरुषप्रयत्ननैरपेक्ष्येणैवनिर्वासनबुद्धीन्द्रिये

रपिस्वतःसिद्धत्वात् नतुकाम वासनाहीनमप्येतच्चक्षुरादींद्रियंस्वतः प्रवर्ततेबहिःस्वार्थवासना

नात्रकारणं अप्रयत्नोपनतेष्वपिहितादिषुविषयेषुयथापुनः नीरागमेवपततीतितत्कार्येषुधीरधीः परि

रा॰
गी॰टी॰
८३

ज्ञायोपभुक्तो हि भोगो भवति न स्पृथे विज्ञायसे वितन्वैरो मैत्री मैत्री मेतिन वैरतामिति अत एव भोग।
काले जीवन्मुक्तानां विशेष उक्तः नापदि ग्लानिमायांति हेमपद्मं यथा निशि नेहंते प्रकृतादन्यद्र॰
मंते शिष्टवर्त्मनि नित्यमापूर्णतामंतरत्वब्धाभिंदुसुंदरी आपद्यपि न मुंचंति शशिनः शीततामि
व २ अब्धिवद्धृतमर्यादा भवंति नियताशयाः नियतिं न विमुंचंति महांतो भास्करा इवेति ५७ ॥
ननु विद्याहृतिस्थैर्यवतां देहाभिमाने गलिते विज्ञाने परमात्मनि यत्र यत्र मनो याति तत्र तत्र समा॰
धयः इत्युक्तेः स्वतः सिद्धसमाधिना कृतकृत्यत्वे पि न सिद्धये न्येन कथं यतनीयमित्यत आह ॥
सर्वं समाधेरखिलं विचिंतयेदोंकारमात्रं सचराचरं जगत् तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञा
नवशान्न बोधतः ५८ समाधेः सर्वं यावन्नामरूपात्मकप्रपंचवाचस्सर्वकालं उचैतन्यभावनारू
पसमाधिसामर्थ्येनोत्पद्यते तावत्तदुदयार्थं सचराचरमखिलं जगत् ॐकारमात्रं तद्वाच्यस्वरमात्रं वि
चिंतयेत् भावयेत् नहि सर्प्पोयं रज्जुरेवेति वत्सर्वं खल्विदं ब्रह्मेति श्रुताध्यारोपद्रूपत्वादस्य चिंतन
स्य समाधिसिद्धावप्यनुवृत्तिः स्यादित्याशंक्यानेनाह हि यतः तदेव जगदेव वाच्यम् प्रणव ॐकारो वा ८३
चकस्तर्हि द्वयं कुतश्चिंत्यते आह अज्ञानवशाद्धि भाव्यते ज्ञेये ब्रह्मणि प्रपंचवैशिष्ट्यस्य नथावाच्य।

स्यत॰

63

वाचकभावप्रकल्पनस्यवाज्ञानदशायामेवसंभवात् ज्ञानोदयात्प्रागेवंचिंत्यनइतिभावः नवो
पनः एवंचिंतयतःपुंसोवक्ष्यमाणप्रपंचविलापनपूर्वकजीवब्रह्मैकत्वलक्षणप्रणवार्थान्
संधानेनविपाहृत्पुटयेत्पुंडब्रह्मैवेतिसर्वस्यबाधितत्वेनात्यंताभावएव ४८ ननुॐनत्स
दितिनिर्देशोब्रह्मणस्त्रिविधःस्मृतइत्युक्तत्वाद्ब्रह्मैवप्रणवस्वरूपंनजगत्तस्याशंकाप्रणवस्य ६४
समुदितरूपेणसमष्ट्युपाधिकब्रह्मवाचकत्वेप्यकाराद्यवयवैर्व्यस्तप्रपंचविशिष्टचैतन्या
भिधानाद्वैवमितिस्फुटमाह ॥ अकारसंज्ञःपुरुषोहिविश्वकोह्युकारतैजसकइतीर्यतेक्रमा
त् प्राज्ञोमकारःपरिपठ्यतेखिलैःसमाधिपूर्वनतुनत्वतोभवेत् ४९ ॐकारस्याकारोकारमका
ररूपास्त्रयोवयवाःतत्रविश्वकःस्थूलोपाधिविशिष्टोजागराभिमानीसन्पुरुषः अका
रसंज्ञःअकारःसंज्ञायस्यसःअकारवाच्यइत्यर्थः उकारशब्दे विभक्तिलोपश्चार्षःतैजसकः
सूक्ष्मोपाधिविशिष्टःस्वप्नाभिमानीसन् उकारइतीर्य्यतेकथ्यते प्राज्ञःकारणशरीरोपाधिवि
शिष्टःसुषुप्त्यभिमानीसन्अखिलैराचार्यैःक्रमान्मकारःपरिपठ्यतेमकारसंज्ञयाव्यवह्रियते
अत्रसंज्ञासंज्ञिनोरभेदोपचारात्सामानाधिकरण्यम् एकएवपुरुषस्तत्तदुपाधिवैशिष्ट्येनत्र

मात्रतत्संज्ञत्वेनव्यवह्रियतेऽयमर्थः तदेतदुक्तरूपेणचिंतनंसमाधिसंज्ञंसमाधेःप्रागेवभवेत्तत॰
रा॰ तत्वतःसमाधिगम्येनतत्स्वरूपेणशुद्धाद्वयचिदात्मनिउपाधिवाच्यत्वादेरत्यंतासंभवात् ४५ ननु॰
गी॰टी॰ तर्हिजगतओंकारवाच्योपाधिविशिष्टचैतन्यरूपतयाचिंतनेनकथंसमाध्युपकारइत्याशंक्यो॰
६४ पाधिविलापनादित्याहद्वाभ्याम्॥ विश्वंत्वकारंपुरुषंविलापयेदुकारमध्येबहुधाव्यवस्थितं
64 ततोमकारेप्रविलाप्यतैजसंद्वितीयवर्णंप्रणवस्यचांतिमे ५॰ मकारमप्यात्मनिचिद्घनेप
रेविलापयेत्प्राज्ञमपीहकारणं सोऽहंपरंब्रह्मसदाविमुक्तवद्विज्ञानदृङ्मुक्तउपाधितोऽमलः ५॥
यथास्वाज्ञानविशिष्टरज्ज्वादौस्वाज्ञानापेक्षयापरिणामत्वेनस्वापेक्षयाविवर्तत्वेनस्थितंयत्सर्पा
दिकंतद्रज्ज्वादिविज्ञानेनविलाप्यतेस्वकारणरज्जुव्यतिरेकेणात्यंताभावमापद्यतेपुनःक्वचिद
पिनोपलभ्यते तथैवोकारमध्येसूक्ष्मंमनोबुद्धिरितिप्रागुक्तसूक्ष्मोपाधिशालिनिचिदात्मनि।
तैजसेस्वोपाध्यपेक्षयापरिणामतयास्वापेक्षयाविवर्ततयाबहुधाव्यवस्थितःभोग्यभोगायतन
शरीरादिनिखिलजगद्रूपेणस्थितोयोविश्वःरसादिपंचीकृतेतिप्रागुक्तस्थूलोपाधिविशिष्टस्त ६४
मकारमकारसंज्ञकंपुरुषंस्वकारणोकारभावविज्ञानेनविलापयेत् रज्ज्वदधिष्ठानभूतमु

कारमेवावशेषयेदितिभावः तच्छब्दस्तु विश्वंतत्कारकार्यत्वादुकारएवविलापयेदित्यन्यतोभेदयोन
नार्थः ततोविश्वप्रविलापनानंतरमवशिष्टंतत्प्रणवस्यद्वितीयवर्णंपूर्वोक्तमुकारंतैजससंज्ञकमं
तिमेवर्णेमकारेअनाद्यनिर्वाच्यमितिप्रागुक्तकारणोपाधिविशिष्टेप्राज्ञेसर्वतत्परिणामत्वादि॰
नास्थितंविलाप्य ५ अवशिष्टंमकारंप्रागुक्तप्राज्ञमपिपरेज्ञाननतत्कार्यसंस्पर्शशून्येचिन्मैनोऽ
हस्वप्रकाशचिद्रूपतयासूर्यवत्स्वतःप्रत्यक्षेकारणेसर्पादेरज्जुवद्विश्वादिप्राज्ञांतनिखिलप्रपं॰
चस्याधिष्ठानभूतेआत्मनिस्वात्मस्वरूपएवविलापयेत् अत्रविलापनावसरेविश्वादिभिःस्वोपा
धयएवलक्ष्यंतेचैतन्यस्याकाशवत्सर्वत्रैकरसस्यनदनर्हत्वात् इदमधिष्ठानज्ञानजन्यमारोपि॰
तनिवर्त्तनरूपविलापनमेववाधापवादशब्दाभ्यांव्यवह्रियते ततश्चावस्थात्रयोपाधिंवाधित्वा
वशिष्टंब्रह्मात्मैकत्वंभावयेदित्याह सपूर्वोक्तविलापनावशिष्टआत्माहमस्मीतिभावयेदितिशे
षः आत्मनःस्वरूपमाह परब्रह्मअसंगब्रह्मरूपः सदाविमुक्तवत्सदाविमुक्तइवमुक्तेरपिवंध॰
प्रतिद्वंद्वितयंतत्रकल्पितायावस्तुतोऽसंभवात्विज्ञानस्वरूपमात्मानंपश्यतिस्वप्रकाशत्वात् उ
पाधिनःसर्वोक्तात्मकस्तद्रहितःअतएवामलःकिंचात्रसोहंशब्दयोःपरमात्मप्रत्यगात्मवाचि॰

नोः सामानाधिकरण्येन ब्रह्माहमस्मीत्यर्थः तत्र च सोऽहमिति वाक्ये पृषोदरादित्वात्सकारहकारयोर्लोपे
पुनरेङः पदान्तादतीति पूर्वरूपे च कृते निष्पन्नत्वादोंकारस्यैवायमर्थ इत्याहुः तदुक्तम् सकारं च ह-
कारं च लोपयित्वा प्रयोजयेत् संधिं च पूर्वरूपाख्यं ततोऽसौ प्रणवो भवेदिति ५१ तदत्र ईश्वरप्रणिधा-
नाद्वा क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः २ तस्य वाचकः प्रणवः तज्जपस्तदर्थ-
भावनमिति पतंजलिना समाधिलाभसाधनत्वेन सूत्रितमीश्वरप्रणिधानं पूर्वं समाधेरित्यादिवचोभिः
श्लोकैरभिधायेदानीमुपसंहरति ॥ एवं परिज्ञातपरात्मभावनः स्वानन्दतुष्टः परिविस्मृताखिलः आ-
त्मा तु नित्यात्मस्वप्रकाशितः साक्षाद्धि मुक्तोऽचलसिंधुवारिवत् ५२ एवं पूर्वोक्तेन प्रकारेण प्रणवा-
र्थचिंतनेन परिज्ञातपरात्मभावनो भवति परिज्ञाता साक्षात्कृता परात्मभावना ब्रह्मात्मभावना समा-
धिर्ब्रह्मभावो वा येन स इति अत एव स्वानंदतुष्टः निजानंदतृप्तः अत एव परिविस्मृताखिलः परि-
विस्मृतमखिलमुपाधितत्कृतवाच्यवाचकभावो येन सः न चात्मानन्दलाभेनाखिलविस्मृतिर्न
स्यात् जगत्यपि विषयानंदस्योत्कृष्टस्य विद्यमानत्वादित्याशंक्य आत्मानंदस्य निरतिशयोत्कृष्टशा-
लित्वनिरूपणेन नेत्याह आत्मा त्विति तुशब्दोऽखिलाद्भेदनार्थः नित्यमविनाशि आत्मस्वस्वरूपम्

दि॰ ३

65

तथानंदः तेन नित्यानंदस्वरूपेण प्रकाशितः प्रकाशमानः साक्षात्प्रत्यक्षमेव जगत्तन्नैवं यतः अनि
त्यं व्यभिचारस्तु एवं च तदेव स्वच्छंदनवनितादिकदाचित्सुखस्वरूपं कदाचिद्दुःखरूपं भवति
किंच रज्जुभुजंगवत्प्रातीतिकनामरूपात्मकस्यास्य जगतः सुखस्वरूपमभूतं नास्ति किं विष्य
माणविषयाप्राप्तौ जातायां मोहरूपतमोवृत्तेर्मनःप्रभृतिप्रयत्नरूपविक्षेपकरजोवृत्तेश्च विष
यप्राप्त्योपशांतत्वेनावरणाभावात् प्रीत्यात्मकसत्ववृत्तेश्च स्वच्छत्वादात्मानंदस्तत्र वृत्तौ परिस्फु
रति ततश्चानुभवितुः प्रमातृचैतन्यस्यैव सत्तास्फूर्ती यथा तत्तन्नामरूपवैशिष्ट्येन विषयाकारतां
प्रतिपद्येते तथा प्रमात्रानंदोपि तत्तत्सुखस्वरूपतयानुभूयते विषयः एतस्यैवानंदस्य मात्रामुप
जीवंतीति श्रुतेः तदुक्तम् सत्ता चितिः सुखं चेति स्वभावा ब्रह्मणस्त्रयः मृच्छिलादिषु सत्तैव व्य
ज्यते नेतरद्वयम् सत्ता चितिर्द्वयं व्यक्तं धीवृत्त्योर्घोरमूढयोः शान्तवृत्तौ त्रयं व्यक्तं मिश्रं ब्रह्मेत्थमीरि यौ
तम् २ अमिश्रं ज्ञानयोगाभ्यां तौ च पूर्वमुदीरिताविति किंच जगतः परोक्षत्वमपि स्वीक्रियते आ
त्मनि तु नैवं स्वप्रकाशत्वात् आत्मनो नित्यमुक्तत्वात्सर्वोपद्रवशून्यत्वं जगतस्तु रागद्वेषादिनानै
कदुःखवत्वम् आत्मनोऽचलसिंधुवाविव परिपूर्णैकरसत्वं जगतस्तु परिच्छिन्नत्वसातिशयत्वाभ्यां।

नैवं ५२ इदानीं समाधिफलमात्मसाक्षात्कारमाह ॥ एवं सदाभ्यस्तसमाधियोगिनो निहृतसर्वेन्द्रि-
रा. यगोचरस्य हि विनिर्जिताशेषरिपोरहं सदा दृश्यो भवेयं जितषड्गुणात्मनः ५३ एवं प्रकाशरूपो
गी.टी ऽहमस्मीत्यादिपूर्वोक्तप्रकारेण सदा सर्वदाभ्यस्तोऽभ्यासेन स्थिरीकृतः समाधिर्येन तस्य योगिनो वि
९९ यावृत्तिस्थैर्येण अहं सदा दृश्यः प्रत्यक्षो भवेयं संभावनायां लिङ् भवेदसौ वेदपारगो ब्राह्मणत्वात्
इतिवत् अहं दृश्यो भवेयं सदाभ्यस्तसमाधिभावितत्वादिति तथा च ब्राह्मणस्याप्यध्ययनाभावे स-
66 ति न वेदपारगत्वं तथा यमादिवैराग्यादिसमाधिलभ्यसिद्धिपरिपाकबलेन क्रमादिंद्रियनिरोधरा-
गादिविनिर्जयषडूर्मिजयसंपादनेऽपि सदाभ्यस्तप्रकाशरूपोऽहमित्याद्युक्तसमाधिभावितस्यापि म-
मदुक्ततत्त्वश्रवणाद्यभ्यासाभावाद्धियावृत्तिस्थैर्याभावे सति न साक्षात्कार इति भावः निहृताः सर्वेषा-
मिंद्रियाणां गोचरा विषया यस्य विनिर्जिता अशेषा रागादयो रिपवो येन तस्य जिताः षड्गुणाः प्राणस्य क्षु-
त्पिपासे देहमनसः शोकमोहौ जरामृत्यू शरीरस्य षडूर्मिरहितः शिव इत्युक्ता ऊर्मयः समाध्यभ्या-
सबलाद्येन स जितषड्गुणः तादृश आत्मा मनो यस्य जितं विक्षेपानुत्पादकत्वेन वशीकृता षडूर्मयो गु-
णो येषां ते प्राणादिरूपा आत्मानो येनेति वा विधानिश्चयवत इत्थं समाधिस्थैर्ये सति सर्वस्य चित्तेन्द्रिया-

देवीधितस्यात्यंताभावनिश्चयस्थैर्येण विक्षेपजनकत्वाभावात्सर्वदैवात्मसाक्षात्कार इति भावः ॥
ध्यात्वैवमात्मानमहर्निशं मयि तिष्ठेत्सदा मुक्तसमस्तबंधनः प्रारब्धमश्नन्नभिमानवर्जितो
मय्येव साक्षात्प्रविलीयते ततः ५४ एवं पूर्वोक्तरीत्या निर्विक्षेपसार्वकालिकात्मसाक्षात्कार
पर्यन्तमात्मानमहर्निशं सर्वदा ध्यात्वा निदिध्यास्य पश्चात्तन्निदिध्यासनपरिपाकेन मुक्तसम
स्तबंधनः विनष्टाः विद्याऽस्मितादिनिखिलबंधहेतुः सन् मयि चिदात्मनि सदा तिष्ठेत् चिदेकरस
बुद्धित्वास्थितप्रज्ञो जीवन्मुक्तो भवेदित्यर्थः स च लोकदृष्ट्या प्रारब्धमश्नाति भुंक्ते अन्ततः प्रारब्धक्ष
येण शरीरपाते सति मय्येव प्रविलीयते भोगेन त्वितरे क्षपयित्वा संपद्यत इति तस्य तावदेव चिरं याव न५
न्न विमोक्ष्ये अथ संपत्स्य इति न तस्य प्राणा उत्क्रामंत्यत्रैव समवलीयंत इति च श्रुतेः ननु सर्वोप्यात्म
न्येव विलीयत इति चेदत आह साक्षादिति नित्यप्रलये निद्रारूपकारणशरीरे ब्रह्मादिंसावसानेत व५
न्निमित्तप्रलये तु हिरण्यगर्भाहंकारे प्राकृतप्रलये च मायायां निखिलस्वकार्यविलयो भवति त
त्तद्द्वारा च ब्रह्मणि न तु साक्षात् अस्मिन्नधिष्ठानात्मसाक्षात्कारेणारोपितमायातत्कार्यनिवृत्तिरू
पे आत्यंतिकप्रलये तु साक्षादात्मन्येव प्रविलयः नन्वेवमात्मसाक्षात्कारस्य मायाकार्यनिवर्तक

रा·
गी·टी
६७

67

नेसतिप्रारब्धप्रतीतत्वेणनयुक्तमित्यतआह अभिमानवर्जितइति अत्राभिमानोनामतत्तत्रिविल।
कार्योत्पादकस्थितेस्तन्नत्वंदात्म्याध्यासः तन्निवृत्तौचतत्कार्यप्रारब्धशरीरादिनिवृत्तिसंतदादेप
टदाहवतत्कालएवजायतेनविलंबेनतत्रचयथातन्तुरूपपटभस्मदाहानभिज्ञानांक्रमपटत्वेन·
भासतेनतदभिज्ञस्यतुभस्मत्वेनैवभासतेनपटत्वेन तथाज्ञानदग्धविद्वच्छरीरादिकंलोकानांतत्प्रा
रब्धभोगत्वेनभासतेविदुषस्तुनतथाकिंतुबाधितत्वात्सर्वंब्रह्मत्वेनैवभासते तथाच आत्माविज्ञाय
नेपुत्रइत्यादिवहिहत्प्रारब्धबोधकंश्रुत्यादिकमपिलोकप्रतीत्यनुवादएवनवस्तुनिर्णायकमि
तिभावः तदुक्तमाचार्यैः यथारज्जुंपरित्यज्यसर्पंगृह्णातिवैभ्रमात् तद्वत्सत्यमविज्ञायजगत्पश्य
तिमूढधीः १ रज्जुरूपेपरिज्ञातेसर्पखंडंनतिष्ठति अधिष्ठानेतथाज्ञातेप्रपंचेशून्यतांगते देह·
स्यापिप्रपंचत्वात्प्रारब्धावस्थितिःकुतः अज्ञानिजनबोधार्थंप्रारब्धंवक्तिवैश्रुतिः २ क्षीयंतेचास्य
कर्माणितस्मिन्दृष्टेपरावरे बहुत्वंतन्निषेधार्थंश्रुत्यागीतंचवैस्फुटमिति श्रुतिस्तु भिद्यतेहृद ६७
यग्रंथिश्छिद्यन्तेसर्वसंशयाः क्षीयन्तेचास्यकर्माणितस्मिन्दृष्टेपरावरइति ५४ इदानींप्रा·
क्प्रपंचितमपिवैराग्यपूर्वकविज्ञानंमंदाविदुषेपुनःस्मारयतित्रिभिः ॥ प्रादेवमप्येवतथैवचं

ततोभवंविदित्वाभयशोककारणम् हित्वासमस्तंविधिवादचोदितंभजेत्स्वमात्मानमथाखिलात्म
नाम् ५५ भवंसंसारंकालत्रयेपिभयशोककारणंविदित्वाज्ञात्वायथाउत्कृष्टःस्वर्गादिरूपोपिसं-
सारः आदौअभिलष्यमाणोःप्राप्यायागाद्यनुष्ठानप्रयासेनच भयशोकप्रदः मध्येचभुज्यमानःसा
तिशयत्वेनातिशयिनएवरुचिर्जायतइतितस्मादिनाशोकजनकः यथाराज्ञःपांडोरिंद्रसान्निधि।
स्यदृष्टिंद्रस्पर्द्धयाशोकजनकोबभूव ततस्तपांडुरपीन्द्रसान्निध्योस्यानंयुधिष्ठिरंप्रतिराजसूयय-
ज्ञंकर्तव्यंनारदेनसंदिष्टवान् अंतेविनाशेनप्रियवस्तुनःशोकप्रदत्वंप्रसिद्धमेव वेदविरुद्धस्यत
पापाद्यनिष्टजनकत्वेनापीत्येवमन्यत्सर्वयमूह्यम् ततस्तस्वर्गादेरपिसंसाराद्विरज्यतत्प्राप्तिसाध-
नत्वेनविधिवादैर्विधायकस्तावकवाक्यैश्चोदितंविहितंकर्मसमस्तंनित्यादिकमपिहित्वात्यक्त्वानि
षिद्धत्यागस्तुकैमुतिकन्यायेनैव अथशाह्येमंगलेममसर्वदुःखनिवृत्तिःपरमानंदावाप्तिश्चभवती
तिमंगलरूपमात्मानंभजेत् ननुसर्वोप्यात्मानंभजति अन्यस्तुआत्मार्थमेवभजतिननदर्थ
मित्यतआह अखिलात्मनांसर्वजीवानामात्मानंस्वरूपभूतं निखिलप्रपंचाधिष्ठानाःखण्डचैतन
न्यरूपमित्यर्थः ५५ ननुकथंप्रत्यक्षभेदंतिरस्कृत्यसर्वात्मभूतत्वेनात्मभावनमित्यतआह ॥

आत्मनऽभेदेनविभावयन्निदंजानात्यऽभेदेनमयात्मनःसदा यथाजलंवारिनिधौयथापयःक्षीरेवि
रा· यद्व्योम्न्यनिलेयथाऽनिलः ५९ इदंभिन्नत्वेनावभासमानंविश्वंस्वस्मिंश्चिद्रूपेअभेदेनविभावयन्
गी·टी अहंचिदात्मैवस्वमायाकृततत्तदुपाधिभेदेनविचित्रजगदिवभवामिनमत्तोन्यज्जगदस्तीतिभावय
६८ न् इत्यमभेदवासनावासितान्तःकरणःसन्सदासर्वदामयाअनवच्छिन्नेनब्रह्मणासहआत्मनः
अनवच्छिन्नचैतन्यस्यअभेदेनजीवब्रह्मैक्येनइदंजानातिभेदतिरस्कारेणऽदंब्रह्मैवसर्वमितिजानाती
68 तिभावः आत्मनिभिन्नत्वेनप्रतीयमानमपिविश्वंनभिन्नमित्यत्रदृष्टांतमाह वारिनिधौतरंगफेन·
बुद्बुदात्मनाभिन्नत्वेनप्रतीयमानमपिजलंयथानभिद्यतेतद्वत् तदुक्तम् स्रहिर्नीमब्रह्मरूपेस
च्चिदानन्दवस्तुनि अम्बुफेनादिवत्सर्वनामरूपप्रसारणामिति इदमभेदभावनामायिकोपाधि
न· कृतभेदंनिराकुर्वती अधिष्ठानस्याभेदंस्वाभ्यासदृढिक्रमेणोत्तरोत्तरस्फुटंस्फुटमभिव्यंक्तीतिध· न·
नतार्थक्रमेणतथाविधात्मैवदृष्टांतांतरेणाह यथाक्षीरेदुग्धेपयःदुग्धंफेनबुद्बुदाद्यात्मना।
भिन्नतयाभातमपिनभिन्नम् स्नेहश्वेतताभ्यांस्फुटमनुभूयतेचाभिन्नत्वम् तथात्मनिजगन्नभि ६८
न्नंसत्तास्फूर्तिभ्यांचाभिन्नमेवानुभूयते नन्वेवमात्मनःसावयवत्वमित्यतआह यथाव्योम्निआका

शोवियत्आकाशः घटमठाद्युपाधिभेदेनावयववद्भासतोपि नावयवः किंतु पूर्णव्योमैव तथात्मनि
मायिकोपाधिभेदादवयववत्तयाभातमपि जगन्नावयवः किंत्वखंडमात्मैव तत्तश्चाभ्यासबलेन वि-
द्वासनास्थैर्ये जाते यथानिलेवायौ वायुर्न भिन्नतयाभासते तथा चिदात्मनि जगन्नैव भेदेन भासते।
इति भावः ॥ ५८ इदानीं जगन्मिथ्यात्वानुसंधानपुरस्कारेणाभ्यस्यमानायाश्चास्या अभेदभावनायाः
फलमाह ॥ इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेति विभावयन्मुनिः तदाहृतार्थः श्रुतियु
क्तिमानतो यथेंदुभेदादि दिशादिविभ्रमादयः ५९ श्रुतियुक्तिमानतो जगन्मृषैवेति विभावयन्सन्।
मुनिर्यदा इत्थं पूर्वश्लोकोक्तप्रकारेण अखंडमात्मानमीक्षेत भावयेत् तदाहृतार्थः आत्मसाक्षात्कारेण
भवती कृतकृत्यो भवतिमुमोऽयमर्थः श्रुतिर्नेह नानास्ति किंचनेत्यादिः युक्तिर्वाचारंभणं विकारो नामधेयं
मृत्तिकेत्येव सत्यमित्यादिः मानं तु स्वानुभवादिः तत्र मृषात्वे दृष्टांताः दृष्टिदोषेणानुभूयमाना
इंदुभेदाद्विचंद्रत्वादयः अपि च दिग्भ्रमादयः मोहात्प्राच्यादिदिगंतरं मन्यते अपि च स्वयं भ्रम।
णं कृत्वा नदंते दृष्टिदोषेण दिशां भ्रमणं पश्यति इत्येवमादयो यथा मृषैव नानुभवमात्रेण वस्तुतां
प्रतिपद्यंते तथा चिदात्मनि विसदृशप्रतीतिकारणलक्षणया मायया कृतं नामरूपात्मकं जगन्मृ

षैवेति इत्थं मिथ्यात्वनिश्चयेन जगन्निराकुर्वन् मुनिरात्मनिदिध्यासनशीलः पुरुषः मुक्तो भवति तथा
च श्रुतिः तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरिति अ
स्यायमर्थः यतो ब्रह्मभावः परमपुरुषार्थस्तस्मात्तत्प्राप्तये पाण्डित्यं श्रवणं निःशेषतः संपाद्य बाल्येन
बालवद्वीतरागद्वेषतया संभावनानिरासार्थं युक्त्यनुसंधानरूपेण मननेन स्थातुमिच्छेत् ततस्तो
भयं संपाद्य मुनिर्निरंतरज्ञाननिष्ठः सन् तिष्ठासेत् विपरीतभावनानिरासार्थं सर्वदा निदिध्यासनत
परो भवेदित्यर्थः लोकसंस्थितो ह्यसंन्यासोऽपीत्यर्थः संन्यासप्रतिबंधेन तदनुकल्पत्यागस्योक्तत्वा
त् केचित्तु निरंतरज्ञाननिष्ठा संन्यासं विना न संभवतीत्याहुः लोकं लौकिकमनित्यत्वादनिर्वचनीय
त्वादिकं हन्तं मृषात्वलिंगं संतिष्ठते सम्यग्जानातीति वा विग्रहोऽस्तु॥ पूर्वोक्तैकत्वभावनायामसमर्थं
प्रत्याह॥ यावन्न पश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् श्रद्धालुरत्यूर्जितभक्तिलक्षणो
यस्तस्य दृश्योऽहमहर्निशं हृदि ५८ यावदखिलं सर्वं जगन्मदात्मकं पूर्वोक्तप्रकारेणाऽखंडरूपत
या न पश्येत् न साक्षात्कुर्यात् तावन्मदाराधने छांदोग्यादिश्रुतीरितशांडिल्यविद्याद्यन्यतमोपासना
यां तत्परो भवेत् तदुक्तम् निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः ये मंदास्तेऽनुकंप्याः स्युः सविशे ८८

69

षनिरूपणेः १ वशीकृतेन मनसैषां सगुणब्रह्मशीलनात् तदेवाविर्भवेत्साक्षादपेतोपाधि-
कल्पनमिति ननूपासकानां तेर्चिषमभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमा-
णपक्षान्षण्मासानुदङ्ङादित्य एति तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चंद्रमसंचं-
द्रमसो विद्युतं तत्पुरुषोऽमानवः सपतान्ब्रह्म गमयतीति श्रुतार्चिराद्याऽतिवाहकदेवतागमिता-
नां ब्रह्मलोकप्राप्तिर्भवतीत्याशंक्याभवत्तदिच्छयाप्रतिबद्धात्मसाक्षात्काराणां इच्छारहिता-
नां सम्यक् श्रवणादिप्रवृत्तानां तेषामात्मसाक्षात्कारेण जीवन्मुक्तिर्भवत्येवेत्याह श्रद्धालु-
रित्यादि गुरुवेदान्तवाक्येषु श्रद्धावान् अत्यूर्जिता कामसंकल्पसंस्पर्शशून्यत्वेन केवलोपास्य-
प्रेमात्मिका या भक्तिस्तस्या लक्षणानि नेत्रजलरोमांचादीनि यस्मिन्सः तथा च कामसंकल्पशू-
न्यो य उपासकः श्रवणादेव श्रद्धया प्रवर्तते तस्य हृदि प्रवृद्धनिःशंकस्वरूपो भवामि उपासनावशीकृ-
तचेतसस्तस्य श्रवणादिप्रवृत्तमात्रस्यैव सदा साक्षात्कृतो भवामि स जीवन्मुक्तो भवतीति भावः ५८
इदानीं श्रीरामगीताफलमाह ॥ रहस्यमेतच्छ्रुतिसारसंग्रहं मया विनिश्चित्य तवोदितं प्रियात्
यस्त्वेतदालोचयतीह बुद्धिमान्स मुच्यते पातकराशिभिः क्षणात् ५९ यॆयात तव प्रियात्त्वेदादेत

ज्ञानेउदितेकथितंग्रतंग्रन्तममितिभावः नत्वदेवत्वेनरमादृश्यतीति किंकृत्वाउदितेश्रुतिसार
रा॰ संग्रहंविशेषेणनिश्चित्य ननुतथानिश्चयोन्यत्रश्रुतिस्मृतिपुराणादिषुदृश्यतीतिचेदत्रआह र
गी॰टी हस्यंतत्रतत्रप्रकारांतरविस्तराभ्यांनिगूहितत्वाद्येनकेननिश्चेतुंनशक्यमितिभावः यस्तुबु
७८ द्धिमान्विशुद्धांतःकरणोविचारवानेतत्तआलोचयतियुक्तिभिश्चेतसिस्थिरीकरोतिसपुरुषः
पातकराशिभिःसर्वकर्मभिःक्षणात्तत्क्षणएवइहैवमुच्यते अत्रपातकशब्दःकर्ममात्रपरः
70 ज्ञानस्यप्रकृतत्वात्स्वरूपानुसंधानात्पातयतिस्वाभिनिवेशेनेतिव्युत्पत्तेश्च तथाचश्रुतिः ना
स्यकेनचित्कर्मणालोकोमीयते नमातृवधेननपितृवधेननस्तेयेननभ्रूणहत्ययेतिस्मृतिश्च
71 यथैधांसिसमिद्धोग्निर्भस्मसात्कुरुतेर्जुन ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेतथेति इहैवे
त्युक्तिस्तुनभवापेक्षया मयिकर्मनाभ्रूज्ञास्तिनभविष्यतीत्येवंनिष्कर्माणमात्मानमिहैवानु
भवतीतिभावः ५९ लोकानुग्रहार्थंपूर्वंपुनःपुनरात्मतत्त्वावगमोपायमुद्दिश्यापीदानीम ८॰
तिमंदानामपिकटितिबुद्ध्यारोहार्थंएकेनैवश्लोकेनस्फुटमाह॥आनर्यदीदंपरिदृश्यतेजग
न्मायैवसर्वंपरिहृत्यचेतसा मद्भावनाभावितशुद्धमानसःसुखीभवानंदमयोनिरामयः ९

हेआत्मन्यदियदाइदंजगत्त्वयादृष्टंपनेनदैववेनसाततत्त्वविचारपरेणमनसापरिहृत्यनकिंचिदितितिर
स्कृत्यशुद्धंरागादिमलशून्यंतन्मानसंमद्भावनाभावितं अखंडसच्चिदानंदश्रीरामोहमितिवास
नावासितंचकृत्वासुखीभव मद्भावनयाभावितंशुद्धमानसंयेनेतिकर्मधारयोत्तरपदोबहुव्री।
हिः नतुसतोनश्यमानस्यजगतःपरिहारोनसंभवतीत्यतआह मायैवेति सर्वंजगन्माया·
मयमेवनवस्त्वितिविचारजनितविज्ञानेनतत्परिहारोभवत्येवेतिभावः तथाचमायाशक्तेर्जे·
गद्भ्रमोत्पत्तिक्रमोवसिष्ठेनोक्तः सत्यात्मासर्वगोरामनित्योदितमहावपुः यन्मनाङ्मननीं
शक्तिंधत्तेतन्मनउच्यते आदौमनस्तदनुबंधविमोक्षदृष्टीपश्चात्प्रपंचरचनाभुवनाभिधाना
इत्यादिकास्थितिरियंहिगताप्रतिष्ठामाख्यायिकासुभगबालजनोदितेव २ यथाबालजना
यउदिताउक्ताआख्यायिकाकथावास्तववस्तुवृद्धिंगतातथैयंजगत्स्थितिरपीत्यर्थः आख्यायि।
कातेनैवोक्ता यथाबालस्यहिविनोदायधात्रीवक्तिशुभांकथां क्वचित्संतिमहाबाहोराजपुत्रा
स्त्रयःशुभाः द्वौनजातौतथैकस्तुगर्भएवनहिस्थितः वसंतितेधर्मयुक्ताअत्यंतासतिपत्तने स्व
कीयाच्छून्यनगरान्निर्गत्यविमलाशयाः गच्छंतोगगनेवृक्षान्ददृशुःफलशालिनः भविष्य

रा॰ गी॰टी ७२

72

त्रगरेतव राजपुत्रास्त्रयोपि ते सर्वे मय्यवस्थिताः पुत्रमृगयाव्यवहारिणः ८ यात्रेति कथिता रामबालका

ख्यायिका शुभा निश्चयं सर्वथैवा बालो निर्विचारणया धिया ९ इयं संसाररचना विचारोज्झितचेतसां

बालकाख्यायिकेवेत्थमवस्थितिमुपागतेति ननु मायिकप्रपंचे तिरस्कृत्य भावनया शुद्धात्मसा।

क्षात्कारेपि सर्वं कृतं इत्यत आह यतस्त्वं आनंदमयो निरामयः मायिकप्रपंचतादात्म्याध्यासेन सा

नंदमाहात्म्यमुपात्तदुःखितप्रतीतावपि वस्तुतो निरुपद्रवानंदरूपत्वात्तव स्वतः सिद्धं सर्वमिति भा।

वः इत्थं फलोपायसहिताः सगुणनिर्गुणोपासनाः प्रदर्श्य इदानीं तन्महिमानमाह ॥ यः सेवते मामगु

णं गुणात्परं हृदा कदा वा यदि वा गुणात्मकम् सोहं स्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकत्रित

यं यथा रविः ९१ यः पुरुषः कदाचित् विक्षेपबाहुल्यान्न सर्वदा सेवितुं समर्थः चित्तस्थैर्ये सति क

दाचिदपि हृदा मामगुणं गुणातीतं ताभावशालिनं यदि वा गुणात्मकं मनोमयः प्राणशरीरो भारूप

इति मनो ब्रह्मेत्युपासीतो आदित्यो ब्रह्मेत्युपासीतेत्यादिप्रकारेण सोपाधिकं सेवते भावयति स पुरुषो ७२

हंसमद्रूपपरमेश्वर्यः अतः स स्पृशन्सन् स्वपादस्पृष्टपांशुभिर्लोकत्रयं पुनाति पवित्रयति यस्तु

विक्षेपाभावात्सर्वदा सेवते तन्महिमा तु न शक्यते वक्तुमिति भावः पावनत्वे दृष्टान्तः यथा रविः।

स्वकिरणैर्लोकत्रयं पुनातीति तद्वत् ननु गुणं कथं सेवेतेत्यत आह गुणात्परमिति मायिकगुणसा
त्त्वेन तत्स्पृष्टत्वं गुणेभ्यः परत्वेन प्रकाशमानमितिभावः ९१ इदानीं श्रीरामगीताया उत्क।
र्षनिरूपणपूर्वकं पाठमात्रस्य फलमाह ॥ विज्ञानमेतदखिलश्रुतिसारसंज्ञं वेदान्तवेद्यचरणे
न मयैव गीतम् यः श्रद्धया परिपठेद्गुरुभक्तियुक्तो मय्येव सोऽमलमनाः प्रविलीयतेन्ते ९२ ॥
यः सत्वशुद्ध्यभावादर्थपर्यालोचनायामसमर्थः एतद्विज्ञानं गुरुभक्तियुक्तः सन् श्रद्धयास्तिक
बुद्ध्या परिपठेत् नित्यं पठेत् स पाठमहिम्नाऽमलमनाः शुद्धान्तःकरणः सन् अन्ते शरीरपातस
मये मय्येव प्रविलीयते मत्साक्षात्कारेण मुक्तो भवतीत्यर्थः विज्ञानमुत्कर्षयति अखिलेति स
र्वनिगमार्थसारोऽयमिति संज्ञापमानं वेदान्तवेद्यं स्वयमखण्डसच्चिदानन्द एव सन् स्वमायया ज·
गदिवावभासन इत्येवंविधं चरणं चरित्रं यस्य तेन मयैव ब्रह्मणैव गीतं सारमभिहितं अत एव तद
त्युत्कृष्टमिति भावः एतत्माहात्म्येन श्रीरामगीतायत्पापं तन्नाशयतीति नारदेत्यादिना रामायणा
दावेव नारदाय पितामहेनोक्तम् न देवात्र ग्रंथादावेवास्माभिरुपन्यस्तं तदत्रातेव पुनः स्मरणीय
म् तज्ज्ञानस्य रुच्युत्पादकत्वात् यज्ज्ञानतानन्दाणालोकः शुद्धबुद्धिमवाप्नुयादित्युक्तबुद्धिशुद्धिरूप·

फलप्रदत्वाच्चेति श्रीमत्कङ्कणवंशवारिधिजनुः कीर्तिस्फुरच्चंद्रिको वेदान्तादिकशास्त्रकैरवसमुन्मे
रा· षैकदेहनूदयः लोके भाति शशीव तापशमनः श्रीटेकचंद्रो द्विजस्तत्पुत्रस्तु यतीशइत्यपि जनैः संकी
गी·टी र्तितो राजते यो गोपालगच्छवसंस्तदधिपश्रीकुन्दनेनार्चितो वर्षैः केन्दुगजावनीपरिमिते दीपा·
७३ वलीवासरे दुर्व्याख्यानविलोपितापुनरियं जातेति जातोत्सवो नाम्नाप्येतदुदाजहार विहितं श्री·
रामगीतोत्सवम् ॥ इति श्रीमट्टेकचन्द्रात्मजेन रामसहायेन प्रख्यातयतीशोत्यपराभिधानेन नि
र्मितः श्रीरामगीतोत्सवः समाप्तः ॥ ॥ शुभम् कल्याणं भद्रमस्तु ॥

73